सामाजिकविज्ञानम्

अस्माकम् अतीतः – III

भागः 1

अष्टमकक्ष्यायै इतिहासस्य पाठ्यपुस्तकम्

सामाजिकविज्ञानम्

अस्माकम् अतीतः- III

भागः १

अष्टकक्षायै इतिहासस्य पाठ्यपुस्तकम्

एन सी ई आर टी
NCERT

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

जनवरीमासः 2016 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखः

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयम् एकया दृढतरया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकान् कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले च स्वस्य अनुभवैः चिन्तनस्य च अवसारान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभ्यां युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारितस्य मात्रायाः ग्राहकाः सन्ति इति मन्तव्यं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थितिस्थापकत्वम्(लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारीकरिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतस्मिन् प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते आश्चर्यस्य लघुषु समूहेषु वार्तालापस्य कृते तथा च चर्चायाः कृते हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभटाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति । एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम् । एतं योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञाः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः ।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वीकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नाविन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति। यतः भाविसंशोधनेषु स्वीकर्तुं शक्यं स्यात्।

निदेशकः
राष्ट्रिय-शैक्षिकानुसन्धानम्
प्रशिक्षण-परिषद् च
नवदेहली

30 नबम्बरः 2007

पाठ्यपुस्तक-निर्मातृ-समितिः

अध्यक्षः, सामाजिक-विज्ञान-पाठ्य-पुस्तक-परामर्श-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्तविश्वविद्यालयः,कोलकात्ता

मुख्यपरामर्शदः

नीलाद्रिभट्टचार्यः, प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली

सदस्याः

अर्चनाप्रसादः, एसोसिएट-प्रोफेसरः, जवाहरलालनेहरू-अध्यनकेन्द्रम्,जामिया-मिल्लिया-इस्लामिया, नवदेहली।

अञ्जलिखुल्लरः, पीजीटी(इतिहासः) केम्ब्रिजविद्यालयः,नवदेहली।

अनिलसेठी, प्रोफेसरः, सामाजिकविज्ञान-शिक्षाविभागः, एनसीईआरटी, नवदेहली।

जानकीनायरः,प्रोफेसरः, सामाजिकविज्ञानाध्ययनकेन्द्रम्, कोलकात्ता।

तनिकासरकारः,प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली।

ताप्तीगुहा-ठाकुरता,प्रोफेसरः, सामाजिकविज्ञानाध्ययनकेन्द्रम्, कोलकात्ता

प्रभुमाहापात्राः, एसोसिएटप्रोफेसरः, देहलीविश्वविद्यालयः, देहली।

रामचन्द्रगुहाः, स्वतन्त्रलेखकः, मानवशास्त्री इतिहासकारश्च, बेङ्गलुरुः।

रश्मिपालीवालः,एकलव्यः,होशंगाबादम्, मध्यप्रदेशः।

सञ्जयशर्मा, एसोसिएटप्रोफेसरः, जाकिरहुसैनमहाविद्यालयः, देहलीविश्वविद्यालयः, नवदेहली।

सतविन्दरकौरः, पीजीटी(इतिहासः), केन्द्रीयविद्यालयः सङ्ख्या -१,जालन्धरम्, पञ्चनदम्।

स्मितासहायभट्टाचार्या,पीजीटी(इतिहासम्), ब्ल्यूबेल्सविद्यालयः, नवदेहली।

एम.सिराजः अनवरः, प्रोफेसरः,पीपीएमईडी, एनसीईआरटी, नवदेहली।

एम.सिराजः अनवरः,प्रोफेसरः, पीपीएमईडी, एनसीईआरटी,नवदेहली।

हिन्द्यनुवादः

योगेन्द्रदत्तः,सराय-सी.एस.डी.एस.,देहली

रीतुसिंहः, सहायकप्रोफेसरः(इतिहासः), सामाजिक-विज्ञान-शिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

सिराजः अनवरः, प्रोफेसरः,पीपीएमईडी, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

सदस्य-समन्वयिका

रीतुसिंहः, सहायकाचार्या(इतिहासः), सामाजिकविज्ञान-विभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

आभारः

इदं पुस्तकं बहूनाम् इतिहासकाराणां शिक्षाविदां शिक्षकाणां च सामूहिकप्रसायानां फलरूपम् अस्ति । अत्र प्रदत्तानाम् अध्यायानां लेखने संशोधने च अनेके मासाः अतीताः । एते अध्यायाः कार्यशालासु जातचर्चाणाम् ई-मेलद्वारा संप्रेषितविचाराणां च आदानेन प्रदानेन च उद्भूताः सन्ति । एतस्यै प्रक्रियायै प्रत्येकं सदस्यः प्रकारान्तरेण स्वक्षमतायाः अनुरूपं योगदानं दत्तवान् ।

अनेके जनाः संस्थानानि च एतत् पुस्तकं सज्जीकर्तुं साहाय्यम् अकुर्वन् । प्रोफेसरः मुजफ्फरः आलमः डा.कुमकुमरायः च एतस्य लेखान् अपठतां परिवर्तनाय च मुख्यभूतपरामर्शान् अयच्छन् । पुस्तके प्रदत्तचित्रेभ्यः वयम् अनेकासां संस्थानां संङ्ग्रहाणां प्रयोगं कृतवन्तः । देहलीनगरस्य १८५७ तमवर्षस्य घटनानाम् अनेकानि चित्राणि अल्काजी-फाउण्डेशन-फार-दि आटर्स-पक्षतः स्वीकृतानि सन्ति । ब्रिटिशराजस्य विषये लिखितानि एकोनविंशतिशताब्द्याः बहूनि सचित्राणि पुस्तकानि इण्डिया-इण्टरनेशनल-सेण्टर इत्यस्य बहुमूल्यस्य इण्डिया-कलेक्शन इत्यस्य च भागभूतानि आसन् । वयं सुनीलजानासाहबं प्रति कृतज्ञाः स्मः यः नवतिवर्षीयः सन् अपि स्वचित्राणि अन्वेष्टुं साहाय्यम् अकरोत् तानि च प्रकाशयितुम् अनुमतिम् अपि अददात् । चत्वारिंशततमस्य दशकस्य आरम्भादेव सः आदिवासिक्षेत्राणां निरीक्षणं करोति स्म अपि च सः असङ्ख्यसमुदायानां दैनन्दिनजीवनं स्वछायाचित्रयन्त्रे उटङ्कितवान् । एतेषु कानिचन चित्राणि अधुना प्रकाशितानि सन्ति – (द ट्राइबल्स आफ इण्डिया, आक्सफोर्ड यूनिवर्सिटी प्रेस,२००३) अपि च बहूनि चित्राणि इन्दिरागान्धिराष्ट्रियकलाकेन्द्रे सुरक्षितानि सन्ति ।

परिषद् पाठ्यपुस्तकस्य निर्माय उल्लेखनीयसहयोगार्थम् अनिलशर्मणे, इन्द्रकुमाराय, (डी. पी.पी.आपरेटर),सतीशझावर्याय, (कापी-एडिटरः), दिनेशकुमाराय(कम्प्यूटर स्टेशन इंजार्ज) हार्दिकं कार्तज्ञं व्यक्तीकरोति । एतस्मिन् एव सन्दर्भे प्रकाशनविभागः, राष्ट्रियानुसन्धानप्रशिक्षणपरिषदः सहयोगः अपि प्रशंसनीयः अस्ति ।

अत्र अस्माभिः सर्वेषां कृतज्ञताज्ञापनस्य प्रयासः कृतः अस्ति परन्तु पुनरपि यदि कस्यचित् जनस्य संस्थायाः वा नामोल्लेखः न जातः स्यात् तर्हि विस्मरणाय क्षमाप्रार्थिनः वयं स्मः ।

श्रेयः

व्यक्तिः

सुनीलजाना(अध्यायः ४,चित्रम् ४,८,९,१०)

संस्थाः

दि अल्कजी फाउण्डेशन फार दि आट् र्स(अध्यायः ५,चित्रम् -११, अध्यायः ६,चित्रम्३,७)

विक्टोरिया-मेमोरियल-म्यूजियम(अध्यायः५,चित्रम् १)

पुस्तकानि

एण्ड्रियास-वोल्वासेनः,इम्पीरियल डेल्ही – द ब्रिटिश कैपिटल आफ दि इण्डियन एम्पायर(अध्यायः१,चित्रम् -४;अध्यायः ६,चित्रम् -९,१०,१६)

सी.ए.बेली,सं.,एन इलस्ट्रेटेड हिस्ट्री आफ माडर्न इण्डिया, १६०० – १९४७(अध्यायः १,चित्रम् – १;अध्यायः २,चित्रम्-५,१२;अध्यायः ३,चित्रम् -१)

कोल्सवर्दी ग्राण्ट,रूरल लाइफ इन बङ्गाल (अध्यायः३,चित्रम् -८,९,११,१२,१३)

कालिनकौम्पबेल,नैरेटिव आफ दि इण्डियन रिवोल्ट फ्राम इट्स आउटब्रेक टू द कैप्चर आफ लखन-ऊ(अध्यायः५,चित्रम् ३,५,६,७,८)

गौतमभद्रः, फ्राम एन एम्पीरियल प्राडक्ट टू ए नैशनल ड्रिंक ; द कल्चर आफ टी कञ्जम्प्शन इन माडर्न इण्डिया(अध्यायः १, चित्रम् – २)।

मैथ्यु-एच-एडने,मैपिंग एन एम्पायर ;द ज्योग्राफिकल कंस्ट्रक्शन आफ ब्रिटिश इण्डिया,१७६५-१८४३(अध्यायः १,चित्रम् १)

नार्मा-इवेन्सनः, दि इण्डियन मेट्रिपालिसः: ए व्यू टुवर्ड द वेस्ट (अध्यायः६,चित्रम् ८,१३,१४,१५)

आर.एच.फिलीमोरः, हिस्टारिकल रिकार्डस आफ द सर्वे आफ इण्डिया(अध्यायः १,चित्रम्-६)।

राबर्टमोंटगामरी मार्टिनः,दि इण्डियन एम्पायर (अध्यायः १,चित्रम् ७,अध्यायः २,चित्रम् १,अध्यायः ५,चित्रम् ७,९)

रूद्राङ्गशुमुखर्जी प्रमोदकपूरश्च, डेटलाइन – १८५७: रिवोल्ट अगेंस्ट द राज(अध्यायः ५,चित्रम् २,७)

सूजन-एस.बीन,यैंकी इण्डिया : अमेरिकन कमर्शियल एण्ड कल्चरल एनकाउंटर्स विद इण्डिया इन दि ऐज आफ सेल, १७८४-१८६०(अध्यायः २,चित्रम् ८,अध्यायः ३,चित्रम् -२,अध्यायः ६,चित्रम् २)

सूजन-स्ट्राङ्गः, सं,दि आर्ट्स आफ द सिख किंग्डम (अध्यायः २,चित्रम् ११)

एम.एम.के,सं., द गोल्डन काम: एम इंग्लिश लेडीज लाइफ इन ,मुगल डेल्ही : रेमिनिसेंसेज बाय एमिली, लेडी क्लाइव वेली, एण्ड बाय हर फादर, सर टामस मेतकाफ (अध्यायः ६,चित्रम् ५,१२)

टामस ,मेटकाफ,एन इम्पीरियल विजन : इण्डियन-आर्किटेक्चर एंड ब्रिटेन्स राज(अध्यायः ६,चित्रम् १७)

तोजीयाना जियानीबाल्दीत्सोनश्च, हिडेन ट्राइब्स आफ इण्डिया(अध्यायः ४,चित्रम् १,२,५,६,७)

विषय सूची

आमुखम् iii

1. कथं कदा कुत्र च ? 1

2. वाणिज्यतः साम्राज्यं यावत् । 9
(संस्थायाः सत्तास्थापनम्)

3. ग्रामीण-क्षेत्रस्य शासनम् । 26

4. आदिवासिनां, दीकोः, कस्यचित् सुवर्णयुगस्य च कल्पना । 39

5. यदा जनता विद्रोहं करोति । 51
(सप्तपञ्चाशदधिकाष्टा-दश-शत-तम-वर्षं (1857) तदनन्तरकालश्च)

6. उपनिवेशवादः नगरं च 64
(कस्याश्चित राजकीयराजधान्याः कथा)

अनुवादकः - रूपलालशर्मा



पूनायाः राजसभायां सन्धौ हस्ताक्षराङ्कनं कुर्वन्तः ब्रिटिशनिवासिनः (ब्रिटिश रेजिडेन्ट) १७९०।

१ कथं, कदा कुत्र च ?

दिनाङ्काः कियन्तः महत्त्वपूर्णाः भवन्ति ?

कश्चन कालः आसीत् यदा इतिहासकाराः दिनाङ्कानाम् एव इन्द्रजाले निमग्नाः भवन्ति स्म । कदा कः राजा राजसिंहासनम् अलङ्कृतवान् ? कदा किं युद्धम् अभवत् ? – प्रायः एतादृशीनां घटनानां विषये एव चर्चाः भवन्ति स्म । जनसामान्यस्य मान्यतानुसारम् इतिहासः दिनाङ्कानां पर्यायभूतः इति एव मन्यते स्म। भवद्भिः जनाः परस्परम् वार्त्तालापं कुर्वन्तः श्रुताः स्युः । उदाहरणार्थं कश्चित् वदति– श्रीमन् ! इतिहासः तु बहुजाड्यं जनयति । "केवलं दिनाङ्कान् रटन्तु" इत्येव तत्र करणीयं भवति । किम् इतिहासस्य विषये एषा धारणा समीचीना अस्ति ?

अत्र कोऽपि सन्देहः नास्ति यत् इतिहासः पृथक् पृथक् काले जातानां परिवर्तनानां विषये एव भवति इति । अभिप्रायः अयम् अस्ति यत् अतीत-काले वस्तूनि कीदृशानि आसन् ? तेषु वस्तुषु च अधुना कानि कानि परिवर्तनानि जातानि ? उदाहरणार्थं यदा वयम् अतीत-वर्तमानयोः विषये परस्परं तुलनां कुर्मः, तदा वयं दिनाङ्कस्य एव वर्णनं कुर्मः । वयम् अतीतस्य परवर्तिकालस्य च विषये चर्चां कुर्मः ।

दैनन्दिनजीवने वयं स्वपार्श्वस्थानां वस्तूनां विषये प्रायः ऐतिहासिक-प्रश्नान् न कुर्मः । वयं वस्तूनि स्वाभाविकानि सन्ति इति मत्वा व्यवहरामः, उदाहरणार्थं यत् किमपि वयं पश्यामः तस्मिन् विषये अस्माकम् अनुभूतिः भवति यत् एतत् सर्वं सर्वकालात् एतादृशम् एव स्याद् इति । परन्तु अस्माकं सर्वेषां समक्षे कदाचित् आश्चर्यजनकाः अवसराः अपि आयान्ति । बहुधा वयं समुत्सुकाः भवामः, एतादृशान् प्रश्नान् च पृच्छामः, ये प्रश्नाः वास्तविकतायाम् ऐतिहासिकाः भवन्ति इति । राजमार्गस्य पार्श्वे भवन्तः चायपानं कुर्वन्तं जनं दृष्ट्वा कदाचित् विचारितवन्तः स्युः यत् चायपानस्य कफघ्नीपानस्य (काफी) च प्रचलनं कदा आरभ्य जातं स्यात् ? इति । रेलयानस्य गवाक्षात् बहिः पश्यतां भवतां मनसि एषः प्रश्नः उदेतुं शक्नोति यत् "रेलवे" संस्थायाः निर्माणं कदा अभवत् ? इति । रेलयानस्य प्रचलनात् प्राक् जनाः देशात् देशान्तरं प्रति यात्रां कथं कर्तुं पारयन्ति स्म ? प्रातःकाले वार्त्तापत्रं पठन्तः भवन्तः इदं ज्ञातुं समुत्सुकाः भवितुं शक्नुवन्ति यत् यस्मिन् काले वार्त्तापत्राणि न प्रकाश्यन्ते स्म, तस्मिन् काले जनाः विविधघटनानां विषये कथं सूचनाः प्राप्नुवन्ति स्म ? इति ।

चित्रम् १ – ब्राह्मणाः ब्रिटेनियामहोदयायै उपहारस्वरूपं शास्त्रं ददति,जेम्सरेनेलद्वारा सज्जीकृतस्य प्रथमस्य चित्रस्य आवरणचित्रम्, १७८२.।

राबर्टक्लाइवः रेनेलवर्याय हिन्दुस्तानस्य मानचित्रस्य चित्ररचनायाः कार्यं समर्पितवान्। भारतस्य उपरि आङ्ग्लीयानां विजयस्य समर्थकः रेनेलवर्यः मन्यते स्म यत् भारतम् अधिग्रहीतुं मानचित्ररचनं किञ्चित् महत्त्वपूर्णं कार्यम् अस्ति इति । एतस्मिन् चित्रे दर्शितम् अस्ति यत् कथं भारतीयाः स्वेच्छापूर्वकं स्वप्राचीनान् पवित्र-ग्रन्थान् ब्रिटिशसत्तायाः प्रतीकभूतायै ब्रिटेनियायै समर्पितवन्तः । अस्मिन् चित्रे भारतीयब्राह्मणाः ग्रन्थान् समर्पयन्तः इत्थं दृश्यन्ते यत् ते ब्रिटेनियावर्यां भारतीयसंस्कृतेः रक्षार्थं साग्रहम् अत्र आगन्तुं कथयन्तः स्युः इति ।

➢ गतिविधिः

प्रथमं चित्रं सावधानं पश्यतु । इदं चित्रं कम् उपनिवेशवादं बोधयति ।



चित्रम् २ – विज्ञापनैः रुचेः अरुचेश्च निर्धारणं भवति।

वयं पुरातन-विज्ञापनेभ्यः इदं तथ्यम् अवगन्तुं साहाय्यं प्राप्नुमः यत् नूतनानाम् उत्पादानां कृते महाहट्टाः कथं सज्जाः जाताः ? इति, कथं नूतन-रुचयः प्रचलने आगताः ? द्वाविंशत्यधिकैकोनविंशतिशत-तमे वर्षे (१९२२) "लिप्टन"चायस्य कृते रचितम् इदं विज्ञापनं एतत् तथ्यं सङ्केतयति यत् आविश्वं सम्राजः इदमेव चायं पिबन्ति इति। एतस्य चित्रस्य पृष्ठस्थे भागे कश्चित् भारतीयप्रासादः दृश्यते, तत्र च अग्रिमभागे ब्रिटेनस्य सम्राज्ञ्याः विक्टोरियायाः तृतीयः पुत्रः राजकुमार "आर्थरः" अश्वे उपविष्टः अस्ति। राजकुमारार्थराय ड्यूक आफ कनाट इति उपाधिः प्रदत्तः आसीत्।

एते सर्वे ऐतिहासिकप्रश्नाः अस्मान् कालस्य विषये चिन्तयितुं प्रेरयन्ति। कालः सदैव वर्षस्य मासस्य च परिमापकत्वेन एव न द्रष्टुं शक्यते। कदाचित् एतादृशीनाम् इतिहास-सूचक-प्रक्रियाणां कृते कस्यचित् दिनाङ्कस्य निर्धारणं वास्तविकतायाम् एव असमीचीनं भवति, याः इतिहाससूचकप्रक्रियाः चिरकालं यावत् चलन्ति इति। भारते एकस्मिन् दिने सहसा एव प्रातःकाले जनाः चायपानं न आरब्धवन्तः। जनेषु चायपानस्य आस्वादनप्रवृत्तिः शनैः शनैः अजायत। एतादृशीनां घटनानां कृते काचित् स्पष्टा तिथिः न भवितुं शक्नोति। अनेन एव प्रकारेण वयं ब्रिटिशशासनस्य स्थापनार्थम् अपि कामपि एकां तिथिं न ज्ञापयितुं शक्नुमः। राष्ट्रियान्दोलनं कस्मिन् दिने आरब्धम् ? तथा च अर्थव्यवस्थायां समाजे च कस्मिन् दिने परिवर्तनानि जातानि ? इत्यस्मिन् विषये अपि इदम् इत्थमतया न ज्ञापयितुं शक्यते। एताः सर्वाः घटनाः कस्मिंश्चित् दीर्घावधौ घटन्ते। एतस्याम् अवस्थायां वयं कस्यचित् अवधिविषये एव वक्तुं शक्नुमः, यस्मिन् अवधौ एतानि विशिष्टानि परिवर्तनानि दृष्टिपथम् आगन्तुम् आरब्धानि स्युः।

पुनः जनाः इतिहासं दिनाङ्कानां परिप्रेक्ष्ये किमर्थं पश्यन्ति ? एतस्याः दृष्टेः किञ्चित् कारणम् अस्ति। कश्चन कालः आसीत् यदा युद्धविषयकप्रसङ्गाः महतीनां घटनानां वृत्तान्ताः चैव इतिहासत्वेन मन्यन्ते स्म। अयम् इतिहासः राज्ञां महाराजानां तेषां नीतीनां च विषये भवति स्म। इतिहासकाराः वर्णयन्ति यत् असौ राजा कस्मिन् वर्षे सिंहासनारूढः सञ्जातः ? कस्मिन् वर्षे राज्ञः विवाहः अभवत् ?। कस्मिन् वर्षे तस्य गृहे शिशुः अजायत ? कस्मिन् वर्षे सः कतमं युद्धम् अकरोत् ? सः कदा अम्रियत ? तस्य राजानः मृत्योः पश्चात् कः राजा राजसिंहासनम् आरूढवान् ? एतादृशीनां युद्धादिघटनानां कृते निश्चिततिथिः ज्ञापयितुं शक्यते इति, एतादृशेषु ऐतिहासिकप्रसङ्गेषु च तिथीनां महत्त्वम् अक्षुण्णम् तिष्ठति। यथा भवद्भिः गतद्वयोः वर्षयोः इतिहासस्य पुस्तकेषु दृष्टम् अस्ति, तथा अधुना इतिहासकाराः बहूनां विभिन्नानां प्रश्नानां विषयानां च उपरि अपि लेखितुम् आरब्धवन्तः। ते इतिहासकाराः अस्मिन् विषये अपि दत्तावधानाः भवन्ति यत् जनाः केन प्रकारेण स्वीयाम् आजीविकां चालयन्ति स्म। ते कानि सस्यानि उत्पादयन्ति स्म ? किं च भुञ्जते स्म ?। नगराणि कथं जातानि ? महाहट्टाः कथं विकसिताः ? कथं राज्यानि जातानि ? नूतनविचाराणां विकासः कथं जातः ? संस्कृतिः समाजः च कथं परिवर्तितौ ?

के दिनाङ्काः ?

केचन दिनाङ्काः महत्त्वपूर्णाः सन्ति इति अत्र महत्त्वं निश्चेतुं कः मानदण्डः भवति ? येषां दिनाङ्कानां वयं चयनं कुर्मः, येषां दिनाङ्कानां च परिप्रेक्ष्ये वयम् अतीतस्य कथाः वर्णयामः, ते दिनाङ्कत्वेन महत्त्वपूर्णाः न भवन्ति परन्तु ते एतस्मात् कारणात् महत्त्वपूर्णाः भवन्ति यतो हि काश्चन विशिष्टाः घटनाः एतेषु दिनाङ्केषु अभवन् इति दृष्ट्या एते महत्त्वपूर्णाः इति मत्वा वयं व्यवहरामः। यदि अध्ययनस्य विषयः परिवर्तितः भवति, यदि वयं नूतनविषयेषु अवधानं कुर्मः तर्हि तस्यां स्थितौ महत्त्वपूर्णदिनाङ्काः अपि परिवर्तन्ते।

कस्मिंश्चित् उदाहरणे विचारयन्तु। भारते ब्रिटिशैः इतिहासकारैः यः इतिहासः लिखितः तस्मिन् प्रत्येकं राष्ट्राध्यक्षस्य (गवर्नरजनरल) इत्यस्य शासनकालः महत्त्वपूर्णः अस्ति। एषः इतिहासः राष्ट्राध्यक्षस्य वारैनहेस्टिंग्सस्य शासनात् आरभते स्म। विभिन्नेषु अध्यायेषु वयम् अपरेषां राष्ट्राध्यक्षाणां (गवर्नरजनरल तेषु च हेस्टिंग्स-वेलेज्ली-बेटिंक-

डलहौजी-कैनिंग-लारेंस-लिटन-रिपन-कर्जन-हार्डिंग-इरविनानां विषये अपि पठामः । अस्मिन् इतिहासे राष्ट्राध्यक्षाणां वायसराय इत्येतेषां च कदापि असमाप्यमानक्रमः एव अजस्रं चलति स्म । इतिहासस्य एतेषु पुस्तकेषु सर्वेषां दिनाङ्कानां महत्त्वस्य निर्धारणम् एतेषाम् अधिकारिणां तेषां गतिविधीनां नीतीनाम् उपलब्धीनां च आधारेण भवति स्म । एषः निश्चयः एतस्मात् कारणात् भवति स्म यतोहि एतेषां जनानां जीवनात् बहिर्भूतं किमपि तादृशं नासीत् यस्य अवगमनं महत्त्वपूर्णं स्यात् इति । एतेषां ब्रिटिश- राष्ट्राध्यक्षादीनां (गवर्नरजनरल) जीवन-क्रमः ब्रिटिशभारतस्य इतिहासे पृथक्-पृथगध्यायानां विषयः भवति स्म ।

किं वयं तदानीन्तनकालस्य इतिहासं पृथक्तया न वर्णयितुं शक्नुमः ? राष्ट्राध्यक्षाणाम् (गवर्नर-जलरल) इतिहासस्य परिप्रेक्ष्ये वयं भारतीयसमाजस्य विभिन्नसमूहानां वर्गाणां च गतिविधिषु कथम् अवधानं कर्तुं शक्नुमः ?

यदा वयम् इतिहासम् अथवा कामपि कथां लिखामः तर्हि तां कथां वयं खण्डेषु अथवा अध्यायेषु विभाजयामः । वयम् एतत् विभाजनं किमर्थं कुर्मः ? एतत् विभाजनम् अनया दृष्ट्या क्रियते यतः प्रत्येकस्मिन् अध्याये किञ्चित् सामञ्जस्यं स्यात् । एतस्य एतत् उद्देश्यम् अस्ति यत् कथा जनानां पुरतः तेन क्रमेण आगच्छेत् येन जनाः तां कथां सरलतया बोद्धुं स्मर्तुं चापि पारयेयुः । एतस्यां प्रक्रियायां वयं केवलं ताः घटनाः उद्दिश्य एव बलाघातं कुर्मः, याः घटनाः तां कथां प्रस्तोतुं सहायभूताः भवन्ति । यः इतिहासः राष्ट्राध्यक्षाणां (गवर्नर-जलरल) जीवनाधारितः तेषां राष्ट्राध्यक्षाणां सन्दर्भे च भवति तस्मिन् इतिहासे भारतीयानां गतिविधयः महत्त्वं न दधति । तेषां कृते तत्र किमपि स्थानं न भवति । पुनः एतस्याम् अवस्थायां किं वा कर्तुं शक्येत ? स्पष्टमस्ति अस्माभिः स्वीयस्य इतिहासस्य किञ्चित् पृथक्-प्रारूपं रचनीयं भविष्यति । एतस्य अयम् अभिप्रायः अस्ति यत् अधुना यावत् अस्माकं दृष्टौ ये दिनाङ्काः महत्त्वपूर्णाः आसन् ते अधुना महत्त्वपूर्णाः न सन्ति । अस्माकम् अभिमता नूतनदिनाङ्काः महत्त्वपूर्णाः भविष्यन्ति ।

वयं कालावधीनां निर्धारणं कथं कुर्मः ?

१८१७तमे वर्षे स्कॉटलैण्डस्य अर्थशास्त्री राजनीतिज्ञः दार्शनिकः च जेम्समिलः त्रिषु विशालखण्डेषु "ए हिस्ट्री ऑफ ब्रिटिश इण्डिया" (ब्रिटिशभारतस्य इतिहासः) इति पुस्तकम् अलिखत् । एतस्मिन् पुस्तके सः भारतीयेतिहासस्य हिन्दु-मुस्लिम-ब्रिटिश-दृष्ट्या त्रिषु कालखण्डेषु विभाजनं कृतवान् । कालखण्डानाम् एतत् निर्धारणम् अधिकतराः जनाः अमन्यन्त अपि । किं भवद्भिः अस्मिन् भारतीयेतिहास-बोधनक्रमे कापि समस्या दृश्यते ?

वयं पृथक्-पृथक्-कालखण्डेषु किमर्थम् इतिहासं विभाजयितुं प्रयासं कुर्मः ? एतस्य विभाजनस्य अपि किञ्चित् विशिष्टं कारणम् अस्ति । वयं कस्यचित् कालखण्डस्य वैशिष्ट्यानि केन्द्रीयतत्त्वानि च ग्रहीतुं प्रयत्नं कुर्मः । अतः एतादृशाः शब्दाः महत्त्वपूर्णाः भवन्ति येषां माध्यमेन वयं समयस्य विभाजनं कुर्मः । एते शब्दाः अतीतस्य विषये अस्माकं विचारान् दर्शयन्ति । एते एव शब्दाः अस्मान् ज्ञापयन्ति यत् एकस्मात् कालावधेः आरभ्य अन्यकालावधिपर्यन्तं मध्ये जातानां परिवर्तनानां किं महत्त्वम् अस्ति ? इति ।

मिलवर्यः अनुभवतिस्म यत् सर्वे एशिया-भूभागीयाः समाजाः सभ्यतायाः विषये यूरोपस्य अपेक्षया पृष्ठे वर्तन्ते । अत्रत्येतिहास्य विषये तस्य मिलवर्यस्य ज्ञानम् एतादृशम् आसीत् यत् भारते आङ्ग्लीयानाम् आगमनात् पूर्वम् अत्र हिन्दु-मुस्लिम-शासकैः एव शासनं क्रियते स्म । अत्र सर्वत्र धार्मिकविद्वेषस्य जातिगतबन्धनानां कुरीतीनाम् अन्धविश्वासानां च एव प्रसारः आसीत् ।

चित्रम् ३ – वॉरेनहेस्टिंग्सः १७७३तमवर्षे भारतस्य प्रथमराष्ट्राध्यक्षः जातः ।

इतिहासस्य पुस्तकेषु राष्ट्राध्यक्षाणां (गवर्नर-जलरल) कार्याणि तेषां राष्ट्राध्यक्षाणां च जीवनचरित्रेषु तेषां गौरवगाथाः छायाचित्रेषु च तेषां प्रकृष्ट-वैयक्तित्त्वानि अपि वर्ण्यन्ते स्म ।

➢ गतिविधिः

स्वाम्बया कुटुम्बस्य च केनचित् अन्यसदस्येन सह वार्त्तालापं कृत्वा तेषां जीवनस्य विषये अवजानन्तु । अधुना तेषां जीवनं पृथक्-पृथक् कालखण्डेषु विभाजयन्तु, प्रत्येकं कालावधौ घटित-महत्त्वपूर्ण-घटनानां सूचीं निर्मान्तु । स्पष्टयन्तु यत् भवद्भिः कालखण्डाः केन प्रकारेण निर्धारिताः ।

मिल-महोदयस्य दृष्ट्या ब्रिटिशशासनेन भारतं सभ्यतायाः मार्गे नेतुं शक्यते । एतस्मै कार्याय आवश्यकम् आसीत् यत् भारते यूरोपस्य शिष्टाचाराः, कलाः, संस्थानानि, अधिनियमाः च प्रवर्तनीयाः इति । मिलमहोदयः तु तथाविधं परामर्शम् अपि अददात् यत् आङ्ग्लीयैः भारतस्य सम्पूर्णभू-भागस्य अधिग्रहणं करणीयं येन भारतीयजनता ज्ञानं सुखिजीवनं च प्राप्तुं समर्था स्यात् । तस्य मिलवर्यस्य मान्यता आसीत् यत् आङ्ग्लीयानां साहाय्यं विना भारतस्य प्रगतिं विकासं च न कश्चिदपि कर्तुं शक्नोति ?

इतिहासस्य एतस्यां धारणायाम् आङ्ग्लशासनं प्रगतेः सभ्यतायाः च प्रतीकभूतम् आसीत् । आङ्ग्लशासनात् प्राक् अत्र सम्पूर्णतया अन्धकारमयी स्थितिः आसीत् । किम् एतादृशी धारणा स्वीकर्तुं शक्यते ?

किम् इतिहासस्य एतं कालं "हिन्दु-मुस्लिमकालः" इति वक्तुं शक्नुमः ? किम् एतेषु सर्वेषु कालखण्डेषु अनेकप्रकारकाः धर्माः सहैव न चलन्ति स्म ? कस्यचित् युगस्य निर्धारणस्य तात्कालिकशासकानां धर्मस्य अनुसारं निश्चयस्य का आवश्यकता अस्ति ? यदि वयम् एवं कुर्मः तर्हि एतस्य अभिप्रायः अस्ति यत् इतरेषाम् अर्थात् सामान्यजनानां जीवनयापनशैल्याः किमपि महत्त्वं न भवति इति । अस्माभिः स्मर्तव्यं यत् प्राचीनभारते सर्वेषां शासकानाम् अपि एक एव धर्मः न भवति स्म ।

आङ्ग्लीयैः बोधितवर्गीकरणात् पृथक्-भूत्वा इतिहासकाराः भारतीयेतिहासं सामान्येन प्राचीन-मध्यकालीनाधुनिक-कालेषु विभागं कृत्वा पश्यन्ति । एतस्य विभाजनस्य पृथक् स्वीयाः समस्याः सन्ति । इतिहासस्य अनेन प्रकारेण विभाजनस्य दृष्टिः अपि पश्चिमतः आगता अस्ति । पश्चिमदेशेषु "आधुनिककालः" विज्ञान-तर्क-लोकतन्त्र-मुक्ति-समानता-सदृशानाम् आधुनिक-शक्तीनां विकासस्य युगं मन्यते । तेषां दृष्टौ मध्यकालीनसमाजाः ते समाजाः आसन् यत्र आधुनिकसमाजस्य एताः विशेषताः नैव आसन् । किं वयं स्वाध्यायाय अध्ययनाय वा आधुनिककालस्य एताम् अवधावरणाम् अज्ञात्वा एव अङ्गीकर्तुं शक्नुमः ? यथा भवन्तः एतस्मिन् पुस्तके द्रक्ष्यन्ति, आङ्ग्लशासने जनेषु समानता स्वतन्त्रता मुक्तिश्च च आसीत् । न चैव अयम् आर्थिकविकासस्य प्रगतेः च कालः आसीत् ।

बहवः इतिहासकाराः एतत् युगम् "औपनिवेशिकयुगम्" इति कथयन्ति ।

"औपनिवेशिकम्" इति किं भवति ?

एतस्मिन् पुस्तके भवन्तः पठिष्यन्ति यत् केन प्रकारेण आङ्ग्लीयैः अस्माकं देशः जितः, स्थानीयशासकान् नृपान् च पराभूय स्वशासनं स्थापितम् । भवन्तः द्रक्ष्यन्ति यत् कथं तैः अर्थव्यवस्थायां समाजस्य च उपरि नियन्त्रणम् अपि स्थापितम्, स्वीयानां सम्पूर्णावश्यकतानां पूर्तये धनव्यवस्थां ते राजस्वं गृहीत्वा अकुर्वन्, स्वावश्यकतानां पूर्तये ते नित्योपयोगिवस्तूनि न्यूनमूल्येन क्रीतवन्तः । ते निर्याताय महत्त्वपूर्णसस्यानां कृषिकार्यं कारितवन्तः तथा च एतेषां सर्वेषां प्रयासानां कारणात् कानि परिवर्तनानि आगतानि ? भवन्तः एतदपि एतस्मिन् पुस्तके अवगमिष्यन्ति यत् ब्रिटिशशासनस्य कारणात् अत्रत्येषु मूल्येषु मान्यतासु रुचिषु अरुचिषु रीतिषु जीवनशैल्यां च कानि कानि परिवर्तनानि जातानि ? यदा एकस्मिन् देशे अन्यदेशस्य प्रभावेण एतादृशानि राजनैतिकानि आर्थिकानि सामाजिकानि सांस्कृतिकपरिवर्तनानि च जायन्ते तदा एषा प्रकिया एव "औपनिवेशीकरणम्" इति उच्यते ।

परन्तु शीघ्रमेव भवन्तः एतदपि अवगमिष्यन्ति यत् सर्वे वर्गाः एतानि उपर्युक्तानि चर्चितपरिवर्तनानि समानदृष्ट्या एव न अनुभवन्ति स्म । अतः एतस्य पुस्तकस्य नाम अस्माकम् अतीताः (अर्थात् अनेकेषु अतीतेषु केन्द्रितम्) इति कृतम् अस्ति ।

वयं कथं जानीमः ?

भारतीयस्य इतिहासस्य अतीतानां सार्द्धद्विशत-वर्षाणाम् इतिहासं लेखितुम् इतिहासकाराः केषां स्रोतसां प्रयोगं कुर्वन्ति ?

"प्रशासनम्" अभिलेखान् सज्जीकरोति

आङ्ग्लशासनेन सज्जीकृताः सर्वकारीयाः अभिलेखाः इतिहासकाराणां महत्त्वपूर्ण-साधनभूताः भवन्ति स्म । आङ्ग्लीयानाम् अभिमतम् आसीत् यत् तथ्यानां लेखनं बहुमहत्त्वपूर्णं भवति इति। तदर्थं प्रत्येकं निर्देशस्य योजनायाः नीतिगतनिर्णयानां सहमतेः निरीक्षणस्य च सुस्पष्टतया लेखनम् आवश्यकम् आसीत् । एतस्मात् कार्यात् पश्चात् तथ्यानां सम्यक्प्रकारेण अध्ययनं कर्तुम् एवञ्च तथ्येषु वादविवादः अपि कर्तुं शक्यते। तथ्यानाम् बोधे सति ज्ञापन-टिप्पणी-प्रतिवेदनानि आधारीकृत्य शासनस्य संस्कृतिः प्रादुर्भूता ।

आङ्ग्लीयाः इदमपि अनुभवन्ति स्म यत् समस्तप्रमुखाभिलेखानां पत्राणां च सावधानं स्थापनम् आवश्यकम् अस्ति । अनया दृष्ट्या ते सर्वेषु शासकीयसंस्थानेषु अखिलेखकक्षान् (रिकार्ड-रुम) अपि निर्मापितवन्तः । उपमण्डलीयकार्यालयानां मण्डलायुक्तस्य जनपदायुक्तस्य कार्यालयानां प्रान्तीयसचिवालयानां न्यायालयानां च स्वस्य पृथक् पृथक् अखिलेखकक्षाः भवन्ति स्म । महत्त्वपूर्णाभिलेखान् संरक्षयितुं अभिलेखागार- (आर्काइव) सङ्ग्रहालयसदृशानि संस्थानानि च निर्मापितानि ।

एकोनविंशतिशताब्द्याः आरम्भे प्रशासनस्य एकस्याः शाखातः अपरशाखां प्रति प्रेषितपत्राणि ज्ञापनानि च भवन्तः अद्यापि अभिलेखागारेषु द्रष्टुं शक्नुवन्ति। तत्र भवन्तः जनपदीयाधिकारिभिः सज्जीकृतानि पत्राणि सज्जीकृताः समाख्याः (रिपोर्ट्) च अपि पठितुं शक्नुवन्ति अथवा वरिष्ठाधिकारिभिः प्रान्तीयाधिकरिभ्यः दत्तान् निर्देशान् परामर्शान् चापि द्रष्टुं शक्नुवन्ति । एकोनविंशशब्दाब्द्याः आरम्भिकवर्षेषु एतेषाम् अभिलेखानां सावधानं समाख्याः (नकलें) निर्मीयन्ते स्म ।

अभिलेखान् कुशलसुलेखकाः लिखन्ति स्म । सुलेखकाः (खुशनवीसी) ते जनाः भवन्ति स्म ये व्यवस्थितप्रकारेण सुलेखेन च तथ्यानि लिखन्ति। एकोनविंशतिशताब्द्याः

चित्रम् ४ – "भारतीय-राष्ट्रिय-अभिलेखागारम्"१९२०तमे दशके निर्मितम् ।
यदा नवदेहल्याः निर्माणम् अभवत् तदा राष्ट्रिय-सङ्ग्रहालयः राष्ट्रियाभिलेखागारम् च इति द्वे एव वायसरायस्य निवासस्य समीपे निर्मापिते आस्ताम्। एतस्मात् ज्ञायते यत् आङ्ग्लीयानां दृष्टौ एतयोः संस्थानयोः कियत् महत्त्वम् आसीत् ।

स्रोतः -१

गृहविभागाय प्रेषितसमाख्या

१९४६ तमवर्षे भारतस्य औपनिवेशिकसर्वकारः राजकीय-भारतीय-नौसेनायाः पोतेषु सैनिकानां विद्रोहं शमयितुं प्रयतते स्म । तस्मिन् काले विभिन्न-पत्तनेभ्यः गृहविभागः यां समाख्यां प्राप्नोति स्म तस्याः कानिचन उदाहरणानि इत्थं सन्ति –

बम्बयीमहानगरम् – एषा व्यवस्था कल्पिता अस्ति यत् सेना पोतानां कार्यालयानां च अधिग्रहणं कुर्यात् । राजकीयाः नौसैनिकपोताः अधुना अपि पत्तनेभ्यः बहिः सन्ति ।

कराचीनगरम् – ३०१विद्रोहिणः निगडिताः सन्ति । केचन अन्ये सन्देहास्पदविद्रोहिनः अपि निगृहीताः सन्ति ---सर्वे कार्यालयाः सैन्यनिरीक्षणे सन्ति ।

विशाखापटनम्- स्थितिः सर्वथा नियन्त्रणे एव अस्ति कस्यापि क्वापि हिंसा न अभवत् । पोतेषु प्रतिष्ठानेषु च सैन्यसुरक्षाकर्मिणः नियुक्ताः सन्ति । कुत्रापि चिन्ताजनक-स्थितेः सम्भावना नास्ति परन्तु कदाचित् एतत् भवितुं शक्नोति यत् केचन सैनिकाः कार्यक्षेत्रं न आगच्छेयुः इति ।

डायरेक्टर-आफ-इंटेलिजेंस, हेडक्वार्टर,
इण्डिया-कमाण्ड, सिचुएशन-रिपोर्ट सं -७,
फाइल-सं,५/२१/४६
गृह (राजनैतिकम्),भारतसर्वकारः ।

चित्रम् ५ -
शरीफे इत्यस्य पादपः,
१७७० तमदशकः ।

आङ्ग्लीयैः सर्जितेषु वानस्पतिकोद्यानानां प्राकृतिकेतिहास-सङ्ग्रहालयानां च विभिन्नपादपानां चित्राणि तेषां सम्बद्धसूचनाः च एकत्रीक्रियन्ते स्म । एतानि चित्राणि स्थानीयशिल्पकारैः निर्माप्यन्ते स्म । अधुना इतिहासकाराः एतस्मिन् विषये ध्यानकेन्द्रितं कुर्वन्ति यत् एतादृशी सूचनाः कथम् एकत्रीक्रियते स्म, अपि च अनेन उपनिवेशवादस्य विषये किं ज्ञायते ।

मध्यकालं यावत् मुद्रण-प्रविधिः अपि विकसितः आसीत् । एतस्य प्रविधेः आधारेण अधुना प्रत्येकं सर्वकारिविभागस्य क्रियान्वयितानाम् अभिलेखानाम् अनेकाः प्रतयः निर्मातुम् आरब्धाः ।

सर्वेक्षणस्य वर्धमानं महत्त्वम्

औपनिवेशिकशासनस्य काले सर्वेक्षणस्य प्रचलनमपि कालक्रमेण महत्त्वभूतम् अभवत् । आङ्ग्लीयानां विश्वासः आसीत् यत् कस्मिन्नपि देशे सुप्रकारेण शासनं सञ्चालयितुं तस्य देशस्य विषये समीचीनावगमनम् आवश्यकं भवति । एकोनविंशशताब्द्याः आरम्भिककालं यावत् सम्पूर्णदेशस्य मानचित्रस्य सज्जीकरणाय महान्ति सर्वेक्षणानि आरब्धानि । ग्रामेषु राजस्वसर्वेक्षणानि कृतानि । एतेषां सर्वेक्षणानाम् उद्देश्यम् आसीत् भूमेः तलस्य मृदायाः गुणवत्तायाः तत्र प्राप्यमाणानां पादपानां जीवजन्तूनां स्थानीयेतिहासस्य सस्यानां च विषये ज्ञानं भवेत् । आङ्ग्लीयानां दृष्टौ कस्मिंश्चित् भूभागे शासनं करणीयं तर्हि उपर्युक्तानां सर्वेषां विषयाणाम् अवगमनम् आवश्यकम् आसीत् । एकोनविंशतिशताब्द्याः अन्तिमकालखण्डात् प्रत्येकस्मिन् दशसु वर्षेषु जनगणनाकार्यम् अपि आरब्धम् । जनगणनायाः माध्यमेन भारतस्य सर्वेषु प्रान्तेषु निवसतां जनानां सङ्ख्यायाः तेषां जातेः क्षेत्रस्य व्यवसायस्य च विषये अपि सूचनाः एकत्रीक्रियन्ते स्म । एतदतिरिच्य वानस्पतिकानि प्राणिवैज्ञानिकानि पुरातात्त्विकानि मानवशास्त्रसम्बद्धानि वनसम्बद्धानि च सर्वेक्षणानि बहूनि च अन्यानि अपि सर्वेक्षणानि क्रियन्ते स्म ।

अधिकृताभिलेखैः किं न ज्ञायते ?

अभिलेखानाम् अस्मात् विशालभाण्डागारात् वयं बहुकिमपि अवगन्तुं शक्नुमः । पुनरपि एतस्य तथ्यस्य अवहेलनं न कर्तुं शक्यते यत् एते सर्वे सर्वकारीयाः अभिलेखाः सन्ति इति ।



चित्रम् ६ – *बङ्गप्रान्ते मानचित्रणस्य सर्वेक्षणस्य च कार्यं चलति । जेम्सप्रेंसेपवर्येण रचितं किञ्चित् चित्रम्, १८३२ ।*
सावधानं पश्यन्तु, सर्वेक्षणे प्रयुक्तानि सर्वाणि चित्राणि अग्रिमभागे दर्शितानि सन्ति । चित्रकारः एतस्याः परियोजनायाः वैज्ञानिकस्वरूपे विशेषतया बलाघातम् इच्छति ।

चित्रम् -*१८५७ तमवर्षस्य विद्रोहिणः ।*

चलचित्राणि सावधानं द्रष्टव्यानि । तैः वयं चित्रकारस्य चिन्तनम् अवगच्छामः । १८५७ तमवर्षस्य विद्रोहात् पश्चात् आङ्ग्लीयैः सज्जीकृतेषु सचित्रपुस्तकेषु एतत् चित्रम् अनेकेषु स्थानेषु दृश्यते । एतस्य छायाचित्रस्य अधः लिखितं भवति स्म "विद्रोहिणः सैनिकाः सर्वत्र लुण्ठने संलग्नाः सन्ति ।" आङ्ग्लीयानां दृष्टौ विद्रोहीजनता लोभसमन्विता दुष्टा दयारहिता च आसीत् । अस्य विद्रोहस्य विषये भवन्तः पञ्चमाध्याये पठिष्यन्ति ।

एतेभ्यः अभिलेखेभ्यः वयम् एतदेव अवगन्तुं शक्नुमः यत् सर्वकारीयाः अधिकारिणः किं चिन्तयन्ति स्म ? केषु विषयेषु वस्तुषु च तेषां रुचिः आसीत्, तथा च अनन्तरकालाय ते कानि कानि वस्तूनि संरक्ष्य स्थापयितुम् इच्छन्ति स्म ? वयम् एतैः अभिलेखैः इदं बोद्धुं सदैव मार्गदर्शनं न प्राप्नुमः यत् देशस्य अपरेषु भागेषु विद्यमानाः जनाः किम् अनुभवन्ति स्म इति, तेषां क्रियान्वयनस्य च किं कारणम् आसीत् ?

एतानि तथ्यानि अवगन्तुम् अस्माभिः कुत्रचित् अन्यत्र परिशीलनीयं भविष्यति । यदा वयम् एतादृशानाम् अपरेषां स्रोतसाम् अन्वेषणम् आरभामहे तदा वयं विविधश्रोतांसि प्राप्तुं शक्नुमः । परन्तु सर्वकारीयानाम् अभिलेखानाम् अपेक्षया तेषां निजाभिलेखानाम् अन्वेषणं किञ्चित् कठिनमिति भवति । अनया दृष्ट्या जनानां दैनन्दिन्याम् उल्लिखितानि तथ्यानि तीर्थयात्राणां यात्रिणां च संस्मरणानि महत्त्वपूर्णजनानाम् आत्मकथाः स्थानीयमहाहट्टेषु विक्रीयमाणानि पुस्तकानि टिप्पणीपुस्तिकाः च अपि महत्त्वपूर्णाः भवन्ति । कालक्रमेण यथा टङ्कनस्य प्रविधिः प्रकाशपथम् आगतः, तथा वार्तापत्राणि मुद्रयितुम् आरब्धानि, विभिन्नेषु च विषयेषु जनतायाः मध्ये वादाः विवादाः च अपि अभवन् । नेतारः समाजसुधारकाः च स्वविचारान् चिन्तनं च जनेषु प्रसारयितुम् अलिखन्, कवयः उपन्यासकाराः च स्वभावनाः विचारान् च अभिव्यङ्क्तुं लेखितवन्तः ।

परन्तु एतानि सर्वाणि श्रोतांसि ते जनाः रचितवन्तः ये जनाः पठितुं लेखितुं च न जानन्ति स्म । परन्तु एतेभ्यः स्रोतोभ्यः वयम् इदं न अवबोद्धुं शक्नुमः यत् आदिवासिनः कृषकाः आकरश्रमिकाः राजमार्गाणां वास्तव्याः निर्धनाः च किम् अनुभवन्ति स्म इति ?

यदि वयं किञ्चित् इतोऽपि प्रयत्नं कुर्याम तर्हि एतस्मिन् विषये आधिक्येन ज्ञातुं शक्नुमः । कालक्रमेण यथा भवन्तः पुस्तकीयज्ञानेन विकसिताः भविष्यन्ति तथा एतत् तथ्यम् अवगन्तुं सारल्यम् अनुभविष्यन्ति ।

"मनुष्याणां "भक्ष्यं" नास्ति"

समाचारपत्रैः देशस्य विभिन्नेषु भागेषु जातान्दोलनानां विषये ज्ञायते । अत्र १९४६ तमवर्षे आरक्षि- कार्यबहिष्कारस्य वार्त्ता अत्र प्रकाशिता अस्ति ।

देहल्यां द्विसहस्राधिकाः आरक्षकाः बृहस्पतिवासरे प्रातःकाले प्राप्यमाणं स्वन्यूनवेतन अथ च पुलिसलाइन्सपाकशालातः प्राप्यमाणं निम्नगुणवत्तासम्पन्नं भोजनं च विरुध्य भोजनं कर्तुं निराकृतवन्तः ।
यदा एतां सूचनाम् अन्यारक्षकालयस्थाः आरक्षिणः श्रुतवन्तः, तदा तत्रत्याः आरक्षकाः भोजनं कर्तुं निराकृतवन्तः--- । केषाञ्चित् कार्यबहिष्कर्तृणां कर्मचारिणां कथनम् आसीत् यत् "पुलिसलाइन्स इत्यस्याः पाकशालातः यत् भोजनम् आयाति तत् भोजनं कश्चिदपि मनुष्यः न भोक्तुं शक्नोति इति । अस्माभिः या रोटिका द्विदलं च भोक्तव्यं भवति तत् कश्चित् पशुः अपि न भोक्तुं शक्नोति ।"

हिन्दुस्तानटाइम्सः, २२मार्चमासः, १९४६

➢ गतिविधिः

प्रथमं द्वितीयं च स्रोतसं पश्यन्तु । किं भवद्भिः प्रतिवेदनानां स्वरूपस्य विषये किञ्चित् वैभिन्न्यं दृश्यते । ज्ञापयन्तु यत् भवन्तः किम् वैभिन्न्यम् अनुभवन्ति ।

आगच्छन्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् भवन्तः इतिहासकाराः सन्ति इति। भवन्तः एतं विषयम् अवगन्तुम् इच्छन्ति यत् स्वतन्त्रतायाः प्राप्तेः पश्चात् कस्यचित् दुर्गमादिवासिक्षेत्रस्य कृषिकार्ये कानि परिवर्तनानि जातानि सन्ति ? एताः सूचनाः अन्वेष्टुं विभिन्नानाम् उपायानां सूचीं कुर्वन्तु।

पुनः स्मरन्तु -

१. उचितम् अनुचितं च ज्ञापयन्तु –

(क) जेम्समिलः भारतीयम् इतिहासम् ईसाई-हिन्दु-मुस्लिमादिरूपेण त्रिषु कालखण्डेषु विभाजितवान्।

(ख) सर्वकारीयाभिलेखेभ्यः वयम् एतं विषयम् अवगन्तुं साहाय्यं प्राप्नुमः यत् सामान्याः जनाः किं चिन्तयन्ति।

(ग) आङ्ग्लीयाः अनुभवन्ति स्म यत् समुचितप्रकारेण शासितुं सर्वेक्षणानि महत्त्वपूर्णानि भवन्ति।

आगच्छन्तु विचारयामः –

२. जेम्समिलः भारतीयम् इतिहासं यया प्रक्रियया विभाजितवान् अस्ति तत्र काः समस्याः सन्ति ?

३. आङ्ग्लीयाः कथम् अभिलेखान् संरक्ष्य स्थापितवन्तः ?

४. इतिहासकाराः पुरातनैः वार्त्तापत्रैः याः सूचनाम् एकत्रीकुर्वन्ति, ताः सूचनाः आरक्षिसमाख्यासु उपलब्ध-समाख्याभ्यः कथं पृथक् भवन्ति ?

आगच्छन्तु (अभ्यासं) कृत्वा पश्यामः –

५. किं भवन्तः अद्यतनस्य संसारे जातानि कानिचन सर्वेक्षणानि उदाहरणरूपेण प्रस्तोतुं शक्नुवन्ति ? चिन्तयन्तु यत् कथं क्रीडकानां निर्मातृसंस्थाः इदं जानन्ति यत् बालेभ्यः कानि क्रीडनकानि आधिक्येन रोचन्ते ? अथवा सर्वकारः कथं जानाति यत् विद्यालयेषु बालानां सङ्ख्या कियती अस्ति ? इतिहासकाराः एतादृशैः सर्वेक्षणैः किं प्राप्तुं शक्नुवन्ति ?

॥ इति प्रथमोऽध्यायः ॥

२ वाणिज्यतः साम्राज्यं यावत् संस्थायाः सत्तास्थापनम्

औरङ्गजेबः मुगलसम्राट्सु अन्तिमः शक्तिशाली सम्राट् (बादशाह) आसीत् । सः तात्कालिकभारतस्य एकस्मिन् महति भूभागे शासनम् अकरोत् । सप्ताधिकसप्तदशशत-तमे (1707) वर्षे तस्य मृत्योः पश्चात् अनेके मुगलप्रान्ताधिपाः (मुगलसरदार) महान्तः भूस्वामिनः (जमींदार) च स्वशक्तिं प्रदर्शितवन्तः । ते भूस्वामिनः प्रान्ताधिपाः च स्वीयानि क्षेत्रीयाणि राज्यानि (रियासतें) अपि स्थापितवन्तः । कालक्रमेण यथा विभिन्नभागेषु शक्तिसम्पन्नानि क्षेत्रीयराज्यानि (रियासतें) प्रकाशपथम् आगतानि तथा देहली अधिककालं यावत् प्रभाविकेन्द्ररूपेण न स्थातुं शक्तवती ।

अष्टादशशताब्दस्य उत्तरार्धं यावत् राजनैतिकक्षितिजे आङ्ग्लीयानां रूपेण काचित् नूतना शक्तिः विकसितुम् आरब्धवती आसीत् । किं भवन्तः जानन्ति यत् आङ्ग्लीयाः सर्वप्रथमं कस्याश्चित् लघुवाणिज्यिक-संस्थायाः माध्यमेन भारतम् आगतवन्तः आसन् किञ्च तेषाम् अत्रत्यं भूभागम् अधिग्रहीतुम् अधिका रुचिः न आसीत् इति ? पुनः एतादृशं कथम् अभवत् यत् कस्मिंश्चित् दिने ते एतस्य विशाल-साम्राज्यस्य स्वामिनः सञ्जाताः ? एतस्मिन् अध्याये भवन्तः द्रक्ष्यन्ति यत् एतत् सर्वं कथम् अभवत् ? इति ।

चित्रम् -1 सेनानायकेन (कैप्टन) हडसनवर्येण बहादुरशाहजफरस्य तस्य पुत्राणां च निग्रहणं कृतम् ।

औरङ्गजेबात् पश्चात् कश्चिदपि मुगलसम्राट् तथा शक्तिशाली तु न अभवत् पुनरपि प्रतीकरूपेण मुगलसम्राजां महत्त्वं पूर्ववत् एव आसीत् । यदा सप्तपञ्चाशदधिकाष्टादशशततमे (1857) वर्षे ब्रिटिशशासनं विरुध्य महती क्रान्तिः प्रारब्धा तदा विद्रोहिणः मुगलसम्राजं बहादुरशाहजफरम् एव स्वनेतृरूपेण अङ्गीकृतवन्तः । यदा विद्रोहः अभिमर्दितः, तदा संस्थाजनाः बहादुरशाहजफरं देशं परित्यक्तुं बाध्यम् अकुर्वन् तथा च तस्य (बहादुरशाहजफरस्य) पुत्रान् तस्य पुरतः एव हतवन्तः ।



चित्रम् २ – अष्टादशशताब्द्यां भारतम् आगन्तुं मार्गाः।

पूर्वदिशि ईस्ट-इण्डिया-संस्थायाः(कम्पनी) आगमनम्

षोड्शशततमे (1600) ख्रिस्ताब्दे ईस्ट-इण्डिया-संस्थया इङ्ग्लैण्डस्य महाराज्ञ्याः एलिजाबेथप्रथमायाः चार्टर अर्थात् स्वीकृतिपत्रं (इजाजतनामा) प्राप्तम् । तेन संस्थया पूर्वदिशि वाणिज्यस्य आरम्भं कर्तुम् एकाधिकारः प्राप्तः । एतस्य स्वीकृतिपत्रस्य अयम् अभिप्रायः आसीत् यत् इङ्ग्लैण्डस्य काचित् अन्या वाणिज्यिकसंस्था एतस्मिन् वाणिज्यिकक्षेत्रे ईस्ट-इण्डियासंस्थया सह न स्पर्धितुं शक्नोति स्म। एतस्य आज्ञापत्रस्य (चार्टर) साहाय्येन संस्था पारेसमुद्रं गत्वा वाणिज्याय नूतनकार्यक्षेत्राणि अन्वेष्टुं शक्नोति स्म, ततः च अल्पमूल्येन वस्तूनि क्रीत्वा तानि यूरोपीयदेशेषु अधिकमूल्येन विक्रेतुं शक्नोति स्म। वाणिज्यिकसंस्थायाः (व्यापारिक कम्पनी) अन्याभिः आङ्ग्लवाणिज्यिक-संस्थाभिः सह वाणिज्यिक-प्रतिस्पर्धायाः भयं न आसीत् । तस्मिन् काले वाणिज्यिकसंस्थाः सामान्येन प्रतिस्पर्धाम् अकृत्वा एव लाभांशं (मुनाफा) प्राप्तुं शक्नुवन्ति स्म। यदि कश्चित् ईस्ट-इण्डिया-संस्थायाः प्रतिस्पर्धी न भवेत् तर्हि एव संस्थाः न्यूनमूल्येन वस्तूनि क्रीत्वा तानि वस्तूनि अधिकमूल्येन विक्रेतुं शक्नुवन्ति स्म।

वाणिज्यिकम् - कश्चित् एतादृशः व्यवसायिकोद्यमः यस्मिन् वस्तूनि न्यूनमूल्येन क्रीत्वा अधिकमूल्येन च विक्रीय अर्थात् मुख्यरूपेण वाणिज्येन लाभांशः (मुनाफा) अर्ज्यते।

परन्तु एषः राजकीयाभिलेखः अन्ययूरोपीय-वाणिज्यिक-संस्थाः पूर्वदिशि विद्यमानेषु महाहट्टेषु आगमनात् न वारयितुं शक्नोति स्म । यावत्पर्यन्तम् इङ्लैण्डदेशीयाः जलपोताः अफ्रीकायाः पश्चिमतटं स्पृशन्तः केप-आफ-गुड-होपं परिभ्रम्य पारेहिन्दमहासागरं प्राप्ताः, तावत्पर्यन्तं पुर्तगालिनः भारतस्य पश्चिमतटे स्वीयम् उपस्थापनम् अकुर्वन्। ते गोवायां निजाश्रयस्थलीम् अकुर्वन्। पुर्तगालस्य अनुसन्धाता यात्री वास्को-दि-गामा एव अष्टनवत्यधिकचतुर्दशशततमे (1498) वर्षे प्रथमवारं भारतपर्यन्तं प्राप्तुम् एतं सामुद्रमार्गम् अन्वेष्टवान् आसीत्। सप्तदशशताब्दस्य आरम्भं यावत् डचवासिनः अपि हिन्दमहासागरस्य तट-वर्त्ति-स्थलेषु वाणिज्यस्य आरम्भं कर्तुं सम्भावनाः अन्वेष्टुम् आरब्धवन्तः । किञ्चित्कालानन्तरम् एव फ्रांसीसिवणिजः अपि प्रकाशपथम् आगतवन्तः।

समस्या इयम् आसीत् यत् सर्वाः वाणिज्यिकसंस्थाः सदृशानि एव वस्तूनि क्रेतुम् इच्छन्ति स्म इति । यूरोपीयमहाहट्टेषु भारतनिर्मितानां सूक्ष्म–कार्पासिक-वस्त्राणां कौशेयस्य च पर्याप्ताभियाच्ञा आसीत्। एतत् अतिरिच्य कृष्णमरीचिका-लवङ्ग-एला-त्वक्सारादीनाम् अपि अभियाञ्चा आधिक्येन आसीत् । यूरोपीयसंस्थासु जातप्रतिस्पर्धायाः कारणात् भारतीयविपणिषु एतेषां वस्तूनां मूल्यवृद्धेः आरम्भः जातः, तस्मात् कारणात् प्राप्यमाणः लाभांशः च क्रमशः न्यूनताम् अगच्छत्। अधुना एतासां वाणिज्यिकसंस्थानां वर्धनस्य विकासस्य च एकः एव मार्गः आसीत् यत् एताः संस्थाः स्वप्रतिस्पर्धि-संस्थाः नाशयेयुः इति । परिणामतः विपणीनाम् अधिग्रहणस्य स्पर्धावशात् वाणिज्यिकसंस्थासु परस्परं

युद्धानि आरब्धानि । सप्तदशाष्टदशशताब्दयोर्मध्ये या काऽपि संस्था प्राप्ते अवसरे अपरस्याः संस्थायाः समुद्रीयपोतं निमज्जयति स्म, मार्गेषु च बाधाः उत्पादयति स्म सामग्रीपूरितपोतान् च अग्रे गमनात् वारयति स्म । एतत् वाणिज्यम् अस्त्रशस्त्रबलेन प्रवर्तते स्म, तथा च व्यापारिकचतुष्पीठाः (व्यापारिक चौकियां) दुर्गेण सुरक्ष्यन्ते स्म ।

स्ववसतीः दुर्गावृत्ताः कर्तुं वाणिज्येन च लाभम् अर्जयितुं संस्थायाः इत्येतादृशानि कार्याणि दृष्ट्वा संस्थायाः स्थानीयशासकानां च मध्ये कलहस्य स्थितिः उत्पन्ना । अनेन प्रकारेण वाणिज्यस्य राजनीतेः च अन्योऽन्यस्मात् पृथक् स्थापनं संस्थायै(कम्पनी) कठिनतां जनयति स्म । आगच्छन्तु, पश्यामः, एतत् सर्वं कथम् अभवत् ?

ईस्ट-इण्डिया-संस्था बङ्गाले वाणिज्यम् आरभते ।

प्रथमम् आङ्ग्लीयम् उद्योगागारं (फैक्टरी) एकपञ्चाशदधिकषोडशशततमे (1651) वर्षे हुगलीनद्याः तटे आरब्धम् । संस्थायाः वणिजः अनेन एव स्वकार्याणि साधयन्ति स्म । एते वणिजः तस्मिन् काले "फैक्टर" इति उच्यन्ते स्म । एतेषाम् उद्योगागाराणाम् आभ्यन्तरे भाण्डागारम् (वेयरहाउस इति) आसीत् यत्र निर्याताय वस्तूनि सङ्गृह्यन्ते स्म । अत्रैव संस्थायाः कार्यालयाः आसन् येषु संस्थायाः अधिकारिणः तिष्ठन्ति स्म । कालक्रमेण यदा वाणिज्यं वर्धितं तदा संस्थया वणिजः क्रेतारः विक्रेतारः च उद्योगागाराणां समीपे एव वसितुं प्रेरिताः । षण्णवत्यधिक-एकोनविंशतिशततमे (1996) वर्षं यावत् संस्था जनवसतीः परितः एकस्य दुर्गस्य निर्माणम् आरब्धवती आसीत् । वर्षद्वयानन्तरं संस्था मुगलाधिकारिभ्यः उत्कोचं दत्त्वा ग्रामत्रयस्य स्वामित्वम् अपि प्राप्तवती । तस्मिन् ग्रामत्रये एकः ग्रामः "कालीकाता" इति आसीत् यः अनन्तरकाले कलकत्ता इति नाम्ना प्रख्यातः । वर्तमानकाले एषः कलकत्ता इति नाम्ना एव अभिधीयते । संस्था मुगलसम्राजम् औरङ्गजेबम् एतस्य प्रस्तावस्य विषये सहमतम् अकरोत् यत् सः संस्थायै अशुल्कं दत्त्वैव वाणिज्याय आदेशं (फरमान) दद्यात् इति ।

फरमान – कश्चित् राजकीयादेशः

संस्था अधिकाधिकजनपदान् अधिग्रहीतुं पूर्वतः च एव वर्तमानानाम् अनेकेषाम् अधिकाराणां माध्यमेन आधिक्येन लाभग्रहणे संलग्ना आसीत् । उदाहरणार्थम् औरङ्गजेबस्य आदेशानुसारं (फरमान) केवलं संस्थायाः पार्श्वे एव मुक्तवाणिज्यं कर्तुम् अधिकारः आसीत् । संस्थायाः ये अधिकारिणः व्यक्तिगतरूपेण वाणिज्यं कुर्वन्ति स्म, तेभ्यः एतादृशी स्वतन्त्रता नासीत् । परन्तु तादृशैः वणिग्भिः अपि शुल्कम् अर्पयितुं निराकृतम् । एतस्मात् कारणात् बङ्गाले राजस्वग्रहणं न्यूनम् अभवत् । अतः पुनः एतस्यां स्थितौ बङ्गालस्य शासकः मुर्शिदकुलीखानः विरोधं कस्मात् न कुर्यात्? अर्थात् निश्चयेन करिष्यति एव ।

तृतीयं चित्रम् – मद्रासस्य जलपोतैः सामग्रीम् आनयन्त्यः स्थानीयनौकाः, विलियम-सिम्पसनद्वारा निर्मितं चित्रम्, सप्तषष्ट्यधिकाष्टादशशत-तमवर्षम् (1867) ।

चित्रम् 4 – राबर्टक्लाइबः ।

(काष्ठपुत्तलिका) कठपुतली – एतत् किञ्चित् क्रीडनकं भवति यत् अस्माभिः सूत्रबलेन स्वेच्छया नर्त्यते । यः कोऽपि जनः कस्यचित् अन्यस्य सङ्केतैः व्यवहरति तादृशं जनम् उपहसितुं प्रायः अन्ये जनाः तं "काष्ठपुत्तलिकारूपं वदन्ति अथवा अन्यैः जनैः तस्मै "काष्ठपुत्तलिका" इति पदस्य प्रयोगः क्रियते ।

किं भवन्तः जानन्ति स्म ?

किं भवन्तः जानन्ति स्म यत् प्लासी इति नामकरणं कस्मात् कारणात् अभवत् ? वस्तुतः एतस्य स्थानस्य वास्तविकं नाम "पलाशी" इति आसीत् परन्तु आङ्ग्लीयाः तत्र विकृतिम् उत्पाद्य प्लासी इति कृतवन्तः । पलाशपुष्पाणां बाहुल्यात् एतस्य स्थानस्य नाम पलाशी इति आसीत् । पलाशस्य मनोहरैः रक्तपुष्पैः च गुल्लालः निर्मीयते होलिकोत्सवे च तस्य प्रयोगः भवति ।

वाणिज्यतः युद्धानि यावत्

अष्टादशशताब्दस्य आरम्भे संस्थायाः बङ्गालशासकानां च मध्ये पारस्परिककलहः आधिक्येन अवर्धत । औरङ्गजेबस्य मृत्योः पश्चात् बङ्गालस्य शासकाः स्वीयशक्तिं प्रदर्शयितुम् आरब्धवन्तः । तस्मिन् काले अन्यक्षेत्रीयशक्तीनां स्थितिः अपि तादृशी एव आसीत् । मुर्शिदकुलीखानात् पश्चात् अलीबर्दीखानः तदनन्तरं च सिराजुद्दौलाः बङ्गालस्य शासकः जातः । एते सर्वे शक्तिशालि-शासकाः आसन् । ते संस्थायै राज्यानि (रियासतें) दातुं निराकृतवन्तः । शक्तिसम्पन्नशासकैः वाणिज्यिकाधिकारस्य प्रतिदाने संस्थातः उपहार-रूप-वस्तूनि (नजराना) याचितानि । शासकैः संस्थायै मुद्रानिर्माणस्य अधिकारः न दत्तः, तथा च संस्थायाः दुर्गनिर्माण-कार्यक्रमे अपि प्रतिबन्धः स्थापितः । संस्था अस्मान् शासकान् वञ्चयति इति एतादृशैः आरोपैः संस्थाम् आरोपयन्तः शासकाः इदं तर्कम् उपस्थापितवन्तः, यत् संस्थायाः कारणात् बङ्गालसर्वकारस्य राजस्वं न्यूनं जायते, तथा च शासकानां शक्तिः क्षीयमाणा अस्ति इति । संस्था राजस्वम् प्रत्यर्पयितुं सन्नद्धा न आसीत्, तस्याः ईस्ट-इण्डिया-संस्थायाः (कम्पनी) अधिकारिभिः शासकेभ्यः अपमानजनकपत्राणि लिखितानि तैः पत्रैः च संस्थाधिकारिणः तान् शासकान् तेषां शासकानां च अधिकारिजनान् अपि अपमानयितुं प्रयत्नवन्तः ।

संस्थायाः अभिमतम् आसीत् यत् स्थानीयाधिकारिणाम् अतार्किकाभिः अभ्यर्थनाभिः संस्थायाः वाणिज्यस्य क्षतिः भवति इति । संस्थायाः चिन्तनम् आसीत् यत् वाणिज्यं तदा वर्धितुं शक्नोति यदा सर्वकारः शुल्कम् अपाकुर्यात् । संस्थायाः एतस्मिन् तथ्ये विश्वासः आसीत् यत् स्वीयं वाणिज्यं वर्धयितुं संस्थया स्वीयः जनशक्तिः अपि वर्धनीया भविष्यति इति । ग्रामाः क्रेतव्याः भविष्यन्ति दुर्गाणां च पुनर्निर्माणं कारणीयं भविष्यति । एतादृशाः पारस्परिककलहाः अनुदिनं गभीररूपेण प्रवर्तमानाः आसन्, अन्ततः एतेषां पारस्परिकविघट्टनानां (टकराव) परिणतिः प्लास्याः प्रसिद्धयुद्धरूपेण अभवत् ।

प्लास्याः युद्धम्

षट्पञ्चाशदधिकसप्तदशशततमे (1756) वर्षे अलीवर्दीखानस्य मृत्योः पश्चात् सिराजुद्दौलाः बङ्गालस्य शासकः जातः । संस्था सिराजुद्दौला इति नामधेयस्य शक्तेः अतीव भयभीता आसीत् । सिराजुद्दौला-स्थाने संस्था तादृशं "काष्ठपुत्तलिकारूपं" (कठपुतली) शासकम् इच्छति स्म यः संस्थायै वाणिज्यिक-राज्यानि अन्यसुविधाः च सारल्येन दद्यात्, एतादृशेषु विषयेषु च असहमतिं न प्रकटयेत् । संस्था प्रयासम् अकरोत् यत् सिराजुद्दौलः प्रतिद्वन्द्विषु शासकत्वेन कस्यचित् नियुक्तिः भवेत् इति परन्तु संस्था एतस्मिन् कर्मणि साफल्यं न अवाप्नोत् । संस्थायाः एतादृशं व्यवहारं दृष्ट्वा प्रतिक्रियां कुर्वन् सिराजुद्दौलाः आदिशत् यत् संस्था तस्य राज्यस्य राजनैतिकविषयेषु हस्तक्षेपं न कुर्यात्, दुर्गनिर्माणप्रक्रियां स्थगयेत् नियमानुसारं राजस्वं च अर्पयेत् । यदा द्वौ पक्षौ परस्परम् अन्योऽन्येषां प्रतिभूतीः न स्वीकृतवन्तौ तदा शासकेन सिराजुद्दौलवर्येण स्वीयैः त्रिंशत्-सहस्रं (30,000) सैनिकैः सह कासिम-महाहट्ट-स्थिते आङ्ग्लोद्योगागारे (अंग्रेजी फैक्ट्री) आक्रमणं कृतम् । शासकस्य सिराजुद्दौला-सैनिकैः

चित्रम् 5 – महान्यायालयकक्षः, ईस्ट-इण्डिया-हाउस, लेडनहाल – स्ट्रीट इति ।

ईस्ट-इण्डिया-संस्थायाः कोर्ट-आफ –प्रापराइटर्स इत्यस्य लन्दनस्थिते लेडनहालस्ट्रीट इत्यस्मिन् निर्मिते ईस्ट-इण्डिया – हाउस इत्यस्मिन् भवने उपवेशनानि भवन्ति स्म । एतादृश्याः एव कस्याश्चित् सभायाः एतत् चित्रम् अस्ति ।

संस्थायाः अधिकारिणः निगडिताः, वस्तुभाण्डागारे च तालकं स्थापितम्, आङ्ग्लीयानाम् अस्त्राणि परिहृतानि, आङ्ग्लजलपोताः च अपि अधिगृहीताः । तदनन्तरं शासकः सिराजुद्दौलाः संस्थायाः कलकत्तास्थिते दुर्गे आक्रमणं करिष्यामि इति धिया कोलकात्तां प्रति प्रस्थितवान् ।

कलकत्तानगरम् अपि अस्माकम् अधिकारक्षेत्रात् बहिर्भूतं भविष्यति इति सूचनायां श्रुतायां मद्रासे नियुक्ताः संस्थाधिकारिणः अपि राबर्टक्लाइवस्य नेतृत्वे स्वकीयां सेनां तत्र प्रेषितवन्तः । इयं सेना नौसैनिकयुद्धपोतस्य साहाय्यम् अपि प्राप्नोति स्म । तदनन्तरं शासकेन सह रणाङ्गणे चिरकालं यावत् वणिग्वृत्तिः (सौदेबाजी) प्राचलत् । अन्ततो गत्वा सप्तपञ्चाशदधिकसप्तदशशततमे (1757) वर्षे राबर्टक्लाइवः प्लास्याः क्रीडाक्षेत्रे सिराजुद्दौलावर्यं विरुध्य संस्था-सेनायाः नेतृत्वम् अकरोत् । शासकस्य सिराजुद्दौलावर्यस्य पराजयस्य किमपि महत्कारणं तस्य सेनापतिषु कस्यचित् एकस्य सेनापतेः मीरजाफरस्य आङ्ग्लीयान् प्रति सहृदयतापूर्णः व्यवहारः आसीत् । मीरजाफरनिर्देशितैः सैन्यदलैः युद्धे भागः न गृहीतः । राबर्टक्लाइबः सिराजुद्दौलावर्यं शासकपदात् निष्कास्य तं मीरजाफरम् इदम् उक्त्वा स्वपक्षे अनयत् सः तस्मै (मीरजाफराय) शासकपदं दास्यति ।

स्रोतः -1

संपन्नतायाः आश्वासनम्

इङ्लैण्डजनाः ईस्ट-इण्डिया-संस्थायाः शासकीय-महत्त्वकाङ्काक्षाः सन्देहेन अविश्वासपूर्णभावेन च पश्यन्ति स्म । प्लासीयुद्धात् पश्चात् राबर्टक्लाइवः आङ्ग्लसम्राजः कस्मैचित् मुख्यविदेशमन्त्रिणे विलियमपिटाय जनवरीमासस्य एकोनषष्ट्यधिकसप्तदशशततमे (1759) वर्षे कलकत्तानगरतः इदं पत्रं प्रेषितवान् –

> परन्तु एतावती विशालसत्ता कस्याश्चित् वाणिज्यिकसंस्थायाः कृते महती उपलब्धिः स्यात् – अहं स्वयम् इदं विचिन्त्य हर्षातिरेकेन अभिभूतः अस्मि--- एतानि समृद्धराज्यानि अधिग्रहीतुं कापि समस्या न भविष्यति । --- अधुना एतद्विषयकं निर्णयं भवदाधीनं करोमि यत् किं विंशतिलक्ष-वैदेशिकमुद्राणां (स्टर्लिन) वार्षिकायः प्रान्तत्रयस्य च अधिग्रहणं – कश्चित् एतादृशः विषयः अस्ति यस्मिन् एतावान् कोलाहलः उचितः स्यात् इति --- ।

शासकोक्ताः आक्षेपाः

त्रयस्त्रिंशदधिकसप्तदशशततमे (1733) वर्षे बङ्गालस्य शासकेन आङ्ग्लवणिजां विषये इदम् उक्तम् आसीत् –

यदा ते वणिजः प्रथमवारम् अस्माकं देशम् आगच्छन् तदा ते सर्वकारस्य पुरतः विनयपुरस्सरम् अवदन् यत् तेभ्यः कस्यश्चित् एकस्य उद्योगागारस्य स्थापनाय अत्यल्पभूमिः दातव्या इति। अस्माभिः तेभ्यः भूमिः तु दत्ता परन्तु ते तत्र सुदृढदुर्गं निर्मापितवन्तः। दुर्गं परितः गहनपरिखाः निर्मापिताः याः नदीं यावत् प्रसृत्ताः आसन्। न जाने ते भित्तिषु कियन्ति आग्नेयास्त्राणि स्थापितवन्तः। ते अनेकान् वणिजः जनान् च स्वायत्तीकृतवन्तः, लक्षाधिकरूप्यकाणि राजस्वरूपेण गृह्णन्ति – ते असङ्ख्यकान् पुरुषान् महिलाः च तेषाम् एव देशे क्रीतदासवत् लुण्ठन्ति।

प्लास्याः युद्धम् एतस्मात् कारणात् महत्त्वपूर्णं मन्यते यतो हि अस्मिन् युद्धे भारते ईस्ट-इण्डिया-संस्थायाः एषः प्रथमजयः आसीत्। प्लास्याः युद्धात् पश्चात् सिराजुद्दौलाः मारितः मीरजाफरः च शासकरूपेण स्थापितः। संस्था अधुना अपि शासनस्य दायित्वं सम्भालयितुं सज्जा न आसीत्। तस्याः मूलोद्देश्यं तु वाणिज्यस्य विस्तारः आसीत्। यदि एतत् कार्यं स्थानीयशासकानां साहाय्येन युद्धं विना एव सिद्धयेत् तर्हि एतदर्थं साक्षात् राज्यम् अधिग्रहीतुं का आवश्यकता ? इति चिन्तनं संस्थायाः आसीत्।

शीघ्रमेव ईस्ट-इण्डिया-संस्था अनुभूतवती यत् अयम् उपायः अपि सरलः नास्ति। "काष्ठपुत्तलिकारूपशासकाः" (कठपुतली) अपि सदा एव संस्थायाः निर्देशानुसारं न व्यवहरन्ति स्म। वस्तुतः तैः अपि स्वप्रजायाः दृष्टौ सम्मानस्य संप्रभुतायाः च प्रदर्शनं करणीयं भवति स्म।

पुनः एतस्याम् अवस्थायां संस्था किं कुर्यात् ? यदा मीरजाफरेण संस्थायाः विरोधः कृतः, तदा संस्था तम् अपाकृत्य तस्य स्थाने मीरकासिमं शासकपदे नियुक्तवती। यदा मीरकासिमः संस्थां बाधितुम् आरब्धवान् तदा बक्सरयुद्धे सप्तषष्ट्यधिकसप्तदशशततमे (1763) वर्षे सः अपि संस्थया पराजितः। संस्थया सः बङ्गालतः बहिष्कृतः मीरजाफरः च पुनः शासकरूपेण घोषितः। अधुना संस्थया शासकाय प्रतिमासं पञ्चलक्षं रूप्यकाणि दातव्यानि भवन्ति स्म। संस्था स्वसैनिकव्ययार्थं वाणिज्यिकावश्यकताभ्यः अन्यबहुविधव्ययान् च निर्वोढुम् इतोऽपि अधिकधनम् इच्छति स्म। संस्था आधिक्येन क्षेत्राणि धनार्जनं च इच्छति स्म। पञ्चषष्ट्यधिकसप्तदशशततमे (1765) वर्षे मीरजाफरः दिवङ्गतः तस्मिन् काले संस्थायाः विचारधारा सर्वथा परिवर्तिता आसीत्। काष्ठपुत्तलिकारूपशासकैः सह स्वस्य अप्रियानुभवान् पश्यन् क्लाइवः अघोषयत् यत् अधुना अस्माभिः स्वयमेव शासकपदे भवितव्यं भविष्यति इति।

अन्ततः पञ्चषष्ट्यधिकसप्तदशशततमे (1765) वर्षे मुगलसम्राजा ईस्ट-इण्डिया-संस्था एव बङ्गालप्रान्तस्य प्रान्ताधिपतित्वेन (दीवान) नियुक्ता। अधिकारप्राप्तेः पश्चात् संस्था बङ्गालस्य विशालराजस्वसंसाधनानाम् उपरि नियन्त्रणाधिकारं प्राप्नोत्। अनेन प्रकारेण संस्थायाः काचित् पुरातनसमस्या समाहिता। अष्टादशशताब्दस्य आरम्भात् एव भारतेन सह संस्थायाः वाणिज्यं निरन्तरं वर्धते स्म। परन्तु संस्थया भारते अधिकवस्तूनि ब्रिटेनतः आनीतस्य सुवर्णस्य प्रतिदानेन क्रेतव्यानि भवन्ति स्म। यतो हि ब्रिटेनस्य समीपे भारते विक्रेतुं किम् अपि वस्तु न आसीत्। प्लासीयुद्धात् पश्चात् ब्रिटेनतः आगम्यमानस्य सुवर्णस्य मात्रा न्यूना जाता तथा च बङ्गालस्य आधिग्रहणस्य पश्चात् तु ब्रिटेनतः सुवर्णानयनस्य आवश्यकता एव न आसीत्। अधुना भारते जायमानेन धनार्जनेन एव संस्था स्वव्ययनिमित्तकं धनम् अर्जयितुं शक्नोति स्म। अनेन धनार्जनेन संस्था भारते कार्पासकौशेयपटं क्रेतुं, स्वसैन्यव्ययनिमित्तकं धनं च प्राप्तुं शक्नोति स्म तथा च दुर्गाणां कार्यालयानां च निर्माणार्थं जायमानं व्ययभारं सोढुं शक्नोति स्म।

संस्थाधिकारिणः "शासकाः" (नबाव) जाताः

शासकः इति पदेन कः अभिप्रायः आसीत् ? एतस्य कश्चित् अभिप्रायः तु अयम् आसीत् यत् अधुना संस्था सत्ताशक्तिसम्पन्ना आसीत् इति। परन्तु शासनस्य केचन अन्ये लाभाः अपि आसन्। अधुना संस्थायाः प्रत्येकं कर्मकरः शासकवत् जीवितुं तथाविधान् च स्वप्नान् द्रष्टुम् आरब्धवान्।

प्लास्याः युद्धात् पश्चात् बङ्गालस्य वास्तविकशासकाः एतत् तथ्यं स्वीकर्तुं बाध्याः कृताः यत् ते संस्थायाः अधिकारिभ्यः व्यक्तिगतरूपेण उपहाररूपभूमिं बहुधनं च दद्युः इति । स्वयं राबर्टक्लाइबेन एव भारते अपरिमितसम्पत्तिः संगृहीता । त्रिचत्वारिंशदधिकसप्तदशशततमे (1741) वर्षे यदा सः इङ्ग्लैण्डदेशतः मद्रासं (वर्तमान-चैन्नैमहानगरम्) आगतवान् तदा सः अष्टादशवर्षीयः (18) आसीत् । सः अत्र भारते वारद्वयं राज्यपालपदे नियुक्तः, यदा सप्तषष्ट्यधिकसप्तदशशततमे (1767) वर्षे सः राज्यपालपदात् सेवानिवृत्तः भूत्वा सर्वकालाय भारतात् इङ्ग्लैण्डं प्रति प्रस्थितवान् तदा तत्र तस्य सम्पत्तिः एकाधिकचतुश्शतं, द्व्यधिकैकशतं (401,102) पौण्ड इति आसीत् । रोचकं तथ्यम् इदम् अस्ति यत् राज्यपालस्य स्वस्य द्वितीयस्मिन् कार्यकाले तस्मै संस्थाभ्यन्तरे व्याप्तस्य भ्रष्टाचारस्य समाप्तेः कार्यम् अर्पितम् आसीत् । परन्तु द्विसप्तत्यधिकसप्तदशशततमे (1772) वर्षे क्लाईबस्य उपरि एव ब्रिटिशसंसदा भ्रष्टाचारारोपणानि आरोपितानि, सः आत्मनः उपरि आरोपितानां भ्रष्टाचारारोपणानां विषये ब्रिटिशसंसदि स्पष्टीकरणं दातुं बाध्यः जातः । क्लाईबस्य अपरिमितसम्पत्तेः अर्जनस्रोतांसि अवैधरूपाणि सन्ति इति कारणात् सर्वकारः तं सन्देहदृष्ट्या पश्यति स्म । पुनः सर्वकारेण भ्रष्टाचारारोपेभ्यः तु क्लाईबः मोचितः, परन्तु चतुःसप्तत्यधिकसप्तदशशततमे (1778) वर्षे सः आत्महत्याम् अकरोत् ।

संस्थायाः सर्वे अधिकारिणः क्लाइवः इव सम्पत्तेः एकत्रीकरणं न कर्तुं शक्तवन्तः । अनेके संस्थाधिकारिणः विविधरोगैः युद्धे च अल्पवयसि एव मृतवन्तः । एतत् अतिरिच्य ते सर्वे एव अधिकारिणः भ्रष्टाचारिणः असत्यनिष्ठाः च आसन् इति एतादृशं चिन्तनम् अपि अनुचितं स्यात् । तेषु संस्थाधिकारिषु अनेके अधिकारिणः साधारणकुटुम्बेभ्यः आसन् । एतादृशानाम् अधिकारिणां हार्दिकी इच्छा इयम् एव आसीत् यत् ते भारते समीचीनतया प्रभूतं धनम् अर्जयेयुः, तथा च ब्रिटेनं प्रति गत्वा सानन्दं जीवनं यापयेयुः इति । ये अधिकारिणः सकुशलं धनानि नीत्वा स्वदेशं प्रति गतवन्तः ते तत्र विलासितापूर्णं जीवनं यापितवन्तः । तान् अधिकारिणः तत्रत्याः जनाः "नबाव" इति शब्देन सम्बोधयन्ति स्म । इङ्ग्लैण्डे प्रयुज्यमानः "नबाव"- शब्दः भारतीय-नवाब शब्दस्य एव आङ्ग्लरूपं प्राप्तवान् । तत्रत्याः जनाः प्रायः उपर्युक्तानाम् एतादृशानां जनानां गणनां नूतनधनाढ्येषु कुर्वन्ति स्म तथा च सामाजिकदृष्ट्या एते अल्पावधौ एव धनाढ्याः जाताः इति रूपेण तान् जनाः पश्यन्ति स्म । अन्यजनैः एतादृशानां धनाढ्यानां नाटक- व्यङ्ग्यचित्रादिमाध्यमेन उपहासः क्रियते स्म ।

संस्थायाः वर्धमानं शासनम्

यदि वयं चतुःषष्ट्यसप्तदशशत - तमवर्षात् (1767) आरभ्य सप्तपञ्चाशदधिकाष्टादशशत- तमवर्षाभ्यन्तरे (1857) ईस्ट-इण्डिया-संस्थाद्वारा भारतीयराज्यानाम् अधिग्रहणस्य प्रक्रियां पश्येम तर्हि कानिचन महत्त्वपूर्णतथ्यानि पुरतः आयान्ति । कस्मिंश्चित् अपि अपरिचितक्षेत्रे संस्था साक्षात् आक्रमणं प्रायः न अकरोत् । ईस्ट-इण्डिया-संस्था कस्य अपि भारतीयराज्यस्य अधिग्रहणात् पूर्वं विभिन्नराजनैतिकानाम् आर्थिकानां कूटनीतिकसाधनानां च प्रयोगम् अकरोत् ।

चतुःषष्ट्यधिकसप्तदशशत-तमवर्षस्य (1764) बक्सर-युद्धात् पश्चात् संस्था भारतीयराज्येषु आवासीयाधिकारिणः (रेजिडेन्ट् इति) नियोजितवती । एते अधिकारिणः संस्थायाः राजनैतिकाः वाणिज्यिकाः च प्रतिनिधयः भवन्ति स्म । तेषाम् आवासीयाधिकारिणां (रेजिडेन्ट्) कार्यं संस्थायाः हितरक्षणं वर्धापनं च आसीत् । रेजिडेन्टमाध्यमेन संस्थायाः अधिकारिणः भारतीयराज्यस्य आन्तरिकप्रकरणेषु

क्लाइवः आत्मानं कथं पश्यति स्म ?

क्लाइवः संसदः एकस्याः समितेः पुरतः चर्चाकाले उक्तवान् आसीत् यत् प्लास्याः युद्धात् पश्चात् सः बहुसंयमम् आचरितवान् । आगच्छन्तु, पश्यामः सः किम् अवदत् –

तदानीन्तनीं स्थितिं मनसि कल्पयन्तु, यदा अहं प्लासीजयस्य समीपे आसम्! तदा कश्चित् बलवान् राजा मम पराधीनतायाम् आसीत्, एकं सम्पन्ननगरं मम दयाश्रितम् आसीत् । तस्य नगरस्य सर्वे धनाढ्याः महाजनाः च मम मोदाय प्रयतन्ते स्म । अन्योऽन्यं च एतस्मै कार्याय प्रेरयन्ति स्म । अहं तादृशे भाण्डागारे भ्रमामि स्म यत् केवलं मम कृते उद्घटितः आसीत् तस्मिन् भाण्डागारे च एकस्मिन् पक्षे सुवर्णम् आसीत् अपरस्मिन् पक्षे च बहुमूल्यमणयः आसन्! अध्यक्षमहोदय! अहं तदानीन्तने काले आत्मनः संयमावस्थां दृष्ट्वा स्वयम् आश्चर्यान्वितः अस्मि ।

➢ गतिविधिः

कल्पयतु भवान् संस्थायाः युवाधिकारी अस्ति तथा च केभ्यश्चित् दिनेभ्यः भारतम् आगतवान् अस्ति । अधुना इङ्ग्लैण्डदेशस्थायै स्वमात्रे पत्रं विलिख्य अत्रत्यस्य स्वीय-विलासिता-पूर्णजीवनस्य विषये ज्ञापयतु तथा च स्वब्रिटेनस्थजीवनेन सह वर्तमानजीवनस्य तुलनां करोतु ।

चित्रम् 6 – स्वपुत्रैः ब्रिटिश-रेजिडेन्टाधिकारिभिः च सह स्थितः शासकः शुजाउद्दौलाः, टिलीकैटलद्वारा रचितं चित्रम् (तैलः, द्विसप्तत्यधिकसप्तदशशततमवर्षम् (1772) । बक्सरयुद्धात् परं जातानां सन्धीनां परिणामतः शासकशुजाउद्दौलः अधिकांशाधिकाराः परिहृताः आसन्, परन्तु अत्र सः ब्रिटिश-रेजिडेन्टाधिकारिणः समक्षे स्वचिरपरिचितया राजसीमुद्रया दृश्यते।

निषेधाज्ञा - निर्देशः ।

अधीनस्थता – दैन्यम् / नम्रीभावः ।

अपि हस्तक्षेपं कर्तुम् आरब्धवन्तः आसन् । अग्रिमः शासकः कः भविष्यति ? कस्मिन् पदे कः उपवेक्ष्यति ? इति एतादृशान् विषयान् अपि संस्थाधिकारिणः एव निश्चेतुम् इच्छन्ति स्म । बहुधा संस्थया राज्येषु "सहायकसन्धिः" अपि बलात् आरोपितः । यानि राज्यानि एतादृशीं प्रबन्धनव्यवस्थाम् अङ्गीकुर्वन्ति स्म तादृशेभ्यः राज्येभ्यः स्वतन्त्रसेनास्थापनस्य अधिकारः न दीयते स्म । संस्थापक्षतः तेभ्यः सुरक्षाव्यवस्था दीयते स्म । तथा च "सहायकसेनायाः" संरक्षणाय स्थापनाय च संस्थायै राज्यानि धनं यच्छन्ति स्म । यदि भारतीयशासकाः धनस्य प्रत्यर्पणं कदाचित् न कर्तुं पारयन्ति स्म तदा दण्डस्वरूपं संस्था तत् तत्क्षेत्रम् अथवा राज्यं स्वाधिकृतं करोति स्म । उदाहरणार्थं यदा रिचर्ड-वेलेज्ली-गवर्नर-जनरलपदे अष्टनवत्यधिकसप्तदशशततमवर्षात् आरभ्य पञ्चाधिकाष्टादशशततमवर्षावधौ (1798-1805) आसीनः आसीत्, तदा अवधस्य शासकः स्वस्य अर्धक्षेत्रं संस्थायै अर्पयितुम् ईस्ट-इण्डिया-संस्थया बाध्यः कृतः यतोहि शासकः सहायकसेनायै धनं दातुं न शक्तवान् आसीत् । अनेन एव प्रकारेण संस्थया हैदराबादस्य अपि अनेकक्षेत्राणि परिहृतानि ।

स्रोतः - 4

आवासीयकार्यकर्तुः (रेजिडेन्ट इत्यस्य) कीदृशं सामर्थ्यं भवति स्म ?

स्काटलैण्डस्य प्रसिद्धः अर्थशास्त्री राजनैतिकः दार्शनिकः च जेम्समिलः संस्थाद्वारा नियुक्तस्य रेजिडेन्ट्स इत्यस्य विषये इदम् उक्तवान् –

वस्तुतः आवासीयाधिकारी (रेजिडेन्ट) राज्यस्य राजा भवति । वयं तस्मै अप्रतिरोधस्य स्वेच्छापूर्वकनिषेधाज्ञायाः च अन्तर्गतं कार्यं कर्तुं स्वातन्त्र्यं प्रयच्छामः । यावत्पर्यन्तं स्थानीयराजा सम्पूर्णतया अधीनस्थः भवति तथा च रेजिडेन्ट इति नामधेयस्य (आवासीयाधिकारी) अधिकारिणः अनुसारम् अथवा ब्रिटिशसर्वकारस्य अनुसारम् अनुकूलं च कार्यं करोति तावत्पर्यन्तं सर्वा व्यवस्था समीचीना आसीत् । शासनकार्येषु आवासीयाधिकारिणः (रेजिडेन्ट इत्यस्य) प्रतिरोधं विना एव सर्वं समीचीनतया चलति--- यदा पृथक्-तया किमपि आपतितं भवति, तथा च यदा राजा पृथक् मार्गम् आश्रयति तदा ब्रिटिशसर्वकारः तस्य नृपस्य तादृशम् आचरणम् अनुचितम् इति मन्यते तथा च तस्मिन् काले परस्परं विघटनं विरोधः विवादः च जायते ।

जेम्स-मिलः(१८३२)

टीपूसुल्तानः – "शेर-ए-मैसूर" इति

यदा ईस्ट-इण्डिया-संस्था स्वीय-राजनैतिकानाम् आर्थिकानां च हितानां ह्रास-रूपां विभीषिकाम् अपश्यत् तदा संस्थया प्रत्यक्षसैन्याक्रमणस्य मार्गः अपि अङ्गीकृतः । दक्षिणभारतीय-राज्यस्य मैसूरस्य उदाहरणेन इदं तथ्यम् अवगन्तुं शक्नुमः ।

चित्रम् 7 - टीपूसुल्तानः

हैदरालिनः (शासनकालः एकषष्ट्यधिकसप्तदशशत-तमवर्षात् (1761) द्व्यशीत्यधिकसप्तदशशत-तमवर्षं (1782) यावत् आसीत्) तस्य च विख्यातपुत्रस्य टीपूसुल्तानस्य शक्तिशालिशासकस्य (द्व्यशीत्यधिकसप्तदशशत-तमवर्षतः (1782 – 1799) नवनवत्यधिकसप्तदशशततमवर्षं यावत्) - नेतृत्वे मैसूरराज्यम् अतीव शक्तिसम्पन्नम् अभवत् । मालाबारतटे जायमानं वाणिज्यं मैसूरराज्यस्य नियन्त्रणे आसीत् यतः ईस्ट-इण्डिया-संस्था कृष्णमरीचिकाम् एलां च क्रीणाति स्म । पञ्चाशीत्यधिकसप्तदशशततमे

चित्रम् - 8 – टीपूसुल्तानस्य पुत्रौ बन्धकरूपेण कार्नवालिसस्य पुरतः प्रस्तूयेते । डेनियलार्मद्वारा चित्रितं चित्रम् एतत्,१७९३ ।

हैदराली टीपूसुल्तानः च ईस्ट-इण्डिया-संस्थायाः सेनाम् अनेकधा युद्धे पराजितवन्तौ आस्ताम् । परन्तु द्विनवत्यधिकसप्तदशशततमे वर्षे (1792) मराठिनां हैदराबादनिजामस्य ईस्ट-इण्डिया-संस्थायाः च संयुक्तसैन्याक्रमणात् पश्चात् टीपूसुल्तानः आङ्ग्लीयैः सह सन्धिं कर्तुं बाध्यः जातः । एतस्य कृतसन्धेः अन्तर्गतं तस्य द्वौ पुत्रौ आङ्ग्लीयैः बन्धकरूपेण स्वपार्श्वे स्थापितौ । ब्रिटिशचित्रकाराः एतादृशानि दृश्यानि सानन्दं चित्रयन्ति स्म यैः चित्रैः आङ्ग्लसत्तायाः विजयः दर्श्यते स्म ।

वर्षे (1785) टीपूसुल्तानः स्वराज्ये विद्यमान-पोतस्थानकैः अथवा पत्तनैः जायमाने चन्दनकाष्ठस्य कृष्णमरीचिकायाः एलायाः च निर्याते प्रतिबन्धं स्थापितवान् । टीपूसुलतानेन स्थानीयवणिजः अपि ईस्ट-इण्डिया-संस्थया सह वाणिज्यं कर्तुं वारिताः आसन् । टीपूसुल्तानेन भारतवासिभिः फ्रांसीसिवणिग्भिः घनिष्ठसम्बन्धाः संवर्धापिताः स्थापिताः च, तेषां वणिजां साहाय्येन च तेन स्वसेनायाः आधुनिकीकरणम् अपि कृतम् ।

टीपूसुल्तानस्य एतादृशान् प्रयासान् दृष्ट्वा आङ्ग्लीयाः अतिकुपिताः सञ्जाताः । आङ्ग्लीयाः अनुभवन्ति स्म यत् टीपूसुल्तानः हैदराली च अतीव महत्त्वकाङ्क्षिणौ अभिमानिनौ भयङ्करौ च शासकौ स्तः इति । अतः एतादृशानां नृपाणां नियन्त्रणं तेषां दमनं पराभवं च आवश्यकम् अस्ति । परिणामतः मैसूरराज्येन सह आङ्ग्लीयानां वारचतुष्टयं युद्धम् अभवत् (एकोन सप्तषष्ट्यधिकसप्तदशशततमवर्षम् – एकोनसप्तत्यधिकसप्तदशशततमवर्षम्, (1767-1769), अशीत्यधिकसप्तदशशततमवर्षम् – चतुरशीत्यधिकसप्तदशशततमवर्षम् (1780-1784), नवत्यधिकसप्तदशशततमवर्षम् – द्विनवत्यधिकसप्तदशशततमवर्षम् (1790-1792), नवनवत्यधिकसप्तदशशततमवर्षम् (1799) । श्रीरङ्गपट्टमस्य अन्तिमयुद्धे ईस्ट-इण्डिया-संस्था(कम्पनी) साफल्यम् अवाप्नोत् । स्वीयां राजधानीं रक्षन् टीपूसुल्तानः दिवङ्गतः तदनन्तरं मैसूरस्य राजव्यवस्था पुरातन-वोडियार-राजवंशाय अर्पिता । अनेन सहैव मैसूरस्य उपरि अपि सहायकसन्धिः बलात् आरोपितः ।

चित्रम् -9 – टीपूसुल्तानस्य क्रीडनकं सिंहः ।
इदं टीपूसुल्तानस्य कस्यचित् विशालकायक्रीडनस्य चित्रम् अस्ति । एतस्मिन् चित्रे कश्चित् कृत्रिमसिंहः कञ्चित् यूरोपीयसैनिकम् आक्रम्य तिष्ठति । यदा एतस्य क्रीडनकस्य हस्तकलारूपम् उपकरणं परिभ्राम्यते स्म तदा कृत्रिमसिंहः गर्जति स्म अपि च सैनिकाभ्यन्तरात् अपि करुणक्रन्दनं श्रूयते स्म । अधुना एतत् क्रीडनकं लंदनस्थिते विक्टोरिया-एण्ड-एल्बर्ट-सङ्ग्रहालये स्थापितम् अस्ति । मै-मासस्य चतुर्थे दिनाङ्के नववत्यधिकसप्तदशशततमे (1799) वर्षे च यदा स्वराजधान्याः श्रीरङ्गपट्टमस्य रक्षां कुर्वन् टीपूसुल्तानः दिवङ्गतः तदा आङ्ग्लीयाः एतत् क्रीडनकम् अपि सहैव नीतवन्तः ।

टीपूसुल्तानस्य कथाः

नृपच्छविः प्रायः जनश्रुतिभिः इतोऽपि प्रभावशालिनी भवति । प्रचलितकथानकैः तस्य शक्तेः प्राचुर्येण यशोगानं क्रियते । द्व्यशीत्यधिकसप्तदशशततमे (1782) वर्षे मैसूरस्य राजपदालङ्कृतस्य टीपूसुल्तानस्य विषये उच्यते यत् एकदा सः स्वीयेन फ्रांसीयमित्रेण सह आखेटाय वनम् अगच्छत् । तत्र कश्चित् सिंहः तयोः पुरतः आगच्छत् । तयोः भुशुण्डी कार्ये सम्प्राप्ते निष्क्रिया जाता, असिः अपि भूमौ अपतत् । पुनरपि टीपूसुल्तानेन शस्त्ररहितेन एव सिंहेन सह युद्धं कृतम्, अन्ततः सः कथञ्चित् असिम् अपि उत्थापितवान् । अन्ते सः सिंहं हतवान् । एतस्याः घटनायाः पश्चात् एव तस्य ख्यातिः "शैर –ए-मैसूर इति नाम्ना जाता । तस्य राजपताकायाम् अपि सिंहस्य चित्रं चित्रितं भवति स्म ।

➢ गतिविधिः

कल्पयन्तु, भवन्तः श्रीरङ्गपट्मयुद्ध- युक्तं टीपूसुल्तानमृत्युविषयकं च पुरातनं वार्तापत्रद्वयं प्राप्नुवन्ति। एकं वार्त्तापत्रं ब्रिटेनतः प्रकाशितम् अस्ति, अपरं च मैसूरतः प्रकाशितम् अस्ति। एतयोः द्वयोः वार्त्तापत्रयोः कृते उपर्युक्तप्रकाशितघटनानां विषये पृथक् पृथक् शीर्षकं लिखन्तु।

कन्फेडरेसी – घटबन्धनम्

मराठासैनिकैः सह युद्धम्

अष्टादशशताब्दस्य अन्ते संस्था मराठाजनान् नियन्त्रयितुं तेषां च विनाशविषये चिन्तयितुम् आरभत। एकषष्ट्यधिकसप्तदशशततमे (1761) वर्षे पानीपतस्य तृतीययुद्धे पराजयात् पश्चात् देहलीतः देशस्य शासनं चालयिष्यामः इति मराठाजनानां स्वप्नः भग्नः जातः। ते अनेकराज्येषु विभक्ताः, एतेषां राज्यानां शासनं सिन्धिया-होलकर-गायकवाड-भोंसलेप्रभृतीनां पृथक् पृथक् राजवंशानाम् अधीने आसीत्। एते सर्वे सिन्धियादिप्रमुखाः (सरदार इति) सर्वोच्चमन्त्रिणः (पेशवा इत्यस्य) अन्तर्गताः राज्यमन्त्रिमण्डलीयाः सदस्याः (कन्फेडरेसी इति) आसन्। सर्वोच्चमन्त्री एतस्य राज्यमन्त्रिमण्डलस्य सैनिकः प्रशासकीयप्रमुखः च भवति स्म सः च पुणेमध्ये निवसति स्म। महाद्जीसिन्धिया नानाफडनीसः च अष्टादशशताब्दस्य अन्तिमौ द्वौ मराठायोद्धारौ राजनीतिज्ञौ च आस्ताम्।

क्रमिकयुद्धेषु ईस्ट-इण्डिया-संस्था मराठासैनिकान् पराजेतुं पराभवितुं च बाध्यान् अकरोत्। प्रथमयुद्धं द्व्यशीत्यधिकसप्तदशशततमे (1782) वर्षे सालबायी इति सन्धिना सह समाप्तं, यस्मिन् कोऽपि पक्षः न अजयत्। द्वितीयाङ्ग्लमराठायुद्धं (त्र्यधिकाष्टादशशततमवर्षतः (1803) - पञ्चाधिकाष्टादशशततमवर्षे (1805) इति वर्षे अनेकेषु खातेषु अथवा अयनेषु (मोर्चा इति) अभवत्। परिणामतः इदम् अभवत् यत् उडीसा यमुनायाः उत्तरभागे च स्थितम् आगरानगरं देहलीसहिताः अनेकभूभागाः च आङ्ग्लाधीनाः जाताः। अन्ततः सप्तदशाधिकाष्टादशशततमवर्षात् आरभ्य एकोनविंशत्यधिकाष्टादशशततमवर्षाभ्यन्त (1817-1819) जायमाने तृतीये आङ्ग्लमराठायुद्धे आङ्ग्लीयैः मराठासैन्यबलं सर्वथा भूमिसात् कृतम्। (सर्वोच्चमन्त्री) (पेशवा इति) पुणेतः अपाकृत्य कर्णपुरस्य समीपे बिठूरे सेवानिवृत्तिवेतने प्रेषितः। अधुना बिन्ध्यस्य दक्षिणे स्थिते सम्पूर्णे भूभागे ईस्ट-इण्डिया-संस्थायाः नियन्त्रणम् अभवत्।

सर्वोच्चतायाः अभिकथनम् (दावा)

उपर्युक्त-विवरणेन स्पष्टम् अस्ति यत् एकोनविंशशताब्दस्य आरम्भात् एव ईस्ट-इण्डिया-संस्था क्षेत्रीयविस्तारस्य आक्रामकनीतेः अनुसारं व्यवहरति स्म। लार्डहेस्टिंग्सः त्रयोदशाधिकाष्टादशशत-तमवर्षात् (1813) त्रयोविंशत्यधिकाष्टादशशततमवर्षं (1823) यावत् गवर्नरजनरलपदे आसीत्, तस्य नेतृत्वे "सर्वोच्चतायाः काचित् नूतना नीतिः ईस्ट-इण्डिया-संस्थया आरब्धा। ईस्ट-इण्डिया-संस्थायाः प्रतिज्ञा आसीत् यत् तस्याः सर्वोच्चसत्ता अस्ति, एतस्मात् कारणात् सा भारतीयराज्यानाम् अपेक्षया अधिकाधिकारसम्पन्ना अस्ति। ईस्ट-इण्डिया-संस्था स्वहितरक्षायै भारतीयराज्यानि अधिग्रहीतुं विभीषिकायाः अथवा भयदर्शनस्य (धमकी) च अधिकारः तस्याः समीपे अस्ति इति मन्यते स्म। एतादृशी अवधारणा अनन्तरकाले अपि आङ्ग्लनीतिषु दृश्यते।

चित्रम् – 10 - लार्डहेस्टिंग्सः।

परन्तु इयं प्रक्रिया अबाधगत्या न प्राचलत्। उदाहरणार्थं यदा आङ्ग्लीयाः कित्तूरस्य(वर्तमानकर्नाटकस्य) लघुराज्यम् अधिग्रहीतुं प्रयत्तवन्तः तदा तत्रत्यमहिष्या चेन्नम्मया सशस्त्रसङ्घर्षः आरब्धः, आङ्ग्लीयान् विरुध्य च सा आन्दोलनम् आरभत। सा चतुर्विंशत्यधिकाष्टादशशततमे (1824)वर्षे आङ्ग्लीयैः निगडिता तथा च एकोनत्रिंशदधिकाष्टादशशततमे (1829) वर्षे कारागारे एव तस्याः मृत्युः अभवत्। चेन्नम्मायाः मृत्योः पश्चात् कित्तूरस्थितसंगोल्याः केनचित् निर्धनप्रहरिणा रायन्नावर्येण एतत् आन्दोलनं

यथावत् स्थापितम् । सर्वतः सः समर्थनम् साहाय्यं च प्राप्नोति स्म, तस्मात् कारणात् सः बहूनि ब्रिटिशशिबिराणि अभिलेखान् च नाशितवान् । अन्ततः तम् अपि आङ्ग्लीयाः गृहीत्वा त्रिंशदधिकाष्टादशशततमे (1830) वर्षे मृत्युदण्डेन दण्डितवन्तः । विरोधस्य एतादृशानि बहूनि उदाहरणानि भवन्तः एतस्मिन् एव पुस्तके अग्रे पठिष्यन्ति ।

त्रिंशदधिकाष्टादशशततम-दशकस्य (1830) अन्ते ईस्ट-इण्डिया-संस्था रूसस्य प्रभावात् अतीव भयभीता आसीत् । ईस्ट-इण्डिया-संस्थायाः भयम् आसीत् यत् कदाचित् रूसस्य प्रभावः सम्पूर्ण-एशियायां प्रसर्य उत्तरपश्चिमक्षेत्रेभ्यः भारतम् अपि स्वाधिपत्ये न स्थापयेत् । एतस्मात् भयात् एव आङ्ग्लीयाः इदानीम् उत्तरपश्चिमभारतस्य उपरि अपि स्वाधिपत्यं स्थापयितुम् इच्छन्ति स्म । ते अष्टत्रिंशदधिकाष्टादशशत-तमवर्षं (1838) द्विचत्वारिंशदधिकाष्टादशशत-तमवर्षं (1842) चान्तरा अफगानिस्तानेन सह दीर्घकालीनं युद्धम् अयुद्ध्यन्त तथा च तत्र अप्रत्यक्षसंस्थाशासनं स्थापितवन्तः। आङ्ग्लीयैः त्रिचत्वारिंशदधिकाष्टादशशततमे (1843) वर्षे सिन्धप्रान्तः अपि अधिगृहीतः । ततः परं पञ्चनदस्य क्रमः आसीत् । अत्र महाराजेन रणजीतसिंहेन ईस्ट-इण्डिया-संस्थायै मनोभिलाषं पूरयितुम् अवसरः न दत्तः । एकोनचत्वारिंशदधिकाष्टादशशततमे (1839) वर्षे रणजीतसिंहस्य मृत्युः अभवत्, तस्य मृत्योः पश्चात् पञ्चनद-राज्येन (रियासत) सह चिरकालं यावत् युद्धद्वयम् अभवत् अन्ततः एकोनपञ्चाशदधिकाष्टादशशततमे (1849) वर्षे आङ्ग्लीयैः पञ्चनदराज्यम् अपि अधिगृहीतम् ।



चित्रम्-11 महाराजस्य रणजितसिंहस्य राजसभा

विलयनीतिः

अधिग्रहणस्य अन्तिमक्रान्तिरूप-लहरी (1848) षट्पञ्चाशदधिकाष्टादशशत-तमवर्षाभ्यन्तरे (1856) नियुक्तराष्ट्राध्यक्षस्य (गवर्नर-जनरल) लार्डडलहौजीवर्यस्य शासनकाले प्राचलत् । लार्डडलहौजी एकां नूतनां नीतिम् अङ्गीकृतवान् यस्यै सः विलयनीतिः इति नाम अददात् । एतस्याः नीतेः सिद्धान्तः अयम् आसीत् यत् यदि कस्यचित् शासकस्य मृत्युः भवति तथा च यदि तस्य शासकस्य कश्चित् उत्तराधिकारी पुरुषः नास्ति तर्हि तस्य राज्यस्य अधिग्रहणम् आङ्ग्लीयैः करिष्यते अर्थात् तत् राज्यम् "ईस्ट-इण्डिया-कम्पनी" इत्यस्य भूभागान्तर्गतं समाविष्टं भविष्यति इति । एतस्य नीतेः आधारेण क्रमशः सतारा (1848), संबलपुरम् (1850), उदयपुरम् (1852),नागपुरम् (1853) अपि च झांसी (1854)इत्यादीनि राज्यानि आङ्ग्लाधीनानि जातानि ।

अन्ततः षट्पञ्चाशदधिकाष्टादशशत-तमवर्षे (1856) "ईस्ट-इण्डिया-कम्पनी" इति संस्था-द्वारा अवधः अपि स्वाधीनः कृतः । इदानीम् आङ्ग्लीयैः कश्चित् नूतनः तर्कः उपस्थापितः । ते अवदन् यत् अवधस्य जनतां तत्रत्यशासकस्य (नवाबस्य) कुशासनात् मोचयितुम् अस्माकं कर्तव्यम् अस्ति, अतः प्रतिबद्धाः भूत्वा वयम् अवधम् अधिग्रहीतुं बाध्याः स्मः ! स्वीयं प्रियशासकं राजसिंहासनात् अपसारितं दृष्ट्वा अवधस्य जनता क्रुद्धा जाता तथा च सा अपि सप्तपञ्चाशदधिकाष्टादशशततम-वर्षीये (1857) महाविद्रोहे सम्मिलिता ।

➢ **गतिविधिः**

कल्पयतु, यत् भवान् शासकस्य भ्रातुस्पुत्रः अस्ति भवान् बाल्यात् एव बोधितः अस्ति यत् एकस्मिन् दिने भवान् राजसिंहासनारूढः भविष्यति । अधुना भवान् अवगच्छति यत् विलयनीतेः कारणात् आङ्ग्लीयाः भवन्तं राजसिंहासनस्य आरोहणात् वारयन्ति । भवान् तदा किम् अनुभविष्यति ? राजसिंहासनम् अलङ्कर्तुं भवान् किं करिष्यति ?

चित्रम्-11 (अ) भारतम्, सप्तनवत्यधिकसप्तदशशततमवर्षम् (1797)



चित्रम्-11(ब) भारतम्,चत्वारिंशदधिकाष्टादशशततम-वर्षम् (1840)



चित्रम्-11 (स) भारतम्, सप्तपञ्चाशदधिकाष्टादशशततम-वर्षम् (1857)

चित्रम् - 11. (अ), (ब), (स) – भारते आङ्ग्लीयानां प्रसरन्ती सत्ता।
एतानि मानचित्राणि भारतस्य वर्तमानराजनैतिकमानचित्रेण सह संस्थाप्य पश्यन्तु। त्रिषु मानचित्रेषु तानि क्षेत्राणि परिचिन्वन्तु यानि क्षेत्राणि ब्रिटिशशासनान्तर्गतानि न आसन्।

नूतनशासनस्य स्थापना

गवर्नरजनरल इति पदारूढः वारेनहेस्टिंग्सः त्रिसप्तत्यधिकसप्तदशशततमवर्षतः – पञ्चाशीत्यधिकसप्तदशशततमवर्षकालावधौ (1773-1785) तेषु बहुषु महत्त्वपूर्णेषु जनेषु कश्चित् एकः आसीत् यः ईस्ट-इण्डिया-कम्पनी इति संस्थायाः शक्तिविस्तारे महत्त्वपूर्णां भूमिकाम् उढवान्। यदा वारेन-हेस्टिंग्सः प्रशासकः जातः तदा ईस्ट-इण्डिया-कम्पनी इति संस्था न केवलं बङ्गाले एव अपि तु बम्बईमद्रासयोः सत्ताम् अर्थात् शासनाधिकारम् अपि प्राप्तवती । ब्रिटिशक्षेत्राणि स्थूलतया प्रशासकीयघट्टेषु विभक्ताः आसन् ये आवासीयकार्यालयाः(प्रेजिडेंसी) इति रूपेण उच्यन्ते स्म। तस्मिन् काले प्रेजिडेंसीत्रयम् आसीत् – बङ्गाल-मद्रास-बम्बयी-महानगराणि । प्रत्येकं शासनं राज्यपालस्य पार्श्वे भवति स्म । सः सर्वोच्चराष्ट्राध्यक्षः(गवर्नरजनरल इति) भवति स्म । वारेनहेस्टिंग्सः अनेकानि प्रशासकीयसंशोधनानि अकरोत् । न्यायक्षेत्रे तस्य संशोधनानि विशेषतया उल्लेखनीयानि आसन्।

द्विसप्तत्यधिकसप्तदशशततम-वर्षात् (1772) काचित् नूतना न्यायव्यवस्था स्थापिता । एतस्याः व्यवस्थायाः अन्तर्गतं प्रावधानं कृतं यत् प्रत्येकं जनपदे द्वौ न्यायालयौ भविष्यतः – दण्डाधिकरणीय-न्यायालयः (फौजदारीन्यायालयः) राजसभीय-न्यायः (दीवानीन्यायालयः) च। दीवानीन्यायालयानां प्रमुखाः यूरोपीयमण्डलाधीक्षकाः भवन्ति स्म । तेषां यूरोपीयमण्डलाधीक्षकाणां मार्गदर्शनं मौलवीजनाः हिन्दुपण्डिताः च भारतीयाधिनियमानां व्याख्यां कृत्वा कुर्वन्ति स्म । सैन्यन्यायालयाः अधुना अपि काजी-मुफ्ती इत्येतयोः(मुस्लिमन्यायाधीशयोः) अन्तर्गताः आसन् । परन्तु ते अपि मण्डलाधीक्षकस्य मार्गदर्शनेन कार्यं कुर्वन्ति स्म।

काजी – कश्चित् मुस्लिमन्यायाधीशः।

मुफ्ती – मुस्लिमसमुदायस्य कश्चित् न्यायविद् यः अधिनियमानां व्याख्यानं करोति। काजी-परामृष्ट-न्यायानुसारं सः निर्णयान् श्रावयति।

महाभियोगः – यदा इङ्लैण्डस्य हाउस आफ कामंस इत्यस्मिन् कम् अपि जनं विरुध्य दुराचरणस्य आरोपः अरोप्यते तदा हाउस आफ लार्ड्स (संसदः उपरिसदने) इत्यस्मिन् तं जनं विरुध्य अभियोगः चलति । एषः एव महाभियोगः इति उच्यते।

चित्रम् - 12 – वारेन-हेस्टिंग्स-महोदये अभियोगः,आर.जी.पालार्डद्वारा चित्रितम्,एकोननवत्यधिकसप्तदशशततमवर्षम् (1789)

यदा वारेनहेस्टिंग्सः पञ्चाशीत्यधिकसप्तदशशततमे-वर्षे (1785) इंग्लैण्डं प्रतिगतवान् तदा तत्र ऐडमण्डवर्केवर्यः तस्योपरि आरोपणम् आरोपितवान् यत् तेन बङ्गालस्य शासनं समीचीनतया न चालितम्। एतस्य आरोपणस्य कारणात् हेस्टिंग्सस्य उपरि ब्रिटिशसंसदि **महाभियोगः** चालितः, यः महाभियोगः सप्तवर्षाणि यावत् अचलत्।

"अहं सर्वेषां शत्रुम् उत्पीडकं च अभिलक्ष्य महाभियोगं चालयामि।"

वारेन-हेस्टिंग्स-विषयके महाभियोगे चर्चाकाले ऐडमण्डबर्कमहोदयः उत्तेजनापूर्णभाषणम् अददात् तस्य भाषणस्य कश्चित् अंशः अत्र प्रस्तूयते

एडमण्डवर्केवर्यः अवदत् यत् अहं तस्य (हेस्टिंग्सस्य) उपरि भारतीय-जनानां पक्षतः महाभियोगं चालयामि येषां जनानाम् अधिकारान् सः सर्वथा नष्टीकृतवान्, येषां जनानां देशं सः मरुस्थलं कृतवान् । अन्ते अहं मानवस्वभावनाम्नि स्त्रीपुरुष-नाम्नि सर्वायुवर्गजननाम्नि पदधारिनाम्नि सर्वेषां च सामूहिकशत्रोः उत्पीडकस्य च उपरि महाभियोगं चालयामि।

काचित् महती समस्या इयम् आसीत् यत् ब्राह्मणपण्डिताः धर्मशास्त्राणां पृथक् पृथक् शाखानाम् अनुसारं स्थानीयाधिनियमानां पृथक्तया व्याख्यानं कुर्वन्ति स्म। एताः पृथक्ताः समापयितुं समतां च आनेतुं १७७५तमवर्षे ११पण्डितेभ्यः भारतीयाधिनियमानां किञ्चित् सङ्कलनं सज्जीकर्तुं कार्यम् अर्पितम् । एन.बी.हालहेडमहोदयः एतस्य सङ्कलनस्य आङ्ग्लभाषया अनुवादम् अकरोत् । १७७८तमवर्षं यावत् यूरोपीयन्यायाधीशेभ्यः मुस्लिमाधिनियमानां काचित् संहिता सज्जीकृता । १७७३ तमवर्षस्य रेग्युलेटिंगाधिनियमस्य अन्तर्गतम् एकस्य नूतनस्य सर्वोच्चन्यायालयस्य स्थापना कृता । एतदतिरिच्य कलकत्तायां निवेदनीय (अपीलीय)-सदर-निजामत-न्यायालयस्य अपि स्थापना कृता।

भारतीयजनपदे जनपदाधीक्षकपदं (क्लेक्टर)सर्वोच्चपदं भवति स्म। यथा नाम्ना एव ज्ञायते,तस्य प्रमुखकार्यं राजस्वस्य एकत्रीकरणं न्यायाधीशानाम् आरक्षकाधिकारिणाम् आरक्षकानां च साहाय्येन जनपदे अधिनियमीयव्यवस्थायाः च क्रियान्वयनं भवति स्म । तस्य कार्यालयः – कलेक्टरेट- इति अर्थात् सत्तासंरक्षणयोः नूतनकेन्द्रं जातम् आसीत्, येन पुरातनसत्ताकेन्द्राणि अनुपयुक्तानि कृतानि।

संस्थायाः (कम्पनी) सेना

ईस्ट-इण्डिया-कम्पनी इति संस्थायाः आगमनेन सह एव भारते प्रशासनिक-संशोधनानां दृष्ट्या नूतनविचाराः तु आगताः परन्तु तस्याः वास्तविकी सत्ता सैन्यशक्तौ आसीत्। मुगलसैन्यं मुख्यरूपेण प्रशिक्षिताश्वारोहिरूपेण पदातिः च आसीत्। तेभ्यः शरसन्धानस्य खड्गचालनस्य च प्रशिक्षणं दीयते स्म । सेनायाम् अश्वरोह्यादीनां प्रभावः भवति स्म, तथा च मुगलसाम्राज्येण कस्याश्चित् विशाल-व्यवसायिक-प्रशिक्षित-पदाति-सेनायाः आवश्यकता न अनुभूयते स्म । ग्रामीणक्षेत्रेषु सशस्त्रकृषकाणां व्यापकसङ्ख्या आसीत् । स्थानीयभूस्वामिनः मुगलेभ्यः आवश्यकतायां सत्यां पदातिसैनिकानाम् उपलब्धतां कारयन्ति स्म।

अष्टादशशताब्दे यदा अवध-बनारससदृशेषु राज्येषु कृषकान् सेनां प्रवेश्य तेभ्यः अपि व्यवसायिकसैन्यप्रशिक्षणं दातुं मुगलाः आरब्धवन्तः, तदा स्थितिः परिवर्तितुम् आरब्धा । ईस्ट-इण्डिया-कम्पनीद्वारा स्वसैन्याय सैनिकप्रवेशप्रक्रिया आरब्धा तया अपि मुगलवत् एव प्रक्रिया अङ्गीकृता । आङ्ग्लीयाः स्वसेनायै सिपॉयार्मी (सेना) (सिपाय इति शब्दः भारतीय- "सिपाही" इति शब्दस्यैव विकृतरूपम् अस्ति) इति पदस्य प्रयोगं कुर्वन्ति स्म।

विंशत्यधिकाष्टादशशततम-दशकात् (1820) यथा यथा युद्धकला परिवर्तितुम् आरब्धा ईस्ट-इण्डिया-कम्पनी-सेनायाम् सादिसैन्यदलानाम् आवश्यकता न्यूना जाता। तत्र कारणम् इदम् आसीत् यत् ब्रिटिशसाम्राज्यं बर्मा-अफगानिस्तान-मिश्रेषु अपि युद्ध्यते स्म तत्रत्याः सैनिकाः मस्केट-मैचलाक इत्यादिभुशुण्डिभिः समन्विताः भवन्ति स्म। ईस्ट-इण्डिया-कम्पनी इति संस्थायाः सेनायाः सैनिकैः परिवर्तितसैन्यावश्यकतानाम् अवधानं करणीयं भवति स्म तथा च अधुना तेषां पदातिसैन्यसमूहः अधिकमहत्त्वपूर्णः जायते स्म।

एकोनविंशतिशताब्दस्य आरम्भे आङ्ग्लीयाः कस्याश्चित् समरूपसैनिकसंस्कृत्तेः विकासम् आरब्धवन्तः आसन् । सैनिकाः यूरोपीयशैल्या प्रशिक्षणम् अभ्यासः

धर्मशास्त्रम् – संस्कृतस्य तादृश्यः कृतयः यासु सामाजिक-व्यवहारस्य आचरणस्य सिद्धान्तानां च व्याख्यानं क्रियते ताः कृतयः धर्मशास्त्ररूपेण उच्यन्ते । धर्मशास्त्राणि ईसापूर्वं ५०० वर्षेभ्यः अपि पूर्वं लिखितानि आसन्।

आरोही (सवार - अश्वारोही

मस्केट – (दीर्घभुशुण्डी) – पदाति-सैनिकैः प्रयुज्यमाना दीर्घभुशुण्डी।

मैचलाक – (पुराभुशुण्डी) – प्रारम्भिककालिका भुशुण्डिः, यस्यां स्फोटकचूर्णम् अग्निश्लाकया प्रज्वाल्यते स्म।



चित्रम् 13- संस्थायाः कार्यकर्ता बङ्गालस्य सादी, केनचित् अज्ञातेन भारतीयचित्रकारेण निर्मितं चित्रम्, अशीत्यधिकसप्तदशशततम-वर्षम् (1780).

मराठामैसूरसैन्यदलाभ्यां सह जातयुद्धानां पश्चात् ईस्ट-इण्डिया-संस्था स्वसादि-सैन्यदलस्य द्रढीकरणस्य महत्त्वम् अवगतवती।

अनुशासनं च शिक्ष्यन्ते स्म। अधुना तेषां जीवनं पूर्वापेक्षया अपि आधिक्येन नियन्त्रितम् आसीत्। एतस्मिन् प्रयासे कृते सति कदाचित् समस्याः अपि पुरतः आयान्ति स्म यतोहि प्रशिक्षितसैनिकानां सेनायाः नियोजनस्य काले आङ्ग्लीयाः कदाचित् जातेः समुदायस्य च भावनानाम् अपि अवहेलनं कुर्वन्ति स्म। कामं जनाः कथं स्वजातीयभावनाः धार्मिकभावनाविषये च एतवत्या सरलतया कथं त्यक्तुं शक्नुवन्ति स्म ? किं ते आत्मानं स्वसमुदायस्य सदस्यरूपेण अदृष्ट्वा केवलं सैनिकम् एव मन्तुं शक्तुवन्ति स्म ?

सैनिकाः किम् अनुभवन्ति स्म ? स्वजीवनं स्वपरिचयं च, अर्थात् ते के सन्ति ?, एतं विचारम् अनुभूय यानि परिवर्तनानि जायमानानि आसन्, तानि परिवर्तनानि सैनिकाः कथं दृष्टवन्तः ? सप्तपञ्चाशदधिकाष्टादशशत-तमवर्षस्य (1857) विद्रोहेण वयं जानीमः यत् सैनिकाः तेषां मनोगतभावाः च के आसन् ? इति। एतस्य विद्रोहस्य विषये भवन्तः पञ्चमे अध्याये पठिष्यन्ति।

निष्कर्षः

ईस्ट-इण्डिया-संस्था वाणिज्यिकसंस्थायाः विस्तारद्वारा कालक्रमेण भौगोलिकी औपनिवेशिकी च शक्तिरूपेण परिणता। एकोनविंशत्याः शताब्द्याः आरम्भे नूतनवाष्पप्रविधेः प्रयोगेण एषा प्रक्रिया इतोऽपि तीव्रा जाता। तावत्पर्यन्तं समुद्रमार्गेण भारतं प्राप्तुं षड् अष्टौ वा मासाः लगन्ति स्म। वाष्पद्वारा चाल्यमानैः यानैः एषा यात्रा सप्ताहत्रयेण भवति स्म। तदनन्तरं बहवः आङ्ग्लीयाः सकुटुम्बं भारतसदृशं सुदूरदेशम् आगन्तुं प्रारब्धवन्तः।

सप्तपञ्चाशदुत्तर-अष्टादशशततम-वर्षं (1857) यावत् भारतीयोपमहाद्वीपस्य त्रिषष्टि-(63) प्रतिशतं भूभागे तथा च अष्टसप्तति-(78)प्रतिशतं जनसङ्ख्यायां संस्थया साक्षात् शासनं स्थापितम् आसीत्। देशस्य शिष्टे भूभागे जनसंख्यायां च संस्थायाः अप्रत्यक्षः प्रभावः आसीत् अनेन प्रकारेण व्यवहारिकस्तरेण ईस्ट-इण्डिया-संस्था सम्पूर्णं भारतं स्वनियन्त्रणे स्वीकृतवती आसीत्।

अन्यत्र

दक्षिणाफ्रीकायां दासवाणिज्यम्



डचवाणिजः सप्तदशशताब्दे दक्षिणाफ्रीकां प्राप्तवन्तः । शीघ्रम् एव तत्र दासवाणिज्यम् आरब्धम् । जनान् बन्धकान् कृत्वा ऋङ्खलाभिः बद्ध्वा दासविपणिषु विक्रेतुम् आरब्धाः । चतुस्त्रिंशदुत्तराष्टादश-शततम-वर्षे (1834) दासप्रथायाः अन्तकाले अफ्रीकायाः दक्षिणकोणे स्थिते केप इत्यस्मिन् निजस्वामित्वे दासानां सङ्ख्या चतुः सप्तत्यधिकसप्तशदुत्तरषड्त्रिंशत्सहस्रम् (36,774) आसीत् ।

चतुर्विंशत्यधिकाष्टदशशततमे वर्षे (1424) केप इत्यस्य यात्री तत्रत्यस्य साक्षात्कारकृतस्य लीलामयक्रयस्य विवरणं प्रस्तौति –

"एतस्यां सूचनायां प्राप्तायां सत्यां यत् पशूनां कृष्युत्पादानां लीलामयक्रयणं भविष्यति.. अस्माभिः स्वशकटं नूतनवृषभौ क्रेतुं स्थगितम् । लीलामयक्रीयमाणायां सामग्र्याः अन्तर्गतं काचित् स्त्रीदासी तस्याः च त्रयः बालकाः आसन् । कृषकाः पशुवत् एव तान् परीक्षितवन्तः । ते स्त्रिशिश्वादयः पृथक्पृथक् विक्रेतृभ्यः विक्रापयिताः । माता चिन्तया वेदनया अश्रुपूर्णनेत्राभ्यां च शिशून् प्रति अपश्यत् । दुःखिताः बालाः व्याकुलतया मातापितरौ आश्लिष्टवन्तः । एतत् हृदयविदारकं दृश्यम् आसीत् । तत्र विपरीता स्थितिः अपि अस्माभिः दृष्टा तत्र विद्यमानदर्शकानां स्मितमुखानि आसन्, ते च असंवेदनशीलाः आसन् ।

नाईजल-वोर्डनद्वारा लिखितम्, द चेनस देट बायण्ड अस : ए हिस्ट्री आफ सलेवरी एट द केप,षण्णवत्यधिकैकोनविंशतिशततमवर्षम् (1996)

आगच्छन्तु, कल्पयामः

भवन्तः अष्टादशशताब्द्याः अन्तिमे अथवा एकोनविंशतिशताब्द्याः आरम्भे इङ्ग्लैण्डदेशे निवसन्ति । ब्रिटिशविजयस्य कथाविषये भवतां का प्रतिक्रिया भविष्यति ? स्मरन्तु यत् भवन्तः तत्र अनेकेषां गच्छताम् अधिकारिणाम् अगणितधनार्जनस्य च विषये ज्ञातवन्तः ।

पुनः स्मरन्तु -

1. निम्नलिखितस्य युग्म रचयन्तु

दीवानी	टीपुसुल्तानः
"शेर-ए-मैसूरः"	भूराजस्वसङ्ग्रहणस्य अधिकारः
फौजदारीन्यायालयः	सिपाय इति
रानीचेन्नम्मा	भारतस्य प्रथमराष्ट्राध्यक्षः(गवर्नरजनरल) इति
सैनिकः	सैन्यन्यायालयः (फौजदारीन्यायालयः)
वारेन-हेस्टिंग्समहोदयः	कित्तूरे आङ्ग्लविरोधिनः आन्दोलनस्य नेतृत्वम् अकरोत्

2. रिक्तस्थानानि पूरयत –

क) बङ्गप्रान्ते आङ्ग्लीयानां जयः --- इत्यस्य जयात् आरब्धा ।

ख) हैदरालिटीपूसुल्तानौ ---शासकौ आस्ताम् ।

ग) डलहौजी –इत्यस्य सिद्धान्तं क्रियान्वयितवान् ।

घ) मराठाराज्यानि मुख्यरूपेण भारतस्य ---भागे स्थितानि आसन् ।

3. उचितम् अनुचितं च ज्ञापयन्तु –

क) मुगलसाम्राज्यम् अष्टादशशताब्दे दृढताम् प्राप्तवत्।

ख) इङ्ग्लिश-ईस्ट-इण्डिया इति संस्था भारतेन सह वाणिज्यकर्त्री एकमात्रं यूरोपीयसंस्था आसीत्।

ग) महाराजः रणजीतसिंहः पञ्चनदस्य राजा आसीत्।

घ) आङ्ग्लीयाः स्वाधिकृतक्षेत्रेषु कानिचन अपि शासकीयपरिवर्तनानि न अकुर्वन्।

आगच्छन्तु विचारयामः –

4. यूरोपीयव्यापारिकसंस्थाः भारतं प्रति किमर्थम् आकृष्टाः भवन्ति स्म ?

5. बङ्गप्रान्तस्य शासकानाम् (नवाब) ईस्ट-इण्डिया-कम्पनी इति संस्थायाः च मध्ये कान् विषयान् अभिलक्ष्य विवादाः आसन् ?

6. भूप्रशासनिकाधिकारस्य अथवा सत्तायाः(दीवानी इति) प्राप्तेः पश्चात् ईस्ट-इण्डिया इति संस्था कथं लाभान्विता जाता ?

7. ईस्ट-इण्डिया इति संस्था टीपूसुल्तानात् किमर्थं बिभेति स्म ?

8. "सहायक-सन्धिः" ("सब्सिडियरी-एलायंस") इत्यस्याः व्यवस्थायाः व्याख्यां कुर्वन्तु।

9. संस्थायाः शासनं भारतीय-नृप-शासनात् कथं भिन्नम् आसीत् ?

10. संस्थायाः सेनायाः संरचनायाम् आगतानां परिवर्तनानां वर्णनं कुर्वन्तु।

आगच्छन्तु कृत्वा पश्यामः –

11. बङ्गप्रान्ते आङ्ग्लीयानां जयात् पश्चात् कलकत्तामहानगरं लघुग्रामात् परिवर्त्य महानगररूपेण परिवर्तितम् । औपनिवेशिककाले नगरीय-यूरोपीयसंस्कृत्तेः भारतीयनिवासिनां संस्कृत्तेः, शिल्पजीवनयोः च विषये जानन्तु।

12. निम्नलिखितेषु कञ्चित् जनम् आधारीकृत्य चित्राणि कथाः कविताः सूचनाः च एकत्रीकुर्वन्तु – तद्यथा – झांसीमहिष्याः, महादजीसिन्धियायाः, हैदरालिवर्यस्य, महाराज-रणजीतसिंहस्य, लार्ड-डलहौजिवर्यस्य, अथवा भवनानां क्षेत्रे जातस्य कस्यचित् पुरातनस्य शासकस्य च विषये।

॥ इति द्वितीयोऽध्यायः ॥

३ ग्रामीणक्षेत्रस्य प्रशासनम्

चित्रम् 1 –
पञ्चषष्ट्यधिकसप्तदशशततमवर्षे (1765) राबर्टक्लाइवः मुगलसम्राजः बिहारराज्यस्य उडीसाराज्यस्य च आस्थानत्वं (दीवानी इत्येताम्) स्वीकुर्वन् अस्ति।

"ईस्ट-इण्डिया-कम्पनी" इति संस्था प्रधानामात्यत्वेन (दीवान) जाता

अगस्ट्-मासस्य द्वादशदिनाङ्के पञ्चषष्ट्यधिकसप्तदशशततमे च वर्षे (1765) मुगलसम्राजा (मुगल-बादशाह) "ईस्ट-इण्डिया-कम्पनी" इति संस्था बङ्गप्रान्तस्य आमात्यरूपेण (दीवान) नियोजिता। ऊह्यते यत् एषा घटना केषाञ्चित् आङ्ग्लीयानां भारतीयानां च उपस्थितौ राबर्टक्लाइवस्य आवासे जाता स्यात् इति। परन्तु उपरि प्रदत्तचित्रे एषा घटना भव्ये समारोहे अभवत् इति दर्शितम् अस्ति। इदं चित्रं तेन चित्रकारेण विरचितं यस्मै राबर्टक्लाइवः स्वजीवनस्य स्मरणीयघटनानां चित्रमाध्यमेन रचनस्य दायित्वं समर्पितवान् आसीत्। बङ्गप्रान्तस्य प्रधानामात्यत्वम् (दीवानी इति) आङ्ग्लीयानाम् अधिकारे गतम् इति घटना निश्चयेन काचित् महती घटना आसीत्।

सचिवरूपेण कम्पनी इति संस्था स्वनियन्त्रितस्य भूभागस्य आर्थिकप्रकरणानां मुख्यप्रशासिका जाता। अधुना तया स्वभूमिं शासयितुम् आयं च व्यवस्थितं कर्तुं मार्गः अन्वेष्टव्यः आसीत्। एतदर्थं संस्थया कश्चित् तादृशः मार्गः अन्वेष्टव्यः आसीत् येन ईस्ट-इण्डिया-कम्पनी इति संस्थायाः पर्याप्तः आयः भवेत्। वाणिज्यिकसंस्थारूपेण तया इदम् अपि ध्यातव्यम् आसीत् यत् सा स्वावश्यकतानुरूपं वस्तूनां क्रयणं विक्रयणं च अपि कर्तुं शक्नुयात्।

कालक्रमेण संस्था एतत् अपि अवगतवती यत् तया सावधानम् अग्रे गन्तव्यं भविष्यति। बाह्यशक्तेः कारणात् ईस्ट-इण्डिया-कम्पनी इति संस्थया तादृशैः जनैः सह अपि मैत्रीभावेन व्यवहर्तव्यम् आसीत् ,ये जनाः आदौ ग्रामादिषु शासकरूपेण आसन् तथा च अधुना अपि ते पर्याप्तशक्ति-सम्पन्नाः सम्मानीयाः च आसन्। एतादृशाः शक्तिसम्पन्नाः जनाः स्थानीयसत्तायाम् आसन् तेषाम् उपरि नियन्त्रणं तु आवश्यकम् आसीत् परन्तु तेषां सर्वथा लोपः न कर्तुं शक्यते स्म।

एतत् कार्यं कथं भवेत् ? एतस्मिन् अध्याये वयं द्रक्ष्यामः यत् "ईस्ट-इण्डिया-कम्पनी" इति संस्थया कथं ग्रामीणक्षेत्राणि उपनिवेशत्वेन कृतानि ? आयस्य संसाधनानि कथम् अर्जितानि ? जनानाम् अधिकाराणां निर्धारणं कथं कृतम्, स्वेच्छया च सस्योत्पादनं कथं कारितम् ?

संस्थायाः आयः

कम्पनी इति संस्था प्रधानामात्यपदे आरूढा तु जाता , परन्तु अधुना अपि सा आत्मानं वणिक्-रूपेण एव मन्यते स्म। कम्पनी इति संस्था आधिक्येन राजस्वं तु वाञ्छति स्म परन्तु राजस्वाकलनस्य सङ्ग्रहणस्य च काम् अपि नियमितव्यवस्थां कल्पयितुं सङ्कोचम् अनुभवति स्म। कम्पनी इति संस्थायाः केवलः एषः एव प्रयासः आसीत् यत् न्यूनातिन्यूनमूल्येन समीचीनतमकार्पासं कौशेयवस्त्रं च क्रीणीयात् इति। एतस्मात् कारणात् पञ्चवर्षाभ्यन्तरे बङ्गप्रान्ते संस्थाद्वारा क्रीयमाणवस्तूनां मूल्यं द्विगुणितम् अभवत्। पञ्चषष्ट्यधिकाष्टादशशततमवर्षात् (1865) प्राक् कम्पनी इति संस्था ब्रिटेनतः सुवर्णरजतयोः आयातं करोति स्म तथा च एतेषां वस्तूनां प्रतिदाने अन्यानि वस्तूनि क्रीणाति स्म। अधुना बङ्गप्रान्ते संगृह्यमाणेन धनेन एव निर्याताय वस्तूनि क्रेतुं शक्यन्ते स्म।

शीघ्रम् एव एतत् स्पष्टम् अभवत् यत् बङ्गप्रान्तस्य अर्थव्यवस्था केनचित् गहनसङ्कटेन ग्रस्यते। शिल्पकाराः ग्रामं परित्यज्य पलायन्ते स्म यतो हि तैः बलात् न्यूनमूल्येन वस्तूनि संस्थायै विक्रेतव्यानि भवन्ति स्म। कृषकाः निजराजस्वम् अर्पयितुं न पारयन्ति स्म। शिल्पकाराणाम् उत्पादनं न्यूनं जायते स्म कृषिकार्यं च सर्वथा नाशपथे ह्रासपथे च आसीत्।

चित्रम् 2 -
बङ्गप्रान्तस्थस्य मुर्शिदाबादस्य काचित् साप्ताहिकविपणिः।

ग्रामीणकृषकाः शिल्पकाराः च स्वोत्पादितवस्तूनि विक्रेतुं निजावश्यकवस्तूनि च क्रेतुं नियमितरूपेण महाहट्टेषु आच्छन्ति स्म। आर्थिकसङ्कटकाले एताः विपणयः कुप्रभाविताः भवन्ति स्म।





चित्रम् 3 -

चार्ल्सकार्नवालिस-महोदयः ।

यस्मिन् काले स्थायिभूप्रबन्धनं क्रियान्वयितं, तस्मिन् काले कार्नवालिस-महोदयः भारतस्य राष्ट्राध्यक्षः (गवर्नरजनरल इति) आसीत् ।

स्रोतः 1

बङ्गालस्य कृषकाणां विषये कोलब्रुकस्य कथनम्

बङ्गालस्य अनेकेषु ग्रामेषु अनेके सम्पन्नाः कृषकाः स्वयं कृषिकार्यं न कुर्वन्ति स्म । एते सम्पन्नाः कृषकाः भूम्यधिकारपत्रानुसारं (पट्टे इत्यस्मिन्) भूमिम् अन्येभ्यः यच्छन्ति स्म तथा च तेभ्यः अत्यधिकं राजस्वं स्वीकुर्वन्ति स्म । षष्ठ्यधिकाष्टादशशततमे (1860) वर्षे एच.टी.कोलब्रुकमहोदयः एतेषां कृषकाणां स्थितिम् एतैः शब्दैः प्रतिपादितवान् - आवण्टनस्य अधिकप्रतिभूतीनां (भारी शर्तें इति) पशूनां बीजानाम् आजीविकानाम् ऋणप्रत्यर्पण-चिन्ता-भारेण अभिभूताः (दबे) कृषकाः आत्मानं कदापि ऋणात् विमुक्तान् न कर्तुं शक्नुवन्ति । यदा ते जीवननिर्वाहाय पर्याप्तं धनादिकम् अपि न प्राप्नुवन्ति तदा एतस्यां स्थितौ ते मनसा कार्यं कथं कर्तुं शक्नुवन्ति । न च ते स्वस्थितेः परिवर्तनस्य काम् अपि आशां पश्यन्ति ।

सप्तत्यधिकसप्तदशशततमे (1790) वर्षे जातस्य दुर्भिक्षस्य कारणात् कोट्यधिकजनाः तत्र मृत्युं प्राप्तवन्तः । एतस्मिन् दुर्भिक्षे प्रायः तृतीयांशात्मिकी जनसङ्ख्या समाप्ता जाता ।

कृषिकार्ये संशोधनस्य आवश्यकता

यदा अर्थव्यवस्था सङ्कटे आसीत् तदा किं संस्था निजराजस्वस्य आयविषये आश्वस्तः भवितुं शक्नोति स्म ? संस्थायाः अनेके अधिकारिणः अनुभूतवन्तः यत् भूमौ निवेशस्य कृषिकार्ये च संशोधनस्य आवश्यकता अस्ति ।

इदं कार्यं कथं कर्तुं शक्यते स्म? एतस्मिन् विषये दशकद्वयं यावत् चर्चा प्राचलत् । अन्ततः संस्थया त्रिनवत्यधिकसप्तदशशततमे (1793) वर्षे स्थायीभूव्यवस्था अथवा स्थायी-भूप्रबन्धनव्यवस्था (बन्दोबस्त) क्रियान्वयिता । एतस्याः स्थायीभूव्यवस्थायाः (बन्दोबस्त) सन्ध्यनुसारं नृपेभ्यः जनपदाधिपतिभ्यः (तालुकादार) च भूस्वामिरूपेण मान्यता प्रदत्ता । तेभ्यः भूस्वामिभ्यः जनपदाधिपतिभ्यः च इदम् अपि दायित्वं समर्पितं यत् ते भूस्वामिनः जनपदाधिपतयः च कृषकेभ्यः राजस्वं सङ्गृह्य तद् राजस्वम् ईस्ट-इण्डिया-कम्पनी इति संस्थायै अर्पयिष्यन्ति इति । तेषां भूस्वामिभ्यः जनपदाधिपतिभ्यः च पक्षतः अर्प्यमाणराशिः स्थायिरूपेण निश्चितः आसीत् । एतस्य अभिप्रायः अयम् आसीत् यत् भविष्यति काले कदाचिद् अपि तत्र वर्धनं न स्यात् । आङ्ग्लीयैः ऊह्यते स्म यत् अनया उपर्युक्तव्यवस्थया वयं नियमितरूपेण राजस्वं प्राप्स्यामः तथा च भूस्वामिनः अपि सोत्साहं भूमेः संशोधनाय धनं व्ययीकरिष्यन्ति । आङ्ग्लीयाः एतत् अपि अनुभवन्ति स्म यत् राज्यस्य पक्षतः राजस्वस्य याचना न वर्धिष्यते अतः भूस्वामिनः वर्धमानेन उत्पादनेन लाभांशम् आधिक्येन प्राप्स्यन्ति इति ।

समस्याः

परन्तु स्थायिभूमिप्रबन्धनात् अपि समस्या जाता । संस्थायाः अधिकारिभिः अनुभूतं यत् अधुना अपि भूस्वामिनः भूमेः गुणवत्तायाः वर्धनाय धनस्य व्ययं न कुर्वन्ति । वस्तुतः संस्थया यत् राजस्वं निर्धारितम् आसीत् एतावत् अधिकम् आसीत् यत् तस्य प्रत्यर्पणे भूस्वामिनः महत् कष्टम् अनुभवन्ति स्म इति । ये भूस्वामिनः राजस्वप्रत्यर्पणे विफलाः भवन्ति स्म तेषां भूमिः परिह्रीयते स्म । अनेकेषां भूस्वामिनां भूमिः संस्थया लीलामय-क्रयद्वारा विक्रीता ।

एकोनविंशतिशताब्द्याः प्रारम्भिकदशकं यावत् स्थितिः परिवर्तिता । महाहट्टेषु मूल्यानि वर्धितानि अपि च शनैः शनैः कृषिक्षेत्रस्य अपि विस्तारः जातः । अनेन भूस्वामिनाम् आये तु वृद्धिः अभवत् परन्तु संस्थायाः कोऽपि लाभः न अभवत् । यतो हि संस्था तु सर्वकालाय राजस्वमात्रां निश्चितवती आसीत् । अधुना सा राजस्वे वृद्धिं न कर्तुं शक्नोति स्म ।

परन्तु भूस्वामिनः अधुना अपि भूमेः उत्पादकतां वर्धयितुं रुचिं न दर्शयन्ति स्म । तेषु केचन तु भूप्रबन्धनस्य आरम्भिकवर्षेषु एव निजभूमितः च्युताः अभवन् ।

➢ गतिविधिः

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् कोलब्रुकमहोदयः बङ्गप्रान्तस्य शुल्कोपजीविनां भूस्वामिनां स्थितिविषये एतावान् चिन्तितः किमर्थम् अस्ति ? गतपृष्ठान् पठित्वा संम्भावितकारणानि ज्ञापयतु ।

ये अवशिष्टाः आसन्, ते अपि कष्टं निवेशरूपविभीषिकां च विना आयस्य आशां पश्यन्ति स्म । यावत्पर्यन्तं भूस्वामिकृषकेभ्यः भूमिं दत्त्वा तेभ्यः राजस्वं ग्रहीतुं शक्नुवन्ति स्म तावत्पर्यन्तं भूपरिष्कारस्य तेषां च चिन्ता न आसीत् ।

अपरस्मिन् पक्षे एषा दमनकारिणी व्यवस्था अस्ति इति ग्रामीणकृषकाः चिन्तितवन्तः । कृषकेण यद् ऋणं प्रत्यर्पणीयम् आसीत् तद् बहु अधिकम् आसीत् । भूमौ च तस्य अधिकारः सुरक्षितः न आसीत् । ऋणम् अर्पयितुं प्रायः उत्तमर्णात् (महाजनात्) ऋणं स्वीकरणीयं भवति स्म । यदि सः कृषकः राजस्वं प्रत्यर्पयितुं न शक्नोति स्म तर्हि सः कृषकः परम्पराप्राप्तभूमितः अधिकारच्युतः भवति स्म ।

महाल इति – ब्रिटिश-राजस्व-अभिलेखेषु महाल इति कश्चित् राजस्वप्रकल्पः आसीत् । एषः कश्चित् ग्रामः अथवा ग्रामसमूहः भवति स्म ।

काचित् नूतना व्यवस्था

एकोनविंशतिशताब्दस्य आरम्भे एव संस्थायाः बहवः अधिकारिणः एतं तथ्यं प्रति आश्वस्ताः आसन् यत् राजस्व-भूप्रबन्धनव्यवस्थयोः परिवर्तनम् आवश्यकम् अस्ति । यदा संस्थायै वाणिज्यं शासनव्यवस्थां च सञ्चालयितुम् अधिकधनस्य आवश्यकता स्यात् तदा स्थायिरूपेण राजस्वं निश्चित्य संस्था कथं कार्यं चालयितुं शक्नोति ?

बङ्गालस्थस्य आङ्ग्लीयानाम् आवासीयकार्यालयस्य (बङ्गालप्रेजिडेंसी इत्यस्याः) उत्तरपश्चिमप्रान्तेभ्यः (एतस्य क्षेत्रस्य अधिकांशभागः अधुना उत्तरप्रदेशे अस्ति) होल्टमैकेंजीनामकेन आङ्ग्लीयेन काचित् एका नूतना व्यवस्था सज्जीकृता, या द्वाविंशत्यधिकाष्टादशशततमे (1822) वर्षे क्रियान्वयिता । मैकेंजिमहोदयः विश्वसिति स्म यत् उत्तरभारतीय-समाजे ग्रामः काचित् महत्त्वपूर्णा सामाजिकी संस्था अस्ति तथा च तस्याः संरक्षणम् आवश्यकम् अस्ति । तस्य मैकेंजिमहोदयस्य आदेशानुसारं जनपदाधीशैः ग्रामाणां यात्रा कृता, भूमेः परीक्षणं कृतम्, क्षेत्राणां मापनं कृतम्, तथा च विभिन्नसमूहानां रुचयः अवगताः । अधिकारिभिः ग्रामस्य प्रत्येकं क्षेत्रस्य अनुमानितं राजस्वम् आकलय्य प्रत्येकं ग्रामस्य अथवा ग्रामसमूहस्य (महाल) एकत्रितराजस्वस्य परिगणनं क्रियते स्म । एतस्याः राजस्व-व्यवस्थायाः अन्तर्गतं स्थायिरूपेण राजस्वस्य मात्रा न निश्चिता अपितु यथाकालं तत्र संशोधनं भविष्यति इति व्यवस्था स्थापिता । राजस्व-संग्रहणस्य दायित्वं भूस्वामिने अदत्त्वा ग्रामप्रमुखाय दत्तं सः ग्रामप्रमुखः तत् राजस्वं संगृह्य "ईस्ट-इण्डिया-कम्पनी" इति संस्थायै दास्यति इति व्यवस्था कृता । एतस्याः व्यवस्थायाः नामकरणं सामूहिकरूपेण ग्रामस्य स्थायीभू-प्रबन्धन-व्यवस्था (महालवारीबन्दोबस्त इति) इति कृतम् ।

चित्रम्- 4 – मद्रासस्य राज्यपालः (गवर्नर) टामसमुनरोवर्यः (1819-1826) इति ।

मुनरो-निर्दिष्ट-व्यवस्था

ब्रिटिशनियन्त्रितेषु दक्षिणभारतीयक्षेत्रेषु अपि स्थायिभूप्रबन्धनस्य स्थाने नूतनव्यवस्था भवेत् इति प्रयासः आरब्धः । तत्र या नूतना व्यवस्था आरब्धा सा कृषकीयव्यवस्था (रैयतवार) इति नाम्ना ख्याता । कैप्टन-एलेक्जेंडर-रीडमहोदयः टीपूसुल्तानेन सह जातयुद्धेभ्यः पश्चात् संस्थाद्वारा अधिकृतेषु केषुचित् क्षेत्रेषु स्वव्यवस्थां स्थापयित्वा अपि दृष्टवान् आसीत् । टामसमुनरोद्वारा एषा व्यवस्था विकसिता शनैः शनैः च सम्पूर्णे दक्षिणभारते एव एषा व्यवस्था क्रियान्वयिता ।

रीडमहोदयः मुनरोमहोदयः च अनुभवतः स्म यत् दक्षिणभारते परम्परागताः भूस्वामिनः न आसन्न् इति । अतः तयोः तर्कः आसीत् यत् तादृशैः कृषकैः एव भूप्रबन्धनं (बन्दोबस्त) कारणीयं यैः वंशपरम्परया कृषिकार्यं क्रियते ।

➢ गतिविधिः

कल्पयन्तु यत् भवान् संस्थायाः प्रतिनिधिरूपेण संस्थाशासनस्य अन्तर्गतं ग्रामीणक्षेत्राणां स्थितिम् अभिलक्ष्य काञ्चित् समाख्याम् इङ्ग्लैण्डं प्रेषयति । भवान् समाख्यायां किं लेखिष्यति ?

राजस्वस्य आकलनात् प्राक् तेषां क्षेत्राणां सावधानं पृथक्तया च सर्वेक्षणं करणीयं स्यात् । मुनरोवर्यः मन्यते स्म यत् आङ्ग्लीयैः पितृवत् कृषकाणां रक्षा करणीया ।

सर्वं समीचीनं न आसीत्

नूतनव्यवस्थानां क्रियान्वयनात् पश्चात् मात्रं केषाञ्चित् वर्षाणाम् आभ्यन्तरे एव तत्र समस्याः पुरतः समायाताः । भूमेः जायमानम् आयं वर्धयितुं राजस्वाधिकारिणः आधिक्येन राजस्वं सुनिश्चितवन्तः । कृषकाः राजस्वम् अर्पयितुं न पारयन्ति स्म , अतः कृषकाः ग्रामात् प्लायन्ते स्म । बहुषु क्षेत्रेषु ग्रामाः जनशून्याः अभवन् । आशावादिनः अधिकारिणः आशासते स्म यत् नूतनव्यवस्थया कृषकाः सम्पन्नाः उद्यमशीलाः च भविष्यन्ति इति । परन्तु तथाविधं किम् अपि न अभवत् ।

यूरोपीयदेशान् अभिलक्ष्य सस्यानाम् उत्पादनम्

आङ्ग्लीयैः एतत् अपि अनुभूतं यत् ग्रामीणक्षेत्राणि न केवलं राजस्वं दास्यन्ति अपितु यूरोपीयदेशानाम् आवश्यकतानुगुणं समीचीनतया सस्यानि अपि अत्र उत्पादयितुं शक्नुवन्ति । अष्टादशशताब्दस्य अन्तपर्यन्तं "ईस्ट-इण्डिया-कम्पनी" इति संस्था अफेनस्य (अफीम) नीलस्य च सस्यस्योत्पादने बलं प्रायुनक् । तदनन्तरं प्रायः सार्धैकशतं (150) वर्षाणि यावत् आङ्ग्लीयाः निरन्तरं देशस्य विभिन्नभागेषु कस्यचित् विशिष्टस्य सस्यस्य उत्पादनाय कृषकान् बाध्यान् अकुर्वन् – तद्यथा बङ्गप्रान्ते शणम् (पटसन), असमप्रान्ते चायम्, संयुक्तप्रान्ते (वर्तमानोत्तरप्रदेशे) इक्षुः, पञ्चनदे गोधूमाः, महाराष्ट्र-पञ्चनदयोः कार्पासम्, मद्रासे तण्डुलाः च इति ।

उपर्युक्तम् एतत् सर्वम् आङ्ग्लीयैः कथं कृतम् ? आङ्ग्लीयाः स्वावश्यकतानुरूपं सस्यानां कृषिकार्यं वर्धयितुं प्रसारयितुं च नूतनविधीः अङ्गीकृतवन्तः । आगच्छन्तु, सस्योत्पादनस्य एवंविधां काञ्चित् पद्धतिं समीचीनतया अवगच्छामः ।

चित्रम् (5) - एकः कलमकारिमुद्रणम्, विंशतिशताब्दः, भारतम् ।

चित्रम् (6) – मारिस-काटन-मुद्रणम्, एकोनविंशतिशताब्दस्य उत्तरार्द्धम्, इंग्लैण्डदेशः ।

किं रङ्गाणाम् अपि कश्चित् इतिहासः अस्ति ?

पञ्चमे षष्ठे च चित्रे कौशेयवस्त्राणां मुद्रिते द्वे चित्रे प्रदत्ते स्तः । वामतः पञ्चमे चित्रे भारतदेशस्थस्य आन्ध्रप्रदेशस्य तन्तुवायैः निर्मितानि कलमकारिमुद्रितानि चिह्नानि दृश्यन्ते । अपरतः ब्रिटेनस्य प्रसिद्धकविना कलाकारेण च विलियम-मारिसद्वारा निर्मितानि पुष्पचित्राणि सन्ति । द्वयोः विलिखितचित्रयोः एकया दृष्ट्या समानता अस्ति । द्वयोः मुद्रितचित्रयोः एव गभीरनीलवर्णस्य प्रयोगः अस्ति । सामान्यरूपेण एषः नीलवर्णः इति उच्यते । किं भवन्तः जानन्ति यत् एषः वर्णः कथम् उत्पादितः इति ?

एतेषु चित्रेषु भवद्भिः यः नीलवर्णः दृश्यते सः नीलनामकात् कस्माच्चित् पादपात् निष्कास्यते स्म । सम्भाव्यते यत् एकोविंशतिशताब्दीये ब्रिटेनदेशे मारिस-महोदयस्य चित्रेषु प्रयुक्तः नीलवर्णः भारतदेशे जायमाननीलपादपैः एव निर्मितः स्यात् । तस्मिन् काले भारतदेशः विश्वे नीलस्य महत्तमः स्रोतोरूपः आसीत् ।

भारतीयनीलस्य याचना किमर्थम् आसीत् ?

नीलपादपः मुख्यरूपेण उष्णकटिबन्धीयक्षेत्रेषु उत्पद्यते । त्रयोदशशताब्दं यावत् फ्रांसब्रिटेनयोः वस्त्रोत्पादकाः वस्त्ररङ्गनाय भारतीयनीलस्य एव प्रयोगं कुर्वन्ति स्म ।

तस्मिन् काले भारतीयनीलः व्यापकमात्रया यूरोपीयमहाहट्टेषु न प्राप्नोति स्म । तस्य मूल्यम् अपि बहु अधिकं भवति स्म । अतः यूरोपीयवस्त्रोत्पादकाः वृन्ताक-सदृश-नीलवर्णं निर्मातुं वोडनामके विशिष्टपादपे एव आश्रिताः भवन्ति स्म । "वोडपादपः" शीतोष्णक्षेत्रे प्रादुर्भवति स्म, अतः यूरोपे सरलतया लभ्यते स्म । उत्तरी-इटली-दक्षिणीफ्रांस-जर्मनी-ब्रिटेनदेशानाम् अनेकभूभागेषु एषः पादपः जायते स्म । नीलेन सह प्रतिस्पर्धाकारणात् कष्टपतिताः यूरोपीयाः वोडोत्पादकाः स्वसर्वकारस्य उपरि बलाघातम् अकुर्वन् यत् सर्वकारः नीलस्य आयाते प्रतिबन्धं स्थापयेत् इति ।

परन्तु वस्त्ररञ्जकः तु केवलं नीले एव रुचिं वहन्ति स्म । यतो हि तैः वस्त्ररञ्जकैः नीलद्वारा अतीव चकासमान-नीलवर्णः प्राप्यते स्म, अपरञ्च वोडतः प्राप्यमाणवर्णः द्युतिरहितः अरोचकः च भवति स्म । तत्रत्यसर्वकारेण सप्तदशशताब्दं यावत् नीलस्य आयाते यः प्रतिबन्धः स्थापितः आसीत् तत्र शिथिलतां दातुं यूरोपीयवस्त्रोत्पादकाः सर्वकारं स्वपक्षे कृतवन्तः । कैरीबियायी-द्वीपसमूहे स्थिते सेण्ट-डामिंग्यू इत्यस्मिन् फ्रांसीसिजनाः, ब्राजीले पुर्तगालिनः, जमैकायां ब्रिटिशाः, बेनेजुएलायां स्पैनिशजनाः, नीलकृषिम् आरब्धवन्तः । उत्तर-अमेरिकायाः अपि अनेकेषु भूभागेषु नीलोद्यानानि विद्यमानानि आसन् ।

अष्टादशशताब्दस्य समाप्तिं यावत् भारतीयनीलस्य याचना आधिक्येन सर्वत्र जाता । ब्रिटेने औद्योगिकीकरण-युगस्य आरम्भः अभवत् कार्पासस्य उत्पादने आधिक्येन वर्धनम् अभवत् । अधुना वस्त्ररागस्य (रंगाई) याचना च तीव्रतया वर्धिता । यदा नीलस्य याचना वर्धिता तदा वेस्ट-इण्डीज-अमेरिकाभ्यः यः नीलपदार्थः लभ्यते स्म अनेककारणैः तस्य आपूर्तिः प्रतिबन्धिता । त्र्यशीत्यधिकसप्तदशशततमात् (1783) वर्षाद् आरभ्य एकोननवत्यधिकसप्तदशशततमवर्षस्य (1789) मध्ये विश्वे नीलोत्पादनम् अर्धं जातम् । ब्रिटेनस्य वस्त्ररञ्जकाः अधुना नीलस्य आपूर्तये व्यग्रतया कस्यचित् अन्यस्रोतसः अन्वेषणं कुर्वन्ति स्म ।

एषः नीलपदार्थः कुतः लब्धुं शक्यते स्म ?

ब्रिटेनस्य भारतदेशं प्रति वर्धमाना रुचिः

यूरोपे नीलस्य वर्धितयाचनां दृष्ट्वा "ईस्ट-इण्डिया-कम्पनी" इति संस्था अपि भारते नीलकृषिः व्यापकमात्रया भवेत् इति नूतनमार्गम् अन्वेष्टुम् आरभत ।

उद्यानम् (बागान) – कञ्चित् विशालक्षेत्रं यस्मिन् उद्यानस्वामी बहुभिः जनैः बलात् कार्यं कारयति स्म । कफघ्नी-इक्षु-तम्बाखु-चाय-कार्पासादिविषये उद्यानानां विषये चर्चा क्रियते ।

चित्रम् 7 -

सेण्ट-डामिंग्यू इत्यस्मिन् क्रीतदासानां विद्रोहः, अगस्तमासः एकनवत्यधिकसप्तदशशततम-वर्षम् (1791), जनवरी-स्कुहदोल्स्की इत्यस्य चित्रम् ।

अष्टादशशताब्दे फ्रांसीयाः उद्यानस्वामिनः कैरीबियाई-द्वीपसमूहे स्थिते "फ्रांसदेशस्य सेण्ट-डामिंग्यू" इति नामके उपनिवेशे नीलस्य शर्करायाः च उत्पादनम् आरब्धवन्तः । एतेषु उद्यानेषु कार्यकर्तारः अफ्रीकीयाः क्रीतदासाः एकनवत्यधिकसप्तदशशततमे (1791) वर्षे विद्रोहम् आरब्धवन्तः । तैः क्रीतदासैः उद्यानानि ज्वालितानि, स्वीयाः धनाढ्याः स्वामिनः च हताः । द्विनवत्यधिकसप्तदशशततमे (1792) वर्षे स्वोपनिवेशेषु दासप्रथा समाप्ता । एताभ्यः घटनाभ्यः कैरीबियाई-द्वीपसमूहेषु नीलस्य कृषिकार्यं सर्वथा समाप्तम् ।

क्रीतदासः (गुलाम) – एतादृशः जनः यः कस्यचित् क्रीतदासस्वामिनः सम्पत्तिरूपः भवति । सः क्रीतदासः इति कथ्यते । क्रीतदासस्य पार्श्वे स्वातन्त्र्यं न भवति, तेन केवलं स्वस्वामिने कार्यं करणीयं भवति ।

अष्टादशशताब्दस्य अन्तिमदशकात् आरभ्य एव बङ्गप्रान्ते नीलसस्यस्य उत्पादनं तीव्रतया अभवत् । बङ्गप्रान्ते उत्पन्ननीलः विश्वस्य महाहट्टेषु प्रसृतवान् । अष्टाशीत्यधिकसप्तदशशततमे वर्षे (1788) ब्रिटेनद्वारा आयातिते नीलपदार्थे भारतीयनीलस्य भागः प्रायः त्रिंशत्प्रतिशतम् (30) इति आसीत् । दशाधिकाष्टादशशततमे वर्षे (1810) ब्रिटेनद्वारा आयातिते नीलपदार्थे भारतीयनीलस्य भागः पञ्चनवतिप्रतिशतम् (95) अभवत् । कालक्रमेण यथा नीलस्य वाणिज्यं विस्तारं गतम्, "कम्पनी" इति संस्थायाः अधिकारिणः व्यावसायिकसचिवाः च नीलस्य उत्पादने धननिवेशं कर्तुम् आरब्धवन्तः । समयस्य अन्तराले संस्थायाः अनेके अधिकारिणः नीलस्य स्वस्मिन् उद्योगे वाणिज्ये वा अवधानं कर्तुं कम्पनी इति संस्थायाः सेवाकार्यं त्यक्तवन्तः । अत्यधिकलाभांशम् अर्जयितुं स्काटलैरण्डस्य इङ्ग्लैण्डस्य च अनेके जनाः भारतम् आगतवन्तः तथा च तैः नीलोद्यानानि विकासितानि । येषां पार्श्वे नीलोत्पादनाय धनं न आसीत्, संस्थायाः नूतनवित्तकोशाः तेभ्यः ऋणरूपेण धनं दातुं सन्नद्धाः तिष्ठन्ति स्म ।

नीलस्य कृषिकार्यं कथं भवति स्म ?

नीलस्य कृषिं कर्तुं मुख्यतः द्वौ उपायौ आस्ताम् – निजोपायः अपरश्च कृषकीयोपायः (रैयती) । निजकृषेः व्यवस्थान्तर्गतम् उद्यानस्वामिनः स्वयं स्वभूमौ नीलस्य उत्पादनं कुर्वन्ति स्म । एकतः तु ते भूमिं क्रीणन्ति स्म अपरतः च भूस्वामिभ्यः भाटकस्योपरि भूमीः स्वीकुर्वन्ति स्म श्रमिकान् च अपि कार्ये नियोज्य नीलस्य कृषिकार्यं कारयन्ति स्म ।

निजकृषिकार्ये समस्याः

उद्यानस्वामिनः निजकृषिकार्यं कर्तुं तत् कार्यं च विस्तारयितुं समस्याः अनुभवन्ति स्म । नीलसम्बद्धकृषिकार्यं केवलम् उर्वराभूमौ एव कर्तुं शक्यते स्म । एतादृशेषु भूखण्डेषु पूर्वतः एव व्यापक-जनसंख्या आसीत् । तत्र ते लघुक्षेत्राणि एव प्राप्नुवन्ति स्म । तेभ्यः नीलस्य कृषिकार्याय विशालभूक्षेत्राणाम् आवश्यकता आसीत् । एतादृशान् भूखण्डान् ते कुतः कथं च प्राप्तुं शक्नुवन्ति स्म ? ते नीलयन्त्रागारस्य समीपे एव भाटकस्य उपरि भूखण्डान् भूमिं च प्राप्तुं प्रयत्नं कृतवन्तः तदर्थं च तत्रत्यान् कृषकान् एव ततः अपसारितवन्तः । एतस्मात् कारणात् तत्र विघट्टनं विरोधः अवसादस्थितिः च जायते स्म ।

श्रमिकाणां प्रबन्धनम् अथवा व्यवस्था अपि सरलतया न भवति स्म । विशालोद्यानाय अनेकेषां श्रमिकाणाम् आवश्यकता भवति स्म, श्रमिकाणां च आवश्यकता अपि तस्मिन् काले एव आधिक्येन भवति स्म यस्मिन् काले कृषकाः धान्यस्य कृषिकर्मणि व्यस्ताः भवन्ति स्म ।

व्यापकमात्रया निजकृषिकार्यार्थम् अनेकेषां वृषभाणां हलादीनां च आवश्यकता भवति स्म । एकबीघा-परिमित-भूमौ नीलकृषिकार्याय हलद्वयम् आवश्यकं भवति स्म । एतस्य अयम् अभिप्रायः आसीत् यत् यदि कस्यचित् उद्यानस्वामिनः पार्श्वे एकसहस्रं बीघापरिमिता भूमिः अस्ति, तर्हि तस्मै द्विसहस्रस्य हलानाम् आवश्यकता आसीत् । हलानां क्रयणं तेषां संरक्षणं च एका महती समस्या आसीत् । कृषकेभ्यः अपि अपेक्षानुगुणं हलाः न प्राप्यन्ते स्म । यतो हि कृषकेभ्यः अपि हलादिवस्तूनाम् आवश्यकता भवति स्म । यस्मिन् काले नीलोत्पादकाः आवश्यकताम् अनुभवन्ति स्म, तस्मिन् काले एव कृषकाणां हलाः वृषभाः च अपि धान्यकृषिकार्ये व्यस्ताः भवन्ति स्म ।

एकोनविंशतिशताब्दस्य समाप्तिं यावत् उद्यानस्वामिनः निजकृषिक्षेत्रं विस्तारयितुं सङ्कोचयन्ति स्म । एतस्याः व्यवस्थायाः अन्तर्गतं नीलस्य उत्पादनाय पञ्चविशति-प्रतिशतम् इत्यस्मात् अपि न्यूनभूमिः तेषां भागे आयाति स्म । शिष्टा भूमिः कृषकीव्यवस्थायाः (रैयती इति व्यवस्थायाः) अन्तर्गता आसीत् ।

कृषकाणां भूमौ नीलस्य कृषिकार्यम्

कृषकीयव्यवस्थायाः अन्तर्गतम् उद्यानस्वामिनः कृषकैः (रैयत इति)सह कञ्चित् अनुबन्धं (सट्टा इति) स्थापयन्ति स्म । ते उद्यानस्वामिनः अनेकधा कृषकाणां पक्षतः ग्रामप्रमुखान् अपि सन्ध्यर्थं बाध्यान् कुर्वन्ति स्म, ये अनुबन्धपत्रे हस्ताक्षराणि कुर्वन्ति स्म तेभ्यः उद्यानस्वामिनः नीलोत्पादनाय अल्पकुसीदेन प्रत्यक्ष-ऋणं यच्छन्ति स्म । अधमर्णकृषकैः न्यूनातिन्यूनं पञ्चविंशत्यां (25) प्रतिशतं भूमौ नीलस्य उत्पादनं करणीयं भवति स्म । उद्यानस्वामिनः कृषकाणां कृते बीजोपकरणादि-व्यवस्थां कुर्वन्ति स्म, अपरञ्च मृत्तिकायाः समीकरणस्य संशोधनस्य बीजवपनस्य सस्यसंरक्षणस्य च दायित्वं कृषकाणां भवति स्म ।

चित्रम् 8 - एकोनविंशतिशताब्दस्य (21) आरम्भे बङ्गालस्य श्रमिकाः नीलस्य कृषिकार्यं कुर्वन्तः सन्ति ।

भारते नीलस्य पादपानां कर्तनम अधिकांशतः पुरुषाः एव कुर्वन्ति स्म ।

यदा सस्यकर्तनस्य पश्चात् सस्यम् उद्यानस्वामिभ्यः प्रत्यर्प्यते स्म तदा कृषकः नूतनम् ऋणं प्राप्नोति स्म पुनः च सा एव चक्रकव्यवस्था पौनःपुन्येन प्रारभते स्म ।

चित्रम् 9 - क्षेत्रेभ्यः उद्योगयन्त्रागारं (कारखाना इति) प्रति नीयमानाः नीलचयाः इति ।

नीलस्य उत्पादनं कथं भवति स्म ?



चित्रम् 11- महिलाः एव नीलस्य पादपान् कुण्डानि यावत् उद्वा आनयन्ति स्म।

चित्रम् -10 - नीलस्य क्षेत्राणां समीपे स्थितस्य नीलस्य किञ्चित् उद्योगागार-गृहम्, विलियम-सिंप्सनद्वारा रचितं चित्रम्, त्रिष्ट्यधिकाष्टादशशततमे वर्षे (1863).

प्रायः नील-ग्रामाः उद्यानस्वामिनाम् उद्योगागारगृहाणां समीपे एव भवन्ति स्म। नीलपादपाः कर्तनात् पश्चात् उद्योगयन्त्रागारस्थिते कुण्ठे (वैटस हौद इत्यस्मिन्) एव प्राप्यन्ते स्म। रङ्गस्य निर्माणाय त्रिचतुर्णां कुण्डानाम् आवश्यकता भवति स्म। प्रत्येकं कुण्डस्य पृथक्कार्यं भवति स्म। नीलपादपाणां पत्राणि त्रोटयित्वा आदौ एकस्मिन् कुण्डे तानि चिरकालं यावत् निमज्यन्ते स्म (एतत् कुण्डम् (हौद) नील-किणवण-कुण्डम् अथवा "स्टीपरकुण्डम्" इति उच्यते स्म)। यदा पादपाः किणविताः भवन्ति स्म तदा द्रव्ये बुद्बुदाः जायन्ते स्म, अधुना सन्दूषितानि (सडे हुए) पत्राणि ततः निष्कास्यन्ते स्म अपि च द्रवभागः एतस्मिन् कुण्डे परिशोध्यते स्म। अपरं कुण्डं प्रथमकुण्डस्य साक्षात् नीचैः भवति स्म।

चित्रम्-12-
कुण्डे द्रवीभूतपदार्थस्य आलोडयिता

अत्र स्थितः नीलश्रमिकः कुण्डे स्थापित-द्रवमय-नीलपदार्थस्य आलोडनाय प्रयुक्तपैडलयन्त्रं स्वीकृत्य तिष्ठति। एतादृशैः श्रमिकैः अष्टाभ्यः होराभ्यः अपि अधिककालं यावत् आकटिभागं यावत् पूर्णे नीलद्रव्यपात्रे स्थातव्यं भवति स्म।

वाट इति – एकं किणवनपात्रम् अथवा सङ्ग्रहणपात्रम्।

अपरस्मिन् कुण्डे (बीटर-वाट इत्यस्मिन्) एषः द्रवपदार्थः निरन्तरम् आलोड्यते स्म अपि च "पैडल" इति यन्त्रेण परिभ्राम्यते स्म यदा एतत् द्रव्यं हरितं तदनन्तरं च नीलवर्णीयं भवति स्म, तदा कुण्डे चूर्णक-जलं (चूना) निपात्यते स्म। शनैः शनैः नील-वलयाः तुषारकणाः नील-सतहाः वा (पपडियां / परतें) अधः सघनीभूताः परिश्लिष्टाः वा भवन्ति स्म, तत्र च उपरि परिशोधितद्रव्यम् उद्गच्छति स्म। द्रव्यं परिशोध्य पृथक्क्रियते स्म, अधस्तनीयः च एकत्रीभूतः नीलद्रवाशेषः – नीलस्य संयावरूपनीलपदार्थः च – अपरस्मिन कण्डे (निथारन-कण्डे) निपात्यते स्म। तदनन्तरं तादृशः सः पदार्थः निष्पीड्य विक्रयणाय शोष्यते स्म।

चित्रम् -13- विक्रयणाय नीलं सिद्धम् अस्ति।

अत्र भवन्तः उत्पादनस्य अन्तिमावस्थां द्रष्टुं शक्नुवन्ति। प्रारूपपात्रेषु (सांचा इति) नीलं निष्पीड्य नीलस्य संयावरूपं खण्डं कर्तयित्वा श्रमिकाः खण्डशः च विभज्य तेषु मुद्राङ्कणं कुर्वन्ति। कश्चित् श्रमिकः उपरि प्रदत्तस्थचित्रस्य पृष्ठतनीये भागे एतान् खण्डान् शोषयितुं नयति।

ये कृषकाः पूर्वम् एतैः ऋणैः आकृष्टाः भवन्ति स्म ते अधुना अवगतवन्तः यत् एषा व्यवस्था अतिजटिला अस्ति। अस्माभिः नीलस्य यत् मूल्यं प्राप्यते तत् बहुन्यूनम् अस्ति, ऋणसम्बद्धा च एषा चक्रकव्यवस्था न कदापि समाप्तिं याति इति।

समस्याः अन्याः अपि आसन्। उद्यानस्वामिनः इच्छन्ति स्म यत् कृषकाः स्वस्य समीचीनतमेषु क्षेत्रेषु एव नीलस्य कृषिं कुर्वन्तु। परन्तु नीलविषयिणी समस्या एषा आसीत् यत् तेषां नीलपादपानां मूलानि बहुगभीराणि भवन्ति स्म तानि च मृत्तिकायाः सम्पूर्णाम् ऊर्वरकतां शोषयन्ति स्म। नीलस्य कर्तनात् परं तत्र धान्यस्य कृषिः न कर्तुं शक्यते स्म।

"नीलविद्रोहः" तदनन्तरकालीना च स्थितिः

एकोनषष्ट्यधिकाष्टादशशततमस्य (1859) वर्षस्य मार्चमासे च बङ्गप्रान्तस्य सहस्राधिकाः कृषकाः नीलस्य कृषिं न करिष्यामः इति उक्तवन्तः। यथा विद्रोहः विस्तारं गतः, तथा कृषकाः उक्तवन्तः यत् वयम् उद्यानस्वामिभ्यः करं न दास्यामः। ते खड्गैः कुन्तैः शरादिभिः च नीलोद्योगकार्यागाराणि अभिलक्ष्य आक्रमणम् आरब्धवन्तः। महिलाः स्वगृहपात्राणि दात्राद्युपकरणानि च आदाय युद्धे भागं नीतवत्यः। उद्यानस्वामिनां सन्निधौ ये जनाः कार्यं कुर्वन्ति स्म क्रान्तिकारिभिः तादृशानां जनानाम् अपि सामाजिकरूपेण बहिष्कारः कृतः। उद्यानस्वामिनां पक्षतः ये राजस्वसचिवाः राजस्वं सङ्ग्रहीतुं गच्छन्ति स्म तेषाम् अपि क्रान्तिकारिभिः ताडनं कृतम्। कृषकैः शपथः नीतः यत् ते न तु नीलकृषिकार्याय ऋणं स्वीकरिष्यन्ति न च उद्यानस्वामिभिः नियुक्तसैनिकेभ्यः भयं प्राप्स्यन्ति इति।

नीलकृषकाः मौनेन स्थातुं सन्नद्धाः न आसन्। किमर्थम् ? ते विद्रोहाय शक्तिं कुतः प्राप्नुवन्तः ? अत्र कश्चित् अपि सन्देहः नास्ति यत् नीलकृषिकार्यम् अत्यन्तं दमनात्मकम् आसीत्। परन्तु ये जनाः पराभूताः पराधीनाः च भवन्ति ते सदैव विद्रोहं न कुर्वन्ति इति। एतादृशं कदाचित् एव भवति।

एकोनषष्ट्यधिकाष्टादशशततमे (1859) वर्षे नीलकृषकाः अनुभूतवन्तः यत् ते विद्रोहे उद्यानस्वामिनां स्थानीयभूस्वामिनां प्रमुखाणां चापि समर्थनं प्राप्तुं शक्नुवन्ति। ये प्रमुखाः अनेकेषु ग्रामेषु बलात् नीलानुबन्धे हस्ताक्षराणि कर्तुं बाध्याः कृताः तादृशाः प्रमुखाः एव नीलकृषकान् संघीकृत्य दण्डधारिभिः सह युद्धं कारितवन्तः। अनेकेषु स्थानेषु भूस्वामिनः कृषकान् विद्रोहाय प्रेरितवन्तः। ग्रामं ग्रामं गत्वा ते एतत् कार्यं कृतवन्तः। भूस्वामिनः एतस्मात् खिन्नाः आसन् यत् उद्यानस्वामिनां शक्तेः विस्तारः निरन्तरं भवति तथा च उद्यानस्वामिनः चिरकालात् बलात् च तेभ्यः भूमिम् अधिगृह्णन्ति स्म।

नीलकृषकाः एतद् अपि अनुभवन्ति स्म यत् आङ्ग्लसर्वकारः अपि अस्मिन् सङ्घर्षे तेषां साहाय्यं करिष्यति। सप्तपञ्चाशदधिकाष्टादशशततमात् (1857) विद्रोहात् परं ब्रिटिशसर्वकारः अन्यायाः विद्रोहस्य विभीषिकायाः भीतः आसीत्। यदा नीलकृषियुक्तजनपदेषु विद्रोहस्य इतोऽपि काचित् सूचना प्रसरिता तदा लेफ्टिनेण्ट-गवर्नरपदवाच्यः अधिकारी एकोनषष्ट्यधिकाष्टादशशततम-वर्षीये (1859) शीतकाले क्षेत्राणि परिभ्रमितवान्। कृषकाः अनुभूतवन्तः यत् सर्वकारः कृषकाणां दुर्दशातः खिन्नः अस्ति। प्रावृषि न्यायाधीशेन ऐशले-ईडनवर्येण काचित् अधिसूचना दत्ता, यत्र उक्तम् आसीत् यत् कृषकाः नीलानुबन्धं मन्तुं बाध्याः न करिष्यन्ते इति।

स्रोतः -२

नीलग्रामगीतम्

जनाः सङ्घर्षक्षणेषु परस्परम् उत्साहं विवर्धयन्तः ऐक्यभावं च जनयितुं प्रायः गीतानि गायन्ति। एतादृशैः गीतैः वयं तेषां मनोगतभावानां विषये अवजानीमः। नीलविद्रोहकाले बङ्गप्रान्तस्य निम्नवर्तिक्षेत्रेषु एतादृशानि बहूनि गीतानि श्रूयन्ते स्म। तेषु एकं गीतम् इत्थम् आसीत् –

ईश! (मौला) "हाती" इति पदवाच्यस्य उद्यानस्वामिनः दीर्घतमाः यष्टयः दूरे संघीभूय अपतन्,

कोलकात्तानगरीयाः लिपिकाः एतत् युद्धं द्रष्टुं नौकाभिः प्राप्तवन्तः।

अधुना तु सर्वे कृषकाः सज्जाः सन्ति, ते मौनपूर्वकं ताडनं न सहिष्यन्ते।

अधुना ते कृषकाः यष्टिधारिभिः सह पारस्परिकं युद्धम् अकृत्वा प्राणान् न त्यक्ष्यन्ति।

एतस्य वृत्तान्तस्य आधारेण जनेषु एषा सूचना प्रसृता यत् राज्ञीविस्टोरिया नीलकृषिकार्यं न भवेत् इति सूचनां दत्तवती । ईडनमहोदयः कृषकान् शमयितुं विस्फोटकस्थितीः च नियन्त्रयितुं प्रयतते स्म । तया विस्टोरियया यः आदेशः दत्तः तद्विषये कृषकाः चिन्तितवन्तः यत् अस्माकं विद्रोहस्य एव सा समर्थनम् अकरोत् ।

यथा विद्रोहः प्रसरितः, कलकत्तानगरस्य सुशिक्षिताः जनाः अपि "नील"जनपदान् प्रति प्रस्थितवन्तः । तादृशैः सुशिक्षितैः जनैः कृषकाणां दुर्दशायाः उद्यानस्वामिभिः च तेषाम् उपरि क्रियमाणस्य बलात्कारस्य अत्याचारिनीलव्यवस्थायाः च विषये लिखितम् ।

एतेन विद्रोहेण खिन्नमनाः सर्वकारः उद्यानस्वामिनां रक्षार्थं सेनाम् आह्वयत् । नीलोत्पादनस्य व्यवस्थायाः निरीक्षणाय एकः "नीलायोगः" अपि स्थापितः । एतेन "नील" आयोगेन निर्णीतं यत् उद्यानस्वामिनः दोषिणः सन्ति, बलात्कारपूर्वकं ते श्रमिकैः कार्याणि कारयन्ति एतदर्थं तेषाम् आलोचनम् अपि कृतम् । आयोगेन कथितं यत् नीलकृषिद्वारा कृषकाः लाभं न प्राप्नुवन्ति । आयोगेन कृषकाः उक्ताः यत् ते वर्तमानानुबन्धान् पूर्तिं नयन्तु, परन्तु अग्रे यदि ते इच्छन्ति तर्हि नीलकृषिकार्यस्य स्थगनम् अपि कर्तुं शक्नुवन्ति ।

एतस्य विद्रोहस्य पश्चात् उद्यानेषु नीलस्य उत्पादनं सर्वथा नष्टम् । तदनन्तरम् उद्यानस्वामिनः बिहारस्य उपरि अवधानं कृतवन्तः । एकोनविंशतिशताब्दस्य (21) अन्ते कृत्रिम-रङ्गानां निर्माणम् आरब्धम् । तस्मात् "नील"व्यवसायः अतीव प्रभावितः । पुनरपि उद्यानस्वामिनः नीलस्य उत्पादनं वर्धयितुं च सफलाः । यदा महात्मगान्धी दक्षिणाफ्रीकातः स्वदेशं प्रत्यागतः तदा बिहारस्य कश्चित् कृषकः तं चम्पारणम् आगन्तुं नीलकृषकाणां दुर्दशां च द्रष्टुम् आहूतवान् । सप्तदशाधिक-एकोनविंशतिशततमे (1917) वर्षे महात्मगान्धिनः एषा चम्पारण-यात्रा नीलोद्यानस्वामिनः विरुध्य "चम्पारण"आन्दोलनस्य रूपेण आरब्धा ।

स्रोतः-३

भिक्षाटनं करिष्यामि परन्तु "नीलोत्पादनं न करिष्यामि"

चान्दपुरम्, थानाहरदी इत्यस्य हाजीमुल्लानामधेयेन केनचित् नीलकृषकेण सह मङ्गलवासरे जूनमासस्य पञ्चमे दिनाङ्के षष्ट्यधिकाष्टादशशततमे (1860) च वर्षे आयोगसदस्याः वार्तालापम् अकुर्वन् ।

हाजीमुल्लाः केषाञ्चित् प्रश्नानाम् प्रत्युत्तरे इत्थं प्रतिपादितवान् –

डब्ल्यू.एस.सीटनकारः, "नील"आयोगस्य अध्यक्षः – किं भवान् नीलकृषिकार्याय सज्जः अस्ति ? यदि नैव, तर्हि कासां प्रतिभूतीनाम् अथवा सन्धीनाम् अनुगुणं कृषिकार्यं कर्तुम् एषिष्यति ?

हाजीमुल्लाः - अहं नीलस्य उत्पादनाय सज्जः नास्मि । अहं न जाने यत् काऽपि नूतना प्रतिभूतिः मां सन्तुष्टं कर्तुं शक्नोति ।

श्रीसालेवर्यः- किं भवान् प्रत्येकं चयस्य प्रतिवर्ते एकरूप्यकस्वीकरणेन अपि कृषिकार्यं न कर्तुम् इच्छति ?

हाजीमुल्ला – नैव, अहं न कर्तुं शक्ष्यामि । नीलस्य उत्पादनं परित्यज्य अहं किमपि अन्यत् कार्यार्थम् अन्यत्र गमिष्यामि । भैक्ष्यम् आचरिष्यामि परन्तु नीलोत्पादनं न करिष्यामि ।

"नील" आयोग-समाख्या,खण्डः-२,सबूतनामा इति ,पृ.६७ ।

➢ गतिविधिः

कल्पनां कुर्वन्तु, भवन्तः नीलायोगस्य समक्षे साक्ष्याणि प्रस्तुवन्ति । डब्ल्यू. एस.सीटनकर-महोदयः भवन्तं पृच्छति – " कृषकाः कस्याम् अवस्थायां नीलस्य कृषिं कर्तुं शक्नुवन्ति ? " भवतां प्रत्युत्तरं किं भविष्यति ?

अन्यत्र –

वेस्ट-इण्डीज-देशे नीलोत्पादनम्

अष्टादशशताब्दस्य आरम्भे केनचित् फ्रांसदेशीयेन धर्मप्रचारकेण जौं-बेपतिस्त-लबात-महोदयेन कैरीबियायी-द्वीपानां भ्रमणं कृतम् । भ्रमित्वा तेन एतस्य क्षेत्रस्य विषये विस्तरेण लिखितम् । इदं चित्रं लबातमहोदयस्य कस्माच्चित् पुस्तकात् गृहीतम् अस्ति । एतस्मिन् चित्रे अत्रत्येषु फ्रांसीयेषु उद्यानेषु नीलोत्पादनस्य सर्वाः प्रक्रियाः दर्शिताः सन्ति । वामभागे भवन्तः द्रष्टुं शक्नुवन्ति यत् क्रीतदासश्रमिकाः नीलपादपानां चयान् "सेटलरवट" इत्यस्मिन् पात्रविशेषे निपातयन्ति। कश्चित् अन्यः श्रमिकः केनचित् यन्त्रीय-वयन-चक्रेण द्रवपदार्थं (घोल इत्येतं) परिभ्रामयति। दक्षिणतः द्वितीयः श्रमिकः अपि ताम् एव

क्रियां करोति । द्वौ श्रमिकौ नीलस्य सघनीभूतपदार्थं (लुगदी इत्येतम्) गोणीषु प्रपूर्य शोषयितुं नयतः । अग्रिमभागे द्वौ श्रमिकौ नीलस्य सघनीभूतपदार्थम् अथवा आर्द्रगोलकम् (लुगदी) मेलयित्वा प्रारूपयन्त्रेषु (सांचा इति) निपातयितुं सज्जीकुरुतः । चित्रस्य मध्ये उद्यानस्वामी उन्नतस्थाने स्थित्वा सर्वेषां क्रीतदासानां निरीक्षणं करोति ।

पुनः स्मरन्तु –

१. निम्नलिखितस्य युग्म कुर्वन्तु –

२.	कृषकः (रैयत)	-	ग्रामसमूहः ।
३.	महाल(ग्रामसमूहः)	-	कृषकः (किसान)।
४.	निजः	-	कृषकभूमौ कृषिः (रैयतों की जमीन पर खेती)।
५.	कृषिकार्यम् (रैयती)	-	उद्यानस्वामिनां नैजभूमौ कृषिः ।

२. रिक्तस्थानानि पूरयत –

(क) यूरोपे "वोड" इत्यस्य उत्पादकाः --------- इत्यस्मात् स्वीयायस्य हानेः विभ्यति स्म ।

(ख) अष्टादशशताब्दस्य समाप्तौ ब्रिटेने "नील"-पदार्थम् अभिलक्ष्य अभ्यर्थना -------कारणात् वर्धितुम् आरब्धा ।

(ग) ..... अन्वेषणात् प्राक् नीलस्य अन्ताराष्ट्रियाभ्यर्थनायां कुप्रभावः जातः ।

(घ) चम्पारणान्दोलनं -------- विरुधम् आसीत् ।

आगच्छन्तु, कल्पयामः

कश्चित् कृषकः नीलोत्पादनाय बाध्यः क्रियते, उद्यानस्वामिकृषकयोर्मध्ये जातस्य वार्तालापस्य कल्पनां कुर्वन्तु। कृषकं प्रसीदयितुम् उद्यानस्वामी किं कारणं वक्ष्यति ? कृषकः कं तर्कम् उपस्थापयिष्यति ? एतयोः कृषकोद्यानस्वामिनोः पारस्परिक-संवादम् अभिनयद्वारा दर्शयन्तु।

आच्छन्तु विचारयामः –

३. स्थायिभूप्रबन्धनस्य मुख्यपक्षाणां वर्णनं कुर्वन्तु।

४. "महालवारी"व्यवस्था स्थायिभूप्रबन्धस्य अपेक्षया कथं पृथक् आसीत् ?

५. राजस्वनिर्धारणस्य नूतनायाः "मुनरो"व्यवस्थायाः कारणात् उत्पन्नयोः द्वयोः समस्ययोः विषये ज्ञापयन्तु।

६. कृषकाः नील-कृषि-कार्यं किमर्थं न कर्तुम् इच्छन्ति स्म ?

७. कासु परिस्थितिषु बङ्गप्रान्ते नीलस्य उत्पादनं सर्वथा नष्टम् ?

आगच्छन्तु कृत्वा पश्यामः –

८. चम्पारणान्दोलने महात्मगान्धिनः भूमिकायाः विषये इतोऽपि सूचनाः एकत्रीकुर्वन्तु।

९. भारतस्य आरम्भिकाणां चाय-कफघ्नी-उद्यानानाम् इतिहासं परिशीलयन्तु। जानन्तु यत् एतेषाम् उद्यानानां श्रमिकानां नीलोद्यानश्रमिकानां च मध्ये काः समानताः काः च विभिन्नताः आसन् ?

इति तृतीयोऽध्यायः

४ आदिवासी, दीकुः, एकस्य स्वर्णयुगस्य परिकल्पना च

पञ्चाशीत्यधिकाष्टा-दश-शत-तमे वर्षे (1885) बिरसानामधेयः कश्चित् जनः झारखण्डे छोटानागपुरस्य वनेषु ग्रामेषु च परिभ्रमन् दृष्टः । जनाः कथयन्ति स्म यत् तस्य समीपे अलौकिक्यः शक्तयः सन्ति इति - सः सर्वान् रोगान् अपाकर्तुं शक्नोति लघुचयं च पि अनेक-गुणितं कर्तुं शक्नोति । बिरसा-महोदयः स्वयम् अघोषयत् – यत् अहं जन-रक्षार्थं तान् बाह्यजनेभ्यः (दीकुजनेभ्यः) च मोचयितुम् ईश्वरेण प्रेषितः अस्मि । किञ्चित्-कालानन्तरं सहस्राधिकाः जनाः बिरसाम् अनुगन्तुम् आरब्धवन्तः । ते तम् ईश्वरं मन्यन्ते स्म । जनाः तस्मिन् विश्वसन्ति स्म यत् बिरसामहोदयः तेषां समस्यानां समाधानाय आगतवान् इति ।

बिरसा-महोदयस्य जन्म एकस्मिन् मुण्डा-परिवारे अभवत् । "मुण्डा-समुदायः" इति कश्चित् जनजातीय-समुदायः अस्ति - यः छोटा-नागपुर इति स्थाने निवसति । बिरसा-महोदयस्य समर्थकेषु तस्य क्षेत्रस्य अन्ये आदिवासिनः संथाल-उरांबादयः अपि सम्मिलिताः । एते सर्वे अपि आदिवासिनः स्वपरिवेशे आगतैः परिवर्तनैः आङ्ग्ल-शासनस्य च कारणात् उत्पद्यमानाभिः समस्याभिः च अवसाद-ग्रस्ताः आसन् । आदिवासिनां पारम्परिक-जीवन-पद्धतिः नश्यन्ती दृश्यते स्म, तेषाम् आजीविका नष्टप्राया धार्मिक-व्यवस्था च ह्रास-पथे आसीत् ।

बिरसा-महोदयः कासां समस्यानां समाधानं कर्तुम् इच्छति स्म ? ये "दीकू" इति उच्यन्ते स्म, ते बाह्याः जनाः के आसन् ? तैः बाह्यजनैः कथं क्षेत्रीयजनाः क्रीतदासाः कृताः आसन् ? आङ्ग्लीयानां शासने आदिवासिभिः सह कीदृशः व्यवहारः क्रियते स्म ? आदिवासिनां जीवनं कथं परिवर्तते स्म ? एतस्मिन् अध्याये वयम् एतादृशानाम् एव केषाञ्चित् प्रश्नानां विषये विचारं करिष्यामः ।

गतवर्षे भवद्भिः आदिवासि-समुदायस्य विषये पठितम् । प्रायः समुदायस्य (कबीला) रीतयः परम्पराः च ब्राह्मणैः निर्दिष्ट-रीतिभ्यः अतीव पृथक् आसन् । एतेषु समाजेषु एतादृश्यः गहनाः सामाजिक-भिन्नताः अपि न आसन् याः वर्णे आधारितेषु समाजेषु दृश्यन्ते । सर्वे जनाः समुदायस्य नियमाधीनाः आसन् । परन्तु एतस्य अयम् अभिप्रायः अपि नास्ति यत् आदिवासिनां मध्ये कश्चित् आर्थिकः सामाजिकः च भेदः न आसीत् एव ।

चित्रम्-१ उडीसायाः डोङ्गरिया-कन्ध-समुदायस्य महिलाः नदीमार्गेण विपणिं गच्छन्ति ।

जनजातीयसमूहाः कथं जीवन्ति स्म ?

एकोन-विंशति-शताब्दं यावत् देशस्य विभिन्नभागेषु आदिवासिनः विभिन्नेषु गतिविधिषु सक्रियाः आसन्।

केचन झूमकृषिं कुर्वन्ति स्म -

आदिवासि-समुदायेषु केचन समुदायाः झूमकृषिं कुर्वन्ति स्म, झूमकृषिः "यायावरीयकृषिः" भवति। एतादृशं कृषिकार्यम् अधिकांशतः प्रायः वनस्थेषु लघु-भूखण्डेषु क्रियते स्म। झूम-कृषकाः भूमिं यावत् आतपम् आनेतुं वृक्षाणाम् उपरितनं भागं कर्तित्वा भूमौ उत्पन्नानि अनावश्यकानि तृणादिकानि प्रज्वाल्य स्वच्छीकुर्वन्ति स्म। तदनन्तरं ते तृणावशिष्ट-भस्म रिक्त-भूमौ विकिरन्ति स्म। अस्मिन् भस्मनि "पोटाश" इति पदार्थः (द्रव्यं) भवति स्म, तस्मात् मृत्तिका ऊर्वरा भवति स्म। ते परशुना वृक्षान् कृन्तन्ति स्म, खनित्रेण च भूमेः उपरितलं (सतह) खनन्ति स्म। झूम-कृषकाः केवलं बीज-वपनं कुर्वन्ति स्म, भूमिं वृषभहलादिभिः च न कर्षन्ति स्म। यदा एकदा सस्यं पचति स्म तदा ते तत् कर्तित्वा अपरं स्थानं गच्छन्ति स्म। यस्यां भूमौ तैः सद्य एव सस्यं कर्तितं भवति स्म सा भूमिः अनेकानि वर्षाणि यावत् "अकृष्टपच्या" इति रूपेण तिष्ठति स्म।

यायावरीय-कृषकाः मुख्यरूपेण पूर्वोत्तरस्य मध्यभारतस्य च पर्वतीयासु वन्योपत्याकासु एव निवसन्ति स्म। एतेषाम् आदिवासि-समुदायस्थानां जनानां जीवनं वनेषु अबाध-गत्या भ्रमण-पुरःसरं चलति स्म, एते च सस्यानि उत्पादयितुं भूमेः वनानां च प्रयोगं कुर्वन्ति स्म। आदिवासि-सामुदायिकाः जनाः यायावर-प्रवृत्त्या एव कृषिकार्यं कर्तुं शक्नुवन्ति स्म।

अकृष्टपच्या भूमिः - (परती) - भूमेः उर्वरा-शक्तिं वर्धयितुं स्वल्पकालाय सस्यस्य उत्पादनेन विना एव भूमिः रिक्ता स्थाप्यते स्म तदा सा "अकृष्टपच्या" (परती) इति शब्देन कथ्यते स्म।

सालवृक्षः (साल) - कश्चित् वृक्षविशेषः।

मधुद्रुमः (महुआ) इति - कश्चित् पुष्पविशेषः यः भक्ष्यते अथवा मदिरां निर्मातुं प्रयुज्यते।

केचन आखेटकाः संग्राहकाः च आसन्

अनेकेषु क्षेत्रेषु आदिवासि-समूहाः पशूनाम् आखेटं कृत्वा तथा च वन्योत्पादान् संगृह्य स्वकार्यं साधयन्ति स्म। ते तेषां जीवनाय वनानि नितान्तम् आवश्यकानि इति मन्यन्ते स्म। उत्कल-प्रान्तस्य वनेषु खोण्डनामकः समुदायः एतादृशः एव कश्चित् समुदायः आसीत्। एतस्य समुदायस्य जनाः परस्परं सङ्घीभूय आखेटं कुर्वन्ति स्म आखेटद्वारा यत् किमपि प्राप्यते स्म परस्परं तत् वण्टयन्ति स्म। ते वन्यफल-मूलानि खादन्ति स्म। ते सालवृक्षस्य मधुद्रुमस्य च बीजेभ्यः तैलं निष्कासयन्ति स्म तस्य च प्रयोगं कुर्वन्ति स्म। ते चिकित्सार्थम् अनेकानि वन्यानि औषधानि प्रयुञ्जते स्म तथा च अनेकानि वन्यानि वस्तूनि संगृह्य स्थानीय-महाहट्टेषु अपि विक्रीणन्ते स्म। यदा स्थानीयाः तन्तुवायाः चर्मकाराः च वस्त्रस्य चर्मणः च रङ्गनाय रङ्गस्य आवश्यकताम् अनुभवन्ति स्म तदर्थं च यदा कुसुमस्य पलाशस्य च पुष्पाणि आवश्यकानि भवन्ति स्म तदा ते तन्तुवायाः चर्मकाराः च खोण्डसमुदायस्य जनान् कथयन्ति स्म यत् ते एतानि वस्तूनि आनीय तेभ्यः दद्युः इति।

चित्रम् -२ - डोङ्गारिया-कन्ध-कुटुम्बस्य महिलाः पण्डानुवृक्षस्य पत्राणि एकत्रीकृत्य नयन्ति। एतैः पत्रैः पर्ण-पात्राणि निर्मीयन्ते।

एते समुदायाः तण्डुलान् अन्यानि अन्नानि च कुतः प्राप्नुवन्ति स्म ? बहुधा तु वस्तुविनिमयेन कार्यं साधयन्ति स्म । ते स्वबहुमूल्यानां वन्योत्पादानां विनिमयेन निजावश्यकतानुगुणं वस्तुनि स्वीकुर्वन्ति स्म । कदाचित् तैः आवश्यकवस्तूनि क्रेतुं स्वस्य स्वल्पायस्य अपि आश्रयः स्वीकरणीयः भवति स्म । तेषु अनेके जनाः पार्श्वस्थेषु ग्रामेषु सेवाकार्यं कुर्वन्ति स्म । कश्चित् भारं वहति स्म अपि च कश्चित् राजमार्गाणां निर्माणकार्येषु सेवाकार्यं करोति स्म । अनेके आदिवासिनः क्षेत्रश्रमिकाः आसन् । यदा वन्योत्पादाः न्यूनाः भवन्ति स्म तदा तैः कष्टेन वृत्तिः प्राप्यते स्म । परन्तु तेषु अनेके समुदायाः यथा मध्यभारतस्य बैगासमुदायः - श्रमिकरूपेण कार्यं कर्तुं न इच्छति स्म । बैगा-समुदायस्य जनाः आत्मानं वनस्य सन्तत्तिरूपेण मन्यन्ते स्म अतः ते वन्योत्पादैः एव जीवितुं शक्नुवन्ति । श्रमिकरूपेण कार्यकरणं बैगाजनानां कृते अपमानपूर्णम् आसीत् ।

चित्रम् ३ – भारते कानिचन आदिवासिक्षेत्राणि

यानि वस्तूनि पार्श्वस्थेषु क्षेत्रेषु न उत्पद्यन्ते स्म तानि वस्तूनि प्राप्तुम् आदिवासिनः क्रयणं विक्रयणं चापि कुर्वन्ति स्म । एतैः कारणैः कदाचित् आदिवासिनः वणिजां महाजनानां च उपरि आश्रिताः भवन्ति स्म । वणिजः विक्रयणार्थं वस्तूनि आनीय आयन्ति स्म अपि च अधिकमूल्येन वस्तूनि विक्रीणन्ते स्म । उत्तमर्णाः(सूदखोर) महाजनाः अपि आदिवासिनां कृते ऋणं तु यच्छन्ति स्म परन्तु तस्य कुसीदः अधिकः भवति स्म । इत्थम् अव्यवस्थित-पण-व्यवहारेण वाणिज्यप्रक्रियया च आदिवासिनः नितान्तम् अधर्मणाः निर्धनाः च जाताः । परिणामतः, आदिवासिनः महाजनाः वणिजः च बहिष्ठात् आगताः क्रूराः जनाः सन्ति ते एव अस्माकं सर्वासां समस्यानां कारणभूताः सन्ति इति दृष्ट्या आदिवासिनः तान् पश्यन्ति स्म ।

केचन पशून् पालयन्ति स्म -

अनेके आदिवासिसमूहाः पशून् पालयित्वा स्वजीवनस्य निर्वहणं कुर्वन्ति स्म । पशुचारकाः ऋतोः अनुसारं पशून् (अजमेषादियूथं) (रेबड इति एतम्) इतस्ततः नीत्वा गच्छन्ति स्म । यदा एकस्य स्थानस्य घासादिकं समाप्तिं याति स्म तदा ते अपरं क्षेत्रं प्रति गच्छन्ति स्म । पञ्चनद-प्रान्तस्य पर्वतीयक्षेत्राणां वन्यगुर्जराः आन्ध्रप्रदेशस्य च लबाडियादि-समुदायस्य जनाः गो-महिष्यादिपशून् पालयन्ति स्म । हिमाचलप्रदेशस्य कुल्लूजनपदस्य गद्दीसमुदायस्य जनाः अजमेषपालकाः आसन् काश्मीरस्य च बकरबाल-समुदायस्य जनाः अजाः पालयन्ति स्म । अग्रिमवर्षे भवन्तः इतिहासस्य पाठ्यपुस्तके एतेषां विषये विस्तरेण पठिष्यन्ति ।

आखेटस्य, बीज-वपनस्य,नूतनक्षेत्रस्य च गमन-कालः

किं भवद्भिः कदाचित् एतस्मिन् विषये अवधानं कृतं यत् विविध-सामाजिकानां कार्याणि कार्यकरणसमयः कार्यविषयिणी च अवधारणा समाना न भवति ? विभिन्न-क्षेत्रेषु परिभ्रमणशीलादिवासिनाम् आखेटकानां च जीवनं विशिष्टप्रकारेण पुरुष-महिला-गतेन च कार्यविभाजनेन चलति स्म ।

ब्रिटिश-मानव-विज्ञानी वेरियर-ऐल्विनः त्रिंशदधिकैकोनविंशतिशत-चत्वारिंशदधिकैकोनविंशतिशततमदशकयोः (1930-1940) अनेकानि वर्षाणि यावत् मध्यभारतस्य बैगा-खोण्ड-समुदाययोर्मध्ये यापितानि आसन् । ऐल्विन-द्वारा-लिखितान् निम्नलिखितांशान् पठित्वा वयम् एतं समयक्रमं कार्यविभाजनं चापि अवगन्तुं शक्नुमः । सः लिखति –

> चैत्रमासे महिलाः ---एकत्रीकरणाय अपि च अवशिष्टस्थाणून् कर्तयितुं च गच्छन्ति स्म । पुरुषाः विशालान् वृक्षान् कर्तयन्ति स्म आखेटाय च गच्छन्ति स्म । आखेटः पूर्णिमायाः पूर्वकालात् आरभते स्म । आखेटाय वंशपाशानां प्रयोगं कुर्वन्ति स्म । महिलाः सागो इत्यस्य तिन्तिड्याः कवकादिकस्य च फलानि संगृह्य आनयन्ति स्म । बैगा-महिलाः केवलं कन्दमूलानि संगृह्णन्ति अथवा मधुद्रुमस्य बीजानि एकत्रीकुर्वन्ति । मध्यभारतस्य वैगावासिनः उत्तमाः आखेटकाः इति मन्यन्ते स्म---। वैशाखे वनानि प्रज्वाल्यन्ते स्म । महिलाः अर्धज्वलितानि काष्ठानि ईन्धनाय चिन्तवन्ति स्म । पुरुषाः आखेटाय निरन्तरं गच्छन्ति स्म परन्तु ग्रामाद् दूरं न गच्छन्ति स्म । ज्येष्ठमासे बीजवपनं भवति स्म आखेटः च चलति स्म । आषाढमासतः भाद्रपदमासं यावत् पुरुषाः क्षेत्रेषु कार्यं कुर्वन्ति स्म । आश्विनमासे बीजकोशाः बीजपुटानि च जायन्ते स्म । तथा च कार्तिकमासे च कुटकी इत्यस्य पचनं भवति स्म । मार्गशीर्षमासे सर्वाणि सस्यानि पचन्ति स्म तथा च पौषमासे बुशनिष्कासनम् (फटकन) अथवा परिशोधनं च क्रियते स्म । नृत्यगानादिकं विवाहाः चापि पौषमासे एव भवन्ति स्म । माघमासे पुरुषाः नूतन-यायावरीय-कृषिं कर्तुम् अन्यत् स्थानं गच्छन्ति स्म । एतस्मिन् काले आखेटः वस्तूनां सङ्ग्रहः एव जीवनस्य मुख्यसाधनं भवति स्म ।

चित्रम् - ४ – ईन्धनाय कष्ठानि नयन्ती काचित् संथालबालिका, बिहारः, षट्चत्वारिंशदधिकैकोनविंशतिशततमवर्षम्, (1946) ।

बालाः वने जातस्य उत्पादनस्य एकत्रीकरणाय स्वमातृभिः सह वनं गच्छन्ति ।

एतत् चक्रं प्रथमवर्षीयं भवति स्म । द्वितीयस्मिन् वर्षे आखेटाय अधिकः कालः लभ्यते स्म यतो हि केवलं केषाञ्चित् एव सस्यानां बीजवपनं कर्तनं च भवति स्म । यतो हि भोजनं च तत्र तस्मिन् काले पर्याप्तं भवति स्म अतः पुरुषाः यायावरीयं जीवनमेव जीवन्ति स्म । तृतीये वर्षे भोजनाय वन्योत्पादानाम् अपि आवश्यकता अनुभूयते स्म ।

वेरियर-ऐल्विनद्वारा लिखितस्य बैगा एल्विन इत्येतयोः अप्रकाशितरचनायाः "नोट्स- आन- द-खोण्ड्स"(वेरियर-ऐल्विन-पेपर्स,नेहरु-स्मृति-संग्रहालयः पुस्तकालयः च) इत्यस्याः उपरि आधारितसूचना इयं विद्यते ।

➢ गतिविधिः

बैगा-समुदायस्य महिलाः पुरुषाः च यानि कार्याणि कुर्वन्ति तानि सावधानं पठन्तु । किं भवन्तः अत्र कमपि क्रमं पश्यन्ति ? तेषां जनानां कार्येषु कः भेदः आसीत् ?

केचन जनाः एकस्मिन् स्थाने एव कृषिकार्यं कुर्वन्ति स्म

एकोनविंशतिशताब्दात् पूर्वमेव अनेके जनजातीयाः कुटुम्बाः एकस्मिन् स्थाने एव स्थित्वा कृषिं कुर्वन्ति स्म । ते बहुधा स्थानस्य परिवर्तनम् अकृत्वा प्रतिवर्षम् एकस्मिन् एव स्थाने कृषिं कुर्वन्ति स्म । ते कृषिकार्याय हलानां प्रयोगम् आरब्धवन्तः अपि च शनैः शनैः ते भूम्यधिकारान् अपि प्राप्नुवन्ति स्म । अनेकेषु समुदायेषु छोटानागपुरस्य मुण्डाजनजातीयानां जनानाम् इव भूमिः सम्पूर्णस्य कुटुम्बस्य सम्पत्तिः भवति स्म । वंशस्य सर्वे सदस्याः तेषां मूलनिवासिनां वंशजाः इति मन्यन्ते स्म, यैः सर्वादौ तत्र आगत्य भूमेः सिद्धता अर्थात् स्वच्छता कृता । परिणामतः भूमौ सर्वेषाम् अधिकारः समानरूपेण भवति स्म। पुनरपि, प्रायः एवं भवति स्म यत् कुलस्य केचन जनाः अन्येभ्यः अधिकाः शक्तिसम्पन्नाः भवन्ति स्म । केचन प्रमुखत्वेन जायन्ते स्म अन्ये च तेषाम् अनुयायिनः भवन्ति स्म । ये शक्तिशालिनः भवन्ति स्म ते स्वयं कृषिकार्यं न कुर्वन्ति स्म अपितु प्रायः स्वभूमेः कर्षणं ते राशिभागप्रक्रियाद्वारा(बटाई) अन्यैः कारयन्ति स्म ।

ब्रिटिशाधिकारिणः गोण्ड-संथालसदृशान् स्थायिरूपेण एकस्मिन् स्थाने वास्त्व्यादिवासि-समूहान् आखेटकसंग्राहकाणां यायावरीय-कृषक-समूहानां च अपेक्षया अधिकसभ्यान् मन्यन्ते स्म। वने भवाः वन्याः तथा च ते क्रुराः इति मन्यन्ते स्म। आङ्ग्लीयाः ऊहन्ते स्म यत् वन्यजनानां स्थायिरूपेण एकस्मिन् स्थाने एव तेषां वासः कारणीयः अपि च ते अपि सभ्याः करणीयाः इति आवश्यककार्यमस्ति ।

औपनिवेशैकेन शासनेन आदिवासिनां जीवने के प्रभावाः जाताः ?

ब्रिटिशशासस्य काले आदिवासिसमूहानां जीवनं परिवर्तितम् । आगच्छन्तु पश्यामः यत् एतानि परिवर्तनानि कानि आसन् ।

आदिवासिप्रमुखानां किम् अभवत् ?

आङ्ग्लीयानाम् आगमनात् प्राक् अनेकेषु क्षेत्रेषु आदिवासि-प्रमुखाणां महत्त्वपूर्णस्थानं भवति स्म । तेषां पार्श्वे अन्येषाम् अपेक्षया अधिका शक्तिः भवति स्म तथा च ते स्वक्षेत्रे नियन्त्रणं स्थापयति स्म । अनेकेषु स्थानेषु तेषां स्वकीयम् आरक्षिदलं भवति स्म तथा च ते भूमेः वन्यप्रबन्धस्य च स्थानीयनियमान् स्वयं निर्मान्ति स्म । ब्रिटिशशासनस्य अन्तर्गतम् आदिवासिप्रमुखाणां कार्याणि अधिकाराः च आधिक्येन परिवर्तितानि आसन्। ते केषुचित् ग्रामेषु तु भूमेः स्वामित्वं प्राप्तवन्तः परन्तु तेषां शासकीयाः शक्तयः तेभ्यः परिहृतानि तथा च ते ब्रिटिशाधिकारिभिः निर्मितान् नियमान् पालयितुं बाध्याः कृताः । तैः आङ्ग्लीयैः राजस्वं दातव्यं भवति स्म अपि च आङ्ग्लप्रतिनिधिरूपेण स्वसमूहानाम् उपरि अनुशासनं स्थापनीयं भवति स्म । पूर्वं तेषां पार्श्वे या शक्तिः आसीत् अधुना सा तेषां समीपे नासीत्, ते परम्परागतानि कार्याणि अधुना न कर्तुं शक्नुवन्ति स्म ।

यायावरशिल्पकाराणां किम् अभवत् ?

ये समूहाः इतस्ततः भ्रमन्ति स्म एकस्मिन् स्थाने स्थायित्वेन न तिष्ठन्ति स्म एतादृशैः समूहैः आङ्ग्लीयाः आत्मानं समस्यग्रस्ताः वयम् इति मन्यते स्म । आङ्ग्लीयाः इच्छन्ति स्म यत् आदिवासिनः एकस्मिन् स्थाने स्थायिरूपेण उषित्वा कृषिकार्यं कुर्वन्तु इति ।

यायावरीयाः कृषकाः (बेवड इति) - मध्यप्रदेशे यायावरीयकृष्यर्थं प्रयुज्यमानः शब्दः ।

चित्रम्- ५ पूर्वोत्तरस्य निशि-आदिवासिनाम् एकस्मिन् ग्रामे (यूपैः) तरुस्कन्ध-निर्मितगृहम् ।

यदा एतानि गृहाणि निर्मीयन्ते तदा सम्पूर्णग्रामः साहाय्यं करोति ।

चित्रम् -६- गुर्जरप्रान्तस्य कस्मिंश्चित् जङ्गले कृषिं कुर्वत्यः भील-महिलाः ।

यायावरीय-कृषिः गुर्जरप्रान्तस्य अनेकेषु वनक्षेत्रेषु अधुना अपि भवति । भवन्तः द्रष्टुं शक्नुवन्ति यत् अत्र वृक्षाः कर्तिताः, तथा च कृष्यर्थं भूमेः सिद्धता अपि कृता अस्ति ।



स्थायिकृषकाणां नियन्त्रणं सरलम् आसीत् । आङ्ग्लीयाः स्वशासनाय आयस्य नियमितस्रोतः अपि इच्छन्ति स्म । परिणामतः ते भूमि-विषयकान् काञ्चान् अधिनियमान् क्रियान्वयितान् अकुर्वन्। ते भूमिं मापयित्वा प्रत्येकं जनस्य सहभागितां सुनिश्चितवन्तः । तैः एतदपि निश्चितं यत् कस्मात् जनात् कियत् राजस्वं स्वीकरणीयं स्यात् । केचन कृषकाः भूस्वामिनः सन्ति अपि च केचन निरूपितमूल्यवन्तः अथवा (पट्टेदार) इति पदवाच्याः भविष्यन्ति इति तैः घोषितम् । यथा भवन्तः पूर्वं द्वितीयाध्याये दृष्टवन्तः । निरूपितभूमिकाः (पट्टेदार) स्वभूस्वामिभ्यः शुल्कं यच्छन्ति स्म भूस्वामिनः च सर्वकाराय राजस्वं यच्छन्ति स्म ।

झूमकृषकाः स्थायित्वेन कृषिकार्यं कुर्युः इति तदर्थम् आङ्ग्लीयैः कृतप्रयासः अधिकः सफलः न अभवत् । यत्र जलं न्यूनं स्यात् भूमिः च शुष्का भवेत् तत्र हलैः कृषिकार्यं सरलं न भवति । अपितु हलानां साहाय्येन ये कृषकाः कृषिं कुर्वन्ति तेषां हानिरेव अभवत्, यतो हि तेषां क्षेत्रेषु समीचीनम् उत्पादनं न भवति स्म । अतः पूर्वोत्तर-राज्यानां झूमकृषकाः परम्परागत-रूपेण एव जीविष्यामः इति विषये ते आग्रहवन्तः आसन् । व्यापक-विरोधस्य पश्चात् आङ्ग्लीयैः तेषाम् अभ्यर्थना स्वीकृता अपि च एतादृशेभ्यः कुटुम्बेभ्यः वन्यस्य केषु भागेषु कृषिं कर्तुम् अनुमतिं दत्तवन्तः ।

वन्याधिनियमाः तेषां प्रभावः च

यथा भवद्भिः दृष्टम्, आदिवासि-समुदायस्य जीवनं वनसम्बद्धम् आसीत्, अतः वन्याधिनियमेषु जातानां परिवर्तनानां कारणात् आदिवासिनां जीवने अपि अतीवः प्रभावः जातः ।

चित्रम्- *आन्ध्रप्रदेशे धान्यकृषिक्षेत्रे कार्यं कुर्वन्तः आदिवासिनः ।*
समतल-क्षेत्रेषु वनेषु धान्यस्य कृष्यान्भ्यन्तरे परिवर्तनं पश्यतु ।

आङ्ग्लीयैः सम्पूर्णेषु वनेषु स्वनियन्त्रणं स्थापितम् आसीत्, वनानि राज्यस्य सम्पत्ति-रूपाणि सन्ति इति तैः घोषितम् आसीत् । कानिचन वनानि आरक्षितानि सन्ति इति तानि घोषितानि आसन् । एतानि एतादृशानि वनानि आसन् यत्र आङ्ग्लीयानाम् आवश्यकतापूर्तये भवनीयकाष्ठानि उत्पद्यन्ते स्म । एतेषु वनेषु जनानां स्वतन्त्ररूपेण भ्रमणस्य झूमकृषेः फलसंग्रहणस्य पशूनाम् आखेटस्य च अधिकारः नासीत् । एतस्याम् अवस्थायां झूमकृषकाः कथं जीवितुं शक्नुवन्ति स्म ? अतः, तेषु कार्यस्य प्राप्तेः बाध्यतावशात् कार्यस्य अन्वेषणाय वा अन्येषु क्षेत्रेषु गन्तुं बाध्याः जाताः ।

यदा आङ्ग्लीयैः वनेषु आदिवासिनः न वसितुम् अर्हन्ति इति अधिसूचना दत्ता अर्थात् प्रतिबन्धः च तत्र स्थापितः तदा तेषां पुरतः काचित् समस्या उत्पन्ना । समस्या इयम् आसीत् यत् रेलवे-पथाधाराय (स्लीपर्स इत्यस्मै) वृक्षाणां कर्तृणां व्यवस्था कुतः स्यात् अपि च इतस्ततः वृक्षान् नेतुम् अपि श्रमिकानां प्रबन्धः कुतः स्याद् इति ?

काष्ठस्थूणा- काण्डानि (स्लीपर) - काष्ठस्य ऋजु-पट्टिकाः येषाम् उपरि रेलयानस्य (पटरिया) अर्थात् मार्गे आच्छाद्यन्ते ।

औपनिवेशिकैः अधिकारिभिः एतस्याः समस्यायाः अपि समाधानम् अन्विष्टम् । तैः निश्चितं यत् झूम-कृषकेभ्यः वनेषु भूमेः लघुखण्डाः दास्यन्ते अपि च ते तत्र कृषिं कर्तुम् अपि अधिकृताः भविष्यन्ति परन्तु प्रतिभूतिः इयम् अस्ति यत् ये ग्रामीणाः सन्ति तैः वनविभागाय श्रमदानं करणीयं भविष्यति, वनानां च संरक्षणं करणीयं भविष्यति । अनेन प्रकारेण अनेकेषु क्षेत्रेषु वनविभागेन अनार्घ-श्रमस्य आवश्यकतायाः आपूर्तये वनेषु ग्रामाः स्थापिताः ।

स्रोतः -२

"आङ्ग्लीयानाम् अस्मिन् देशे जीवनं कठिनम् अस्ति"

त्रिंशदधिकैकोन-विंशति-शत-तम-दशके (1930) वेरियर-ऐल्विनः मध्यभारते स्थितानाम् बैगा-आदिवासिनां क्षेत्राणां भ्रमणं कृतवान् । ऐल्विनः एतेषां जनानां रीतीनां कलानां लोकसंस्कृतेः च विषये जिज्ञासते स्म । तेन वैगा-समुदायस्य जनानाम् अनेकानि गीतानि सङ्गृहीतानि येषु एतस्मिन् विषये दूषणम् आसीत् यत् आङ्ग्लीयानां शासने बैगासमुदायिनः कीदृश्यां दुर्दशायां सन्ति इति ।

एतस्मिन् आङ्ग्ल-शासिते देशे जीवनं कियत् कठिनम् अस्ति -
जीवनं कियत् कठिनम्,
भूस्वामी ग्रामे उपविष्टः,
उद्यानेषु ग्राम-भू-लेखकः
क्षेत्रेषु सर्वकारः
आङ्ग्ल-शासिते एतस्मिन् देशे जीवनं कियत् कठिनम् अस्ति
पशुकरं दातुं गोः विक्रयणं क्रियते,
वनकरं दातुं च महिषी विक्रीयते,
वृषभान् विक्रीय राजस्वं दीयते,
भोजनं कुतः प्राप्नुमः
आङ्ग्लशासिते अस्मिन् देशे

वेरियर-ऐल्विनः तथा च शामराव-हिवालेवर्यः,सांग्स-आफ-दि-मैकल,पृष्ठम् – (षोडशाधिकैकशतम् (316) इत्यस्मात् उद्धृतम् अस्ति ।

चित्रम्-८ – गोदारा-महिलाः वयन्त्यः सन्ति।

अनेकैः आदिवासि-समुदायस्य जनैः औपनिवेशिक-वनाधिनियमानां विरोधः कृतः। तैः उक्तं यत् वयं नूतनाधिनियमान् न पालयिष्यामः ते ताम् एव जीवन-शैलीम् अङ्गीकृतवन्तः सर्वकारेण या अवैधा इति घोषिता आसीत्। अनेकधाः तैः प्रत्यक्षतः दमनं विरुध्य विद्रोहः अपि कृतः। षडाधिकैकोन-विंशति-शत-तमवर्षे (1906) सोङ्ग्रम-संगमा-द्वारा असमे अपि च त्रिंशदधिकैकोन-विंशति-शत-तम-दशके (1930) मध्यप्रान्ते अपि अभवत् वन-सत्याग्रहाः एतादृशाः एव विद्रोहाः आसन्।

वाणिज्यस्य समस्या

एकोनविंशति-शताब्दे जनजातीय-समूहैः अनुभूतं यत् वणिजः महाजनाः च वनानि शीघ्रतया आगच्छन्ति। ते वन्योत्पादनं क्रेतुं प्रत्यक्षर्णदातुम् आदिवासिनः च वत्तौ नियोजयितुम् आगच्छन्ति स्म एतैः सर्वैः परिवर्तनैः के प्रभावाः अथवा दुष्प्रभावाः भविष्यन्ति इति विषयम् अवगन्तुम् आदिवासिनां कृते समयः अपेक्षितः आसीत्। इदम् अवगन्तुम् आगच्छतु कौशेयोत्पादकानां स्थितिं पश्यामः। अष्टादशशताब्दे भारतीयकौशेयस्य यूरोपीयविपणिषु आधिक्येन याचना आसीत्। भारतीयकौशेयस्य उच्चगुणवत्ता सर्वान् आकर्षयति स्म, तथा च निर्यातः तीव्रतया वर्धते स्म। यथा विपण्याः विस्तारः जातः ईस्ट-इण्डिया-संस्थायाः अधिकारिणः एताम् अभ्यर्थनां पूरयितुं कौशेयस्य उत्पादनाय बलाघातम् आरब्धवन्तः।

वर्तमान-झारखण्डे स्थितस्य हाजारीबागस्य पार्श्वेस्थेषु स्थानेषु संस्थाल-समुदायस्य जनाः कौशेयकीटान् पालयन्ति स्म। कौशेयवणिजः स्वशुल्कजीविनः प्रेष्य आदिवादिभ्यः ऋणं यच्छन्ति स्म अपि च तेषां कृमिकोशानां च सङ्ग्रहणं कुर्वन्ति स्म। सहस्रं कृमिकोशानां विनिमये त्रीणि चत्वारि वा रूप्यकाणि लभ्यन्ते स्म। एतदनन्तरं ते कृमिकोशाः बर्दवान-नगरं गयानगरं च प्रेष्यन्ते स्म, तत्र ते पञ्चगुणितेन अधिमूल्येन विक्रीयन्ते स्म। निर्यातकानां कौशेयोत्पादकानां च मध्ये मध्यस्थाः जनाः आधिक्येन लाभांशं प्राप्नुवन्ति स्म। कौशेयोत्पादकाः अत्यल्पं लाभं प्राप्नुवन्ति स्म। स्वाभाविकम् अस्ति यत् अनेके आदिवासि-समुदायाः विपणिं वणिजः च स्वस्य महान् शत्रुत्वेन मन्यन्ते स्म।

कटं वयन्ती काचित् हाजांगमहिला।

महिलाः गृह्यकार्येण सह क्षेत्रेषु यन्त्रागारेषु च अपि स्वबालान् सहैव आदाय गच्छन्ति स्म। तत्र च कार्यं करोति स्म।

चित्रम् १० - बिहारस्य प्रस्तराङ्गार (कोयला) -खनिकाः ।
विंशत्यधिकैकोन-विंशति-शत-तम-दशके (1920) बिहारस्य झरिया-रानीगंजयोः प्रस्ताराङ्गारागारेषु कार्यकर्तारः प्रायः पञ्चाशत् प्रतिशतं खनिकाः आदिवासिनः आसन् । अन्धेरी-दमघोंटू-आकारयोः गहनतायां कार्यकरणं न केवलं भयङ्करम् आसीत् अपितु शरीरस्य अपि क्षतिं करोति स्म। वस्तुतस्तु शरीरमेव तत्र समाप्तिं गच्छति स्म । विंशत्यधिकैकोन-विंशति-शत-तम-वर्षे (1920) देशस्य प्रस्तराङ्गाराकरेषु प्रत्येकं वर्षे विंशति-सहस्राधिकाः (20,000) श्रमिकाः म्रियन्ते स्म।

कार्यस्य अन्वेषणम्

कार्यस्य अन्वेषणाय ये आदिवासिनः गृहात् दूरं गच्छन्ति स्म तेषां स्थितिः तु इतोऽपि असमीचीना आसीत् एकोनविंशति-शताब्दस्य अन्तकालादेव चायस्य उद्यानानि विस्तारं गच्छन्ति स्म । खननोद्योगः अपि कश्चित् महत्त्वपूर्णः उद्योगः जातः आसीत् । असमस्य चायस्य उद्यानेषु झारखण्डस्य च प्रस्तराङ्गाराकरेषु कार्याय आदिवासिनः व्यापकसंख्यया तत्र प्रवेशिताः अर्थात् कार्ये नियोजिताः । एते जनाः संविदानां (ठेकेदार) माध्यमेन प्रवेश्यन्ते स्म । एते संवित्जनाः न केवलम् एतेभ्यः आदिवासि-श्रमिकेभ्यः न्यूनवेतनम् एव यच्छन्ति स्म अपितु तान् गृहं प्रति गन्तुम् अपि अवसरं न यच्छन्ति स्म ।

सामीप्यात् दर्शने सति

एकोनविंशति-विंशतिशताब्दावधौ देशस्य विभिन्नेषु भागेषु जनजातीय-सङ्घैः अनेकधा परिवर्तिनाम् अभिनियमान् विविध-प्रतिबन्धान् नूतनकर-व्यवस्थां महाजनद्वारा क्रियायाणं शोषणं च अभिलक्ष्य अनेकधा विद्रोहः कृतः । एकत्रिंशदधिकाष्टादश-शत-तम-द्वात्रिंशदधिकाष्टा-दश-शत-तम-दशकयोः (1831-1832) प्रस्तराङ्गारादिवासिनः अपि च पञ्चपञ्चाशदधिकाष्टा-दश-शत-तमवर्षे (1855) संथाल-समुदायिक-जनैः विद्रोहः कृतः । मध्यभारते बस्तर-विद्रोहः दशाधिकैकोनविंशतिशत-तमवर्षे (1910) अभवत् अपि च चत्वारिंशदधिकैकोन-विंशति-शत-तम-वर्षे (1940) महाराष्ट्रेषु अपि वर्लीविद्रोहः अभवत् । बिरसावर्यः यस्य आन्दोलनस्य नेतृत्वं करोति स्म सः अपि एतादृशः एव विद्रोहः आसीत् ।

➢ गतिविधिः

अवजानन्तु यत् प्रस्तराङ्गाराकरेषु कार्यस्वरूपं परिवर्तितम् अस्ति अथवा नैव । अवजानन्तु यत् प्रतिवर्षम् आकरेषु कति जनाः म्रियन्ते तथा च तेषां मृत्योः कानि कारणानि भवन्ति ।

रक्तरञ्जितौ मम स्कन्धौ

मुण्डादिवासिनां गीतेषु तेषां कष्टानि दृग्गोचराणि भवन्ति।

हा! तैल-पेषकस्य वृषभस्य इव रक्तरञ्जितौ मम स्कन्धौ

भूस्वामिनः दूताः अहोरात्रं मां तुदन्ति प्रलपामि अहम् इदमेव अहोरात्रम्

हा! इयम् एव मम स्थितिः!

मम निवासस्थानं निश्चितं नास्ति किमपि,

नासि मयि काचिदपि प्रसन्नता,

के.एस.सिंहः,बिरसा-मुण्डा-एंड-हिज-मूवमेंट,पृष्ठम्-१२

बिरसा-मुण्डा

बिरसा-महोदयस्य जन्म सप्तत्यधिकाष्टा-दशशत-तमदशकस्य (1870) मध्ये अभवत्। तस्य पिता निर्धनः आसीत्। बिरसा-महोदयस्य बाल्यकालः अजमेषाणां चारणेन वेणु-वादनेन स्थानीय-मल्लभूमिषु नृत्य-गानादि-कलाभिः च व्यतीतः । तस्य पालनादिकं मुख्यरूपेण बोहोण्डाख्यस्य स्थानस्य पार्श्वस्थेषु वनेषु अभवत्। निर्धनताग्रस्तेन बिरसा-महोदयस्य पित्रा कार्यस्य अन्वेषणाय स्थाने स्थाने विचरणीयं भवति स्म । बाल्यकाले एव बिरसा अतीते जातानां मुण्डा-विद्रोहाणां कथाः अशृणोत्। बिरसामुण्डाः अनेकधा समुदायस्य प्रमुखान् विद्रोहस्य आह्वानं कुर्वतः दृष्टवान्। बिरसावर्यस्य समुदायस्य जनाः तादृशस्य स्वर्णयुगस्य विषये आलपन्ति स्म परस्परं यदा मुण्डाजनाः दीकुजनानाम् उत्पीडनात् सर्वथा मुक्ताः आसन्। प्रमुखाः कथयन्ति स्म यत् एकदा पुनः तस्य समुदायस्य परम्परागताः अधिकाराः मुक्ताः भविष्यन्ति। ते आत्मानं क्षेत्रस्य मूलनिवासिनां वंशजाः मन्यन्ते स्म तथा च स्वभूमिविषयकं युद्धं युद्ध्यन्ते स्म, ते जनान् स्मारयन्ति स्म यत् तैः स्वकीयं साम्राज्यं पुनः प्रापणीयम् अस्ति इति।

बिरसामहोदयः स्थानीय-ईसायि-धर्मप्रचारकाणां विद्यालयं गन्तुम् आरब्धवान् यत्र सः ईसायि-धर्मस्य प्रचारकाणाम् उपदेशं श्रोतुम् अवसरं प्राप्नोत्। तत्रापि सः अशृणोत् यत् मुण्डासमुदायः स्वर्गस्य साम्राज्यं प्राप्तुं शक्नोति तथा च स्वकीयं परिहृतान् अधिकारान् पुनः प्राप्तुं शक्नोति। यदि ते स्वकीयां कुप्रवृत्तिं परित्यज्य ईसायि-धर्मावलम्बिनः भवन्तु तदा एतत् सर्वं भवितुं शक्नोति। अनन्तरकाले बिरसावर्येण कस्यचित् प्रख्यातस्य वैष्णव-धर्मप्रकारकस्य सान्निध्ये अपि जीवनं यापिताम्। तेन यज्ञोपवीतं धृतम् अपि च शुद्धता-दयादिविषये च बलाघातः कृतः।

स्वस्यां किशोरावस्थायाम् एव बिरसामहोदयः यया विचार-धारया परिचितः, तया विचारधारया सह अतीव प्रभावितः। बिरसा-महोदयस्य आन्दोलनम् आदिवासि-समाजस्य संशोधनस्य परिष्कारस्य च आन्दोलनम् आसीत्। सः मुण्डासमुदायम् आहूतवान् यत् सः मदिरापानं न कुर्यात् मदिरापानं परित्यजेत्, ग्रामान् स्वच्छीकुर्वन्तु मारण-मोहनोच्चाटनादिषु विश्वासं न कुर्युः। अत्र ध्यातव्यः अंशः एषः अस्ति यत् बिरसामहोदयेन ईसायि-धर्म-प्रचारकाणां हिन्दुभूस्वामिनां च निरन्तरं विरोधः कृतः। मुण्डावर्यः एतादृशान् जनान् बाह्यान् मन्यते स्म ते मुण्डासमुदायस्य जीवनशैलीं च नाशयन्ति इति दृष्ट्या तान् सः पश्यति स्म इति।

वैष्णवः- विष्णोः उपासकः वैष्णवः इति उच्यते।

पञ्चनवत्यधिकाष्टा-दश-शत-तमवर्षे (1895) बिरसाः स्वानुयायिनः आहूतवान् यत् ते स्वकीयं गौरवपूर्णम् अतीतं पुनर्जीवयितुं संकल्पं नयन्तु। बिरसावर्यः अतीतस्य एकस्यचित् एतादृशस्य स्वर्णयुगस्य-सतयुगस्य च चर्चां करोति स्म यदा मुण्डाजनाः सुजीवनं जीवन्ति स्म, तटबन्धान् बध्नन्ति स्म, प्राकृतिक-जल-प्रपातान् नियन्त्रयन्ति स्म, वृक्षारोपणं उद्यानानि च विकासयन्ति स्म,उदरपूर्तये कृषिं कुर्वन्ति स्म। तस्मिन् काल्पनिके युगे मुण्डाजनाः स्वज्ञातिनां रक्तरञ्जनं न कुर्वन्ति स्म। ते सत्यनिष्ठया जीवन्ति स्म जनाः एकदा पुनः स्वभूमौ एव कृषिं कुर्वन्तु, एकस्मिन् स्थाने ऐक्यभावेन स्थैर्येण च तिष्ठन्तु स्वस्वक्षेत्रेषु चैव कृषिकार्यं कुर्वन्तु इति।

आङ्ग्लीयाः बिरसान्दोलनस्य राजनैतिकोद्देश्येभ्यः बह्वधिकाः अवसादग्रस्ताः आसन्। एतस्य आन्दोलस्य उद्देश्यम् आसीत् यत् ईसायिजनान् महाजनान् हिन्दुभूस्वामिनः सर्वकारं च बहिष्कृत्य बिरसावर्यस्य नेतृत्वे मुण्डाराजस्थापितं भवेत् इति।

इदं मुण्डान्दोलनं ताः एव भूस्वाम्यादिशक्तीः मुण्डानां सर्वासां समस्यानां कष्टानां स्रोतोरूपेण मन्यते स्म । आङ्ग्लीयानां भूनीतयः तेषं परम्परागत-भूमिव्यवस्थां नष्टीकुर्वन्ति स्म, हिन्दूभूस्वामिनः महाजनाः च तेषां भूमीः परिहरन्ति स्म अपि च ईसायि-धर्मावलम्बिनः तेषां परम्परागतायाः संस्कृतेः आलोचनां कुर्वन्ति स्म ।

यदा आन्दोलनस्य विस्तारः आरब्धः तदा आङ्ग्लीयाः दृढस्य क्रियान्वयनस्य निर्णयम् अकुर्वन् । आङ्ग्लीयाः पञ्चनवत्यधिकाष्टा-दश-शत-तमवर्षे (1895) बिरसामहोदयं निगडितवन्तः तथा च तं विद्रोहस्य आरोपणैः द्वयोः वर्षयोः कृते निगृहीतवन्तः दण्डितवन्तः च ।

सप्तनवत्यधिकाष्टा-दश-शत-तम-वर्षे (1897) कारातः प्रत्यागमनस्य पश्चात् बिरसावर्यः जनसमर्थनं प्राप्तुं प्रतिग्रामं भ्रमितुम् आरब्धवान् । सः ग्रामजनान् उत्प्रेरयितुं परम्परागत-प्रतीकानां भाषायाः च प्रयोगम् अकरोत् । सः जनान् आह्वयति स्म यत् तस्य नेतृत्वे साम्राज्यस्य स्थापनायै "रावणान् अर्थात् (दीकूजनान् यूरोपीयजनान् च) नाशयन्तु । बिरसावर्यस्य अनुनायिनः दीकूजनान् यूरोपीय-सत्तायाः च प्रतीकान् नाशयितुम् आरब्धवन्तः । तैः आरक्षकालयानां ईसायिमन्दिराणां च उपरि आक्रमणानि कृतानि तथा च महाजनानां भूस्वामिनां च सम्पत्तीनाम् अपि हानिम् अकुर्वन् । श्वेतवैजयन्ती बिरसाराजस्य प्रतीकभूता आसीत् ।

एकोनविंशति-शत-तमे वर्षे (1900) बिरसावर्यस्य विसूचिकया मृत्युः अभवत् तथा च तेन सञ्चालितम् आन्दोलनम् अपि निष्क्रियम् अभवत् । एतत् आन्दोलनं द्वाभ्यां दृष्टिभ्यां महत्त्वपूर्णम् आसीत् । प्रथमम्- एतेन आन्दोलनेन औपनिवेशिकसर्वकारः एतादृशान् अधिनियमान् स्थापयितुं बाध्यः कृतः येषां माध्यमेन दीकूजनाः आदिवासिनां भूमौ सरलतया आधिपत्यं न स्थापयितुं शक्नुवन्ति स्म । अपरम् - एतेन आन्दोलनेन एकदा पुनः बोधितं यत् अन्यायस्य विरोधं कर्तुम् औपनिवेशिकस्य शासनस्य विरोधे स्वकोपं प्रकटयितुम् आदिवासिनः सक्षमाः सन्ति । तैः आदिवासिभिः स्वविशिष्ट-परम्पराभिः शैलिभिः रीतिभिः च स्वसंघर्षस्य च प्रतीकैः एतत्कार्यं साधितम् ।

अन्यत्र

अस्मभ्यं प्रत्यक्ष-धनस्य का आवश्यकता !

एतादृशानि बहूनि कारणानि सन्ति येषां कारणात् आदिवासिनः अन्ये सामाजिक-समूहाः च प्रायः विपण्याः कृते उत्पादनं न कर्तुम् इच्छन्ति । पापुआ-न्यू-गिनी इत्यस्य जनजातीये गीते एतस्य विषयस्य दिग्दर्शनं प्राप्यते यत् तत्रत्याः आदिवासिनः महाहट्टान् कया दृष्ट्या पश्यन्ति ।

कथयन्ति प्रत्यक्षधनं व्यर्थम् अस्ति तेन प्रयोजनं नास्ति, व्यर्थस्य अवकरस्य इव, वृष्ट्या अपि न एतत् रोद्धुं शक्यते कष्टानि जायन्ते,

एतेषां सर्वकारीयानां मठाधीशानां कृते अर्थात् अधिकारिणां कृते अहं सोत्साहं कार्यं किमर्थं कुर्याम्, किमर्थम् अहं नारिकेलवृक्षम् आरोक्ष्यामि ?

रोक-धन-सस्यानि (नकदी फसलें)

समीचीनानि सन्ति परन्तु श्रीमन्! मां बोधयतु यदि क्रेतुं किमपि नास्ति तर्हि अहं चिन्ताम् एव किमर्थं कुर्याम् ?

कोहेन, क्लार्क एवं हासवेल,सं.,दि इकानामी आफ सब्सिस्टेंस एग्रीकल्चर (सप्तत्यधिकैकोन-विंशति-शत-तम-वर्षम् -1970) , इत्यस्मिन् उद्धृतस्य गीतस्य उपरि आधारितम् ।

पुनः स्मरन्तु -

१. रिक्तस्थानानि पूरयन्तु -

(क) आङ्ग्लीयाः आदिवासिनः---------इति रूपेण वर्णितवन्तः ।

ख) झूमकृषौ बीजवपनस्य विधा -----इति उच्यते ।

ग) मध्यभारते ब्रिटिश-भूप्रबन्धस्य अन्तर्गतम् आदिवासिप्रमुखाः -------स्वामित्वं प्राप्तवन्तः ।

घ) असमस्य -----तथा च बिहारस्य ------इत्यस्मिन् कार्यं कर्तुम् आदिवासिनः गन्तुम् आरब्धवन्तः ।

आगच्छन्तु, कल्पयामः

मन्यन्ताम्, भवन्तः एकोनविंशति-शताब्दस्य वनग्राम-निवासिनः झूमकृषकाः सन्ति । भवन्तः कथिताः यत् यत्र भवन्तः उत्पन्नाः अधुना सा भूमिः भवतां नास्ति । आङ्ग्लाधिकारिभिः मिलित्वा भवन्तः तान् स्वसमस्यानां विषये ज्ञापयितुम् इच्छन्ति । भवन्तः तान् आङ्ग्लाधिकारिणः किं सूचयिष्यन्ति ?

२. उचितम् अथवा अनुचितं ज्ञापयन्तु –

क) झूम-कृषकाः भूमेः कर्षणं कुर्वन्ति बीजानि च वपन्ति ।

ख) वणिजः संस्थालेभ्यः कृषिकोषान् क्रीत्वा तान् च पञ्चगुणितेन अधिकमूल्येन विक्रीणन्ते स्म ।

(ग) बिरसा स्वानुयानिनः आहूतवान् यत् ते स्वस्य शुद्धीकरणं कुर्वन्तु इति, मद्यपानं त्यजन्तु, मारणमोहनादि ऐन्द्रजालप्रथासु न विश्वसन्तु ।

(घ) आङ्ग्लीयाः आदिवासिनां जीवनपद्धतिं रक्षयितुम् इच्छन्ति स्म ।

आगच्छन्तु विचारयामः –

३. ब्रिटिशशासने यायावर-कृषकाणां पुरतः काः समस्याः आसन् ?

४. औपनिवेशिकस्य शासनस्य अन्तर्गतम् आदिवासि-प्रमुखाणां शक्तौ कानि परिवर्तनानि आगतानि ?

५. आदिवासिनः दीकूजनेभ्यः कैःकारणैः कुप्यन्ति स्म ?

६. बिरसावर्यस्य कल्पनायां स्वर्णयुगं कीदृशम् आसीत् ? भवतां चिन्तनानुसारम् इयं कल्पना जनेभ्यः एतावती आकर्षिका किमर्थं लगति स्म ?

आगच्छन्तु कृत्वा पश्यामः

७. स्वीयैः अभिभावकैः मित्रैः शिक्षकैः च सह वार्तालापं कृत्वा विंशति-शताब्दस्य अन्येषाम् आदिवासि-विद्रोहि-नायकानां नामानि अवजानन्तु । तान् आधारिकृत्य तेषां कथाः स्वशब्दैः लिखन्तु ।

इति चतुर्थाध्यायः

५ यदा जनता विद्रोहं करोति
1857 तमवर्षं, तदनन्तरं च

सैनिकाः कृषकाः च विद्रोहाय शक्तिम् अर्जयन्तः सन्ति । एषः विद्रोहः सप्त-पञ्चाशदधिकाष्टादश-शत-तमे वर्षे (१८५७) उत्तर-भारतस्य समतल-क्षेत्रेषु प्रसृतः आसीत् ।

नीतयः जनाः च

गताध्याये भवन्तः ईस्ट-इण्डिया-संस्थायाः नीतीनां जनतायाः उपरि च तासां नीतीनां प्रभावानां विषये पठितवन्तः । एताभिः नीतिभिः नृपाणां राज्ञीनां कृषकाणां भूस्वामिनाम् आदिवासिनां सैनिकानां च उपरि अनेकविधाः प्रभावाः जाताः । भवन्तः एतत् अपि दृष्टवन्तः यत् याः नीतयः नियमाः व्यवस्थाः च जनतायै हित-साधिकाः न भवन्ति अथवा जनतायाः प्रतिकूलं भवन्ति तासां नीतीनां जनाः कथं विरोधं कुर्वन्ति इति ?

"नवाब" इति पदवाच्यानाम् अधिकारिणां सत्ता तेभ्यः परिहृता

अष्टादश-शताब्दस्य मध्यकालात् एव नृपाणां शासकानां (नवाब) च शक्तिः तेभ्यः परिह्रियते स्म । तेषां सत्ता सम्मानः च द्वयम् अपि समाप्तिं गच्छतः स्म । अनेकासु राजसभासु रेजिडेंट इति पद-वाच्याधिकारिणः नियुक्ताः आसन् । स्थानीय-शासकानां स्वतन्त्रता न्यूना जायते स्म । तेषां स्थानीय-शासकानां सेनाव्यवस्था निरस्तीकृता । तेषां शासकानां राजस्व-ग्रहणस्य अधिकाराः क्षेत्राणि च तेभ्यः क्रमशः परिह्रियन्ते स्म ।

अनेके स्थानीयाः शासकाः स्वहितानां रक्षार्थं संस्थया सह वार्तालापम् अपि अकुर्वन् । उदाहरणार्थं – "झांसीराज्ञी" लक्ष्मीबायी इच्छति स्म यत् संस्था तस्याः पत्युः मृत्योः पश्चात् तस्य धर्मपुत्रस्य नृपरूपेण प्रतिष्ठापनां कुर्यात् । पेशवा-बाजीराव-द्वितीयस्य दत्तकपुत्रः नानासाहेबः अपि संस्थां साग्रहम् अवदत् यत् तस्य पिता यत् वेतनं प्राप्नोति स्म तत् वेतनं सः मृत्योः पश्चात् अपि प्राप्नुयात् । स्वश्रेष्ठतायाः सैन्यबलस्य च उपरि अहङ्कारान्विता संस्था एतादृशान् आग्रहान् निवेदनान् वा अस्वीकृतवती ।

अवधस्य राज्यम् आङ्ग्लीयानाम् अधिकारे गम्यमानसु अन्तिमराज्येषु आसीत् । १८०१तमे वर्षे अवधस्य उपरि कश्चित् सहायकसन्धिः आरोपितः तथा च १८५६ तमवर्षे आङ्ग्लीयाः तत् अवधराज्यं स्वाधीनं कृतवन्तः । राष्ट्राध्यक्षः (गवर्नरजनरल) डलहौजिवर्यः अघोषयत् यत् राज्यस्य शासनं समीचीनतया न चाल्यते अतः शासनं समीचीनं कर्तुं ब्रिटिश-नेतृत्वम् आवश्यकम् अस्ति ।

संस्था (कम्पनी) मुगलशासनं समापयितुम् अपि सम्पूर्णां योजनाम् अकल्पयत् । संस्थाद्वारा प्रस्तुत-मुद्राभ्यः मुगलसम्राजः नाम अपसारितम् । १८४९तमवर्षे राष्ट्राध्यक्षः (गवर्नर-जनरल) डलहौजी अघोषयत् यत् बहादुर-शाह-जफरस्य मृत्योः पश्चात् सम्राजः कुटुम्बः रक्तदुर्गतः अपाकृत्य देहल्यां कुत्रचित्र अन्यत्र स्थानान्तरितः करिष्यते । १८५६तम-वर्षे राष्ट्राध्यक्षेण कैनिंगेन निर्णयः कृतः यत् बहादुर-शाह-जफरः अन्तिम-मुगलसम्राट् भविष्यति । तस्य मृत्योः पश्चात् तस्य कोऽपि वंशजः सम्राट्त्वेन न स्वीकरिष्यते । तस्य पुत्राः केवलं राजकुमाराः इति रूपेण मंस्यन्ते ।

कृषकाः सैनिकाः च

ग्रामेषु कृषकाः भूस्वामिनः च अत्यधिक-राजस्व-ग्रहणस्य कठोरोपायैः दुःखिताः आसन् । अनेके जनाः उत्तमर्णेभ्यः (महाजनेभ्यः इति) स्वीकृतम् ऋणं प्रत्यर्पयितुं न पारयन्ति स्म । एतस्मात् कारणात् तेषां वंश-परम्परया प्राप्तासु पुरातनभूमिषु यः अधिकारः तेषाम् आसीत् सः अधिकारः महाजनैः तेभ्यः अपह्रियमाणः आसीत् ।

संस्थायां कार्यं कृतवतां भारतीय-सैनिकानां च असन्तोषस्य स्वकीयं कारणम् आसीत् । ते वेतने प्रोत्साहन-राशौ सेवानियमेषु च विसङ्गतेः कारणात् विषादग्रस्ताः आसन् । अनेके नूतनाः नियमाः तेषां धार्मिकभावनाः श्रद्धाः च खण्डयन्ति स्म । किं भवन्तः जानन्ति यत् "तस्मिन् काले अनेके जनाः पारेसमुद्रं न गन्तुम् इच्छन्ति स्म" इति । ते अनुभवन्ति स्म यत् "समुद्रयात्रया तेषां धर्मः जातिश्च भ्रष्टतां गमिष्यतः" इति । यदा चतुर्विंशत्यधिकाष्टा-दश-शत-तमे वर्षे (१८२४) सैनिकाः संस्थायाः पक्षतः योद्धुं समुद्र-मार्गेण बर्मा-देशं च गन्तुम् आदेशं प्राप्तवन्तः तदा ते एतम् आदेशं पालयितुम् असहमतिम् अभिव्यक्तवन्तः । ते भूमार्गेण गन्तुम् इच्छन्ति स्म । सर्वकारस्य आदेशस्य अवहेलनत्वात् ते कठोरदण्डेन दण्डिताः । यतो हि एतत् प्रकरणम् अधुना समाप्तं न आसीत् अतः षड्पञ्चाशदधिकाष्टा-दश-शत-तमे वर्षे (१८५६) संस्था एकं नूतनं नियमम् अकरोत् । एतस्मिन् अधिनियमे स्पष्टतया उक्तम् आसीत् यत् यदि कश्चित् जनः संस्थायाः सेनायां सेवाकार्यं करिष्यति तर्हि आवश्यकतायां सत्त्यां पारेसमुद्रम् अपि तेन गन्तव्यं भविष्यति इति ।

सैनिकाः ग्राम्य-परिस्थितिभिः अपि कष्ट-पतिताः आसन् । अनेके सैनिकाः स्वयं कृषकाः आसन् । ते स्वकीयान् कुटुम्बान् ग्रामेषु परित्यज्य आगतवन्तः । परिणामतः कृषकाणां रोषः शीघ्रमेव सैनिकेषु अपि व्याप्तम् ।

➢ गतिविधिः

कल्पयन्तु, यत् भवन्तः संस्थायाः सेनायां सैनिकत्वेन सन्ति इति । भवन्तः न इच्छन्ति यत् भवतां भ्रातुस्पुत्रः संस्थायाः सेनायां कार्यं कुर्यात्, एतस्यां स्थितौ भवन्तः तं किं कारणं बोधयिष्यन्ति ।

संशोधनेषु प्रतिक्रिया

आङ्ग्लीयाः अनुभवन्ति स्म यत् भारतीय-समाजस्य संशोधनम् आवश्यकम् अस्ति । सतीप्रथां रोद्धुं विधवा-विवाहं च वर्धयितुम् अधिनियमाः प्रकल्पिताः इति । आङ्ग्लभाषामाध्यमेन शिक्षयितुं प्रोत्साहनं दत्तम् । त्रिंशदधिकाष्टादश-शत-तम-वर्षात् (१८३०) परं संस्थायाः ईसायी-धर्म-प्रचारकाः मुक्ततया कार्यं कुर्युः अपि च ते भूमिं सम्पत्तेः च अपि अर्जनं कुर्वन्तु इत्यर्थं ते स्वतन्त्राः सन्ति इति एतदर्थं संस्थया तादृशाः अधिनियमाः रचिताः । पञ्चाशदधिकाष्टा-दश-शत-तमे (१८५०) वर्षे एकः नूतनाधिनियमः निर्मितः, यत्र ईसायि-धर्मावलम्बनम् इतोऽपि सरलम् अभवत् । एतस्मिन् अधिनियमे प्रावधानं कृतम् आसीत् यत् यदि कश्चित् भारतीयः ईसायि-धर्मालम्बी भवति तर्हि स्वपूर्वजानां सम्पत्तौ अपि तस्य अधिकारः पूर्ववत् एव स्थास्यति इति । अनेके भारतीयाः अवगतवन्तः यत् आङ्ग्लीयाः तेषां धर्मं सामाजिक-रीतीः परम्परागतां जीवनशैलीं च नाशयन्ति ।

अपरस्मिन् पक्षे एतादृशाः भारतीयाः अपि आसन् ये वर्तमान-सामाजिक्यां व्यवस्थायां परिवर्तनम् इच्छन्ति स्म । तेषां समाज-सुधारकाणां तेषां परिशोधकान्दोलनानां च विषये भवन्तः सप्तमाध्याये पठिष्यन्ति ।

उत्तरभारतस्य विपणिषु सैनिकाः
सूचनाः मिथ्यावादान् च प्रसारयन्तः सन्ति ।

जनतायाः दृष्ट्या

तस्मिन् काले जनाः आङ्ग्लशासनस्य विषये किं चिन्तयन्ति स्म ?, एतस्य विषयस्य अवगमनाय भवन्तः प्रथमस्रोतः द्वितीयश्रोतः च पठन्तु ।

स्रोतः-१

"चौरासी" इति नियमानां सूची

अत्र महाराष्ट्रस्य कस्मिंश्चित् ग्रामे कश्चित् विष्णु-भट्ट-गोडसे-नामकेन ब्राह्मणेन माझा-प्रवास इति पुस्तकं लिखितं तस्य पुस्तकस्य केचन अंशाः अत्र प्रदत्ताः सन्ति । विष्णुभट्टः तस्य पितृव्यः च मथुरायाम् आयोजयिष्यमाणे कस्मिंश्चित् यज्ञे भागग्रहणाय प्रस्थितवन्तौ । विष्णुभट्टः लिखति यत् मार्गे तयोः मेलनं कैश्चित् सैनिकैः सह अभवत् ते सैनिकाः तौ परामृष्टवन्तौ यत् तौ स्वकीयं गृहं प्रतिगच्छताम् इति, यतो हि दिनत्र्यानन्तरं सर्वत्र कोहलालः अव्यवस्था च भविष्यति, सैनिकैः यद् उक्तं तत् इत्थम् आसीत् इति -

> आङ्ग्लसर्वकारः हिन्दुमुस्लिम-जनानां च धर्मं नाशयितुं व्यग्रः अस्ति,--- तैः आङ्ग्लीयैः चतुरशीत्तेः नियमानां काचित् सूची सज्जीकृता अस्ति तथा च कलकत्ता-महानगरे सर्वेषां नृपाणां राजकुमाराणां च उपस्थितौ नियमानां घोषणा कृता । सैनिकाः तौ अवदन् यत् राजानः एतान् नियमान् पालयितुं सिद्धाः न सन्ति । ते राजानः अवदन् यत् आङ्ग्लीयैः स्थापितानां नियमानां भयङ्कर-परिणामाः भविष्यन्ति इति तैः आह्वानं कृतम् अस्ति । नृपाः उक्तवन्तः यत् यदि एते नियमाः क्रियान्वयिताः अभविष्यन् तर्हि महती अव्यवस्था अभविष्यत्--- अर्थात् राजानः अतीव कुपिताः सन्ति ते स्वराजधानीः प्रति गतवन्तः – अनेके वरिष्ठाः ज्येष्ठाः च जनाः योजनाः निर्मान्ति । धर्मयुद्धाय कश्चित् दिनाङ्कः निश्चितः अस्ति अपि च मेरठ-छावनी-मध्ये काञ्चित् गुप्तयोजनां सज्जीकृत्य विभिन्नासु "छावनी" इति एताः प्रतिः योजना प्रेषिता अस्ति ।
>
> विष्णुभट्ट-गोडसेवर्यः, माझा-प्रवासः २३-२४.

"शीघ्रमेव प्रत्येकस्मिन् सैन्यदले उत्तेजना प्रसृता"

तदानीन्तनस्य कालस्य कानिचन दृश्यानि प्रान्ताधिपतेः (सूबेदार) सीता-राम-पाण्डे-वर्यस्य संस्मरणैः लभ्यते । सीतारामपाण्डेवर्यः द्वादशाधिकाष्टादशशततमे (१८१२) वर्षे बङ्गाल-नेटिव-आर्मी इत्यस्मिन् सैनिकरूपेण नियुक्तः । सः अष्टचत्वारिंशद्वर्षाणि यावत् सेवाम् अकरोत् तथा च षष्ट्याधिकाष्टा-दश-शत-तमे (१८६१) वर्षे सेवानिवृत्तः । सः विद्रोहम् अभिभवितुम् आङ्ग्लीयानां साहाय्यम् अकरोत् । यद्यपि तस्य पुत्रः विद्रोहिणां पक्षे आसीत् तथापि आङ्ग्लीयैः तस्य पितुः सीतारामस्य पुरतः एव सः मारितः । स्वसेवानिवृत्तेः पश्चात् तस्य कार्यकार्यधिकारिणा नारगेटवर्येण सः प्रेरितः यत् सः स्वसंस्मरणं लिखेत् इति । सीतारामेण १८६१तमवर्षे अवधिभाषया स्वस्य संस्मरणानि लिखितानि नारगेट-वर्येण च तेषां संस्मरणानाम् आङ्ग्लभाषया अनुवादः कृतः तथा च फ्राम-सिपाय-टू-सूबेदार (सैनिकतः सूबेदार इति पदं यावत्) इति नाम्ना प्रकाशनम् अपि तेषां कारितम् ।

सीता-राम-पाण्डे-वर्यस्य संस्मरणानां कश्चित् अंशः एतादृशः आसीत् –

> मम मान्यता अस्ति यत् अवधस्य उपरि जायमानेन आक्रमणेन सैनिकेषु आत्मविश्वासस्य सञ्चारः जातः, तथा च ते सर्वकारं विरुध्य षडयन्त्रं रचयितुम् आरभन्त । अवधस्य शासकान् (नवाब) देहलीसम्राजः सचिवान् च सेनायाः वस्तुस्थितिम् अवगन्तुं सम्पूर्णे भारते प्रेषिताः । ते सैनिकानां भावनाः इतोऽपि आन्दोलितवन्तः । ते सचिवाः सैनिकान् असूचयन् यत् कथं वैदेशिकैः सम्राजा(बादशाह) सह विश्वासघातः कृतः अस्ति इति । ते सचिवाः सैनिकानां पुरतः अनेकविधम् असत्य-वार्तालापं प्रस्तुतवन्तः, सैनिकान् च स्वस्वामिनाम् अर्थात् आङ्ग्लीयानां विरोधे कार्यं कर्तुं प्रोत्साहितवन्तः, तत्र उद्देश्यम् आसीत् यत् सैनिकाः पुनः देहल्यां सम्राजः प्रतिष्ठापनां कर्तुं शक्नुयुः इति । तेषां सचिवानां तर्कः आसीत् यत् यदि सैनिकाः मिलित्वा कार्यं कुर्युः एतेषां परामर्शानां च उपरि अवधानं क्रियात्मककार्यं च कुर्युः तर्हि सेना एतत् कार्यं कर्तुं शक्नोति इति ।

मेरठे विद्रोहिसैनिकाः आङ्ग्लाधिकारिणाम् उपरि आक्रमणं कुर्वन्ति, तेषां गृहाणि प्रविशन्ति भवनानि च ज्वालयन्ति ।

स्रोतः - २ इत्यस्य अवशिष्टः भागः.....

संयोगवशात् एतस्मिन् एव काले सर्वकारः प्रत्येकं सैन्यदलस्य काञ्चन् जनान् नूतनभुशुण्डेः प्रयोगं शिक्षयितुं पृथक् पृथक् सैन्यावासं प्रति प्रेषितवान्। एते जनाः किञ्चित् कालं यावत् सैनिकेभ्यः प्रशिक्षणं दत्तवन्तः। एतस्मिन् आभ्यन्तरे न जाने कुतः इयं सूचना प्रसृता यत् एतासु भूशुण्डिषु प्रयुज्यमानेषु कारतूस इत्येतेषु गोः सूकरस्य च वसादिकस्य लेपः क्रियते। अस्माकं सैन्यदलस्य सैनिकाः जनाः च अन्यान् जनान् पत्राणि विलिख्य इयं सूचनां सर्वत्र प्रेषितवन्तः। शीघ्रम् एव तस्मात् प्रत्येकस्मिन् सैन्यदले उत्तेजनापूर्णं वातावरणं जातम्। कैश्चित् जनैः उक्तं यत् तेषां चत्वारिंशद्वर्षीये सेवाकार्ये सर्वकारः तेषां धर्ममान्यतां नाशयितुं किमपि न अकरोत् इति। परन्तु यथा मया पूर्वमेव निवेदितं, अवधक्षेत्रस्य अधिग्रहणस्य कारणात् सैनिकाः पूर्वम् एव क्रुधाः आसन्। स्वार्थिजनैः शीघ्रम् एव एषा कथा प्रसारिता यत् आङ्ग्लीयाः सर्वेषाम् ईसायीकरणं कर्तुम् इच्छन्ति, अतः तैः एतादृशाः भुशुण्ड्यः निर्मिताः, यतो हि यासां प्रयोगेण मुस्लिमजनाः हिन्दवः च धर्मभ्रष्टाः भवेयुः।

कर्नलमहोदयस्य मतम् आसीत् यत् इयं त्वरा, यां च त्वरां सः अपि पश्यति स्म, पूर्ववदेव अधुना अपि स्वयमेव समाप्तिं यास्यति इति मत्वा सः मां गृहं गन्तुं परामृष्टवान्।

सीताराम-पाण्डेवर्यः,फ्राम-सिपाय-टू-सूबेदार, इति पृष्ठम् -१६२-६३।

➢ गतिविधिः

१. सीतारामस्य विष्णुभट्टस्य च अनुसारं जनानां मनोगताः मुख्यचिन्ताः काः आसन् ?

२. तेषां दृष्ट्या शासकाः कां भूमिकाम् उढवन्तः ? सैनिकाः कां भूमिकां वहन्तः दृश्यन्ते स्म ?

सैनिक-विद्रोहः जनविद्रोहः जातः

यद्यपि शासकस्य प्रजायाः च मध्ये सङ्घर्षः काश्चित् आश्चर्यजनिका घटना न भवति परन्तु कदाचित् एते सङ्घर्षाः एतावन्तं प्रसारं गच्छन्ति यत् राज्यस्य सत्ता छिन्ना भिन्ना च एव भवति इति। अनेके जनाः अनुभवन्ति यत् तेषां शत्रुः एकः एव अस्ति इति। अतः ते सर्वे किमपि कर्तुम् इच्छन्ति। एतादृश्यां परिस्थितौ जनैः सङ्घटितैः भाव्यम्। जनैः संचारस्य, कार्यसमारम्भस्य आत्मविश्वासस्य च परिचयः समुपस्थापनीयः।

भारतस्य उत्तरभागेषु सप्तपञ्चाशदधिकाष्टा-दश-शत-तमे (१८५७) वर्षे एतादृशी स्थितिः उत्पन्ना अभवत्। विजयस्य शासनस्य च शतं वर्षाणां पश्चात् ईस्ट-इण्डिया-संस्था महाविद्रोहस्य सम्मुखीकरणं करोति स्म। मे-मासे सप्तपञ्चाशदधिकाष्टादश-शत-तमे (१८५७) वर्षे एषः विद्रोहः आरब्धः तेन भारते संस्थायाः आस्तित्वम् एव सङ्कटे निपातितः। मेरठतः एषः विद्रोहः सैनिकैः आरब्धः तथा च अनेकेषु स्थानेषु विद्रोहाग्निः भयङ्करूपं प्राप्नोत्। समाजस्य विभिन्न-समुदायानाम् असंख्याः जनाः विद्रोहि-स्वरैः क्रियाशीलाः अभवन्। केचन जनाः मन्यन्ते यत् एकोन-विंशति-शताब्दे उपनिवेशवादं विरुध्य आविश्वम् अयं महत्तमः सशस्त्र-सङ्घर्षः आसीत्।

सैनिकविद्रोहः - सैनिकाः सङ्घीभूय स्वसैन्याधिकारिणां वचनानि पालयितुम् असहमतिं प्रकटयन्ति।

चित्रम् ४- कैवेलरी लाईन इत्येतेषु युद्धम्।
जुलैमासस्य तृतीये दिनाङ्के सप्तपञ्चाशदधिकाष्टादश-शत-तमे वर्षे च त्रि-सहस्राधिकाः विद्रोहिणः बरेलीतः देहलीं प्राप्तवन्तः। ते पारे-यमुनम् अगच्छन् तथा च ब्रिटिश-कैवेलरी-चतुष्पीठेषु आक्रमणम् अकर्वन्। इदं युद्धम् आरात्रम् अचलत्।

मेरठतः देहलीं यावत्

मार्च-मासस्य एकोनत्रिंशद्दिनाङ्के १८५७ तमवर्षे च युव-सैनिकस्य मङ्गल-पाण्डे-वर्यस्य उपरि - आरोपणं जातं यत् सः बैरकपुरे स्वाधिकारिणाम् उपरि आक्रमणम् अकरोत् ,सः एतस्य आरोपणस्य कारणात् मृत्युदण्डेन दण्डितः। केषाञ्चित् दिनानां पश्चात् मेरठे नियुक्ताः सैनिकाः अवदन् यत् वयं नूतन-भुशुण्डिभिः सैन्याभ्यासं न करिष्यामः इति। सैनिकाः जानन्ति स्म यत् तासु भुशुण्डिषु गोः सूकरस्य च वसायाः लेपनं कृतम् अस्ति। पञ्चाशीतिः सैनिकाः सेवातः निष्कासिताः। ते निजाधिकारिणां वचनस्य अवहेलनं कृतवन्तः इति तस्मात् प्रत्येकं दशवर्षाणां कृते दण्डितः। मयीमासस्य ९दिनाङ्के १८५७ तमवर्षे च इयं घटना प्रवृत्ता।

मेरठनगरे नियुक्तानाम् अन्येषां भारतीय-सैनिकानां प्रतिक्रिया भयङ्करा आसीत्। मईमासस्य १०दिनाङ्के सैनिकैः मेरठ-कारागारस्य उपरि आक्रमणं कृतं, तत्र काराबद्धान् सैनिकान् ते मोचितवन्तः। तैः आङ्ग्लाधिकारिणाम् उपरि आक्रमणं कृत्वा ते मारिताः। तैः तत्र भुशुण्ड्यादीनि अस्त्रशस्त्राणि अपि स्वाधिकृतानि, आङ्ग्लभवनानि सम्पत्तीः च अपि भस्मसात्कृतानि। आङ्ग्लीयान् विरुध्य युद्धं चापि ते अघोषयन्। सैनिकाः सम्पूर्णे देशे आङ्ग्लशासनं नाशयितुं सन्नद्धाः आसन्। परन्तु कश्चित् प्रश्नः अयम् आसीत् यत् आङ्ग्लीयानां गमनात् पश्चात् भारते शासनव्यवस्थां च संचालयिष्यति। सैनिकैः एतस्याः समस्यायाः अपि समाधानं प्राप्तम्। ते सैनिकाः मुगलसम्राजे बहादुर-शाह-जफराय देशस्य शासनव्यवस्थायाः दायित्वम् अर्पयितुम् इच्छन्ति स्म।

मेरठस्य केषाञ्चित् सैनिकां दलं मे-मासस्य दशमे (१०) दिनाङ्के रात्रौ अश्वान् आरुह्य उषसि देहलीं प्राप्तवत्। यथा तेषाम् आगमनस्य सूचना देहल्यां प्रसृता, देहल्याम् अपि नियुक्तसैन्यदलैः विद्रोहः कृतः। अत्रापि सैनिकैः आङ्ग्लीयाः अधिकारिणः मारिताः। स्वदेशिसैनिकैः आयुधानि गोला-विस्फोटादि-सामग्री च अधिगृहीता, भवनानि च भस्म-सात्कृतानि। विजयिनः सैनिकाः रक्तदुर्गस्य पार्श्वासु भित्तिषु सङ्घीभूताः। ते सम्राजा बहादुर-शाह-जफरेण सह मेलितुम् इच्छन्ति स्म, सम्राड्जफरः प्रभूतैः सैनिकैः आङ्ग्लीयैः

फिरंगी- विदेशी। अनेन शब्देन अपमानः द्योत्यते।

सह योद्धुं सज्जः न आसीत्, परन्तु सैनिकाः अपि आग्रहिणः आसन् अतः ते प्रस्तावं प्रतिस्वीकर्तुं न इच्छन्ति स्म । अन्ततः बलात्सैनिकाः प्रासादं प्रविष्टवन्तः तथा च ते बहादुर-शाह-जफरं स्वनेतृरूपेण घोषितवन्तः ।

वृद्धसम्राजा सैनिकानाम् एषा अभ्यर्थना कथञ्चित् अङ्गीकृता । सः आभारतं प्रमुखान् शासकान् च पत्रं विलिख्य संसूचितवान् यत् आङ्ग्लीयैः सह योद्धुं भारतीय-राज्य-सङ्घस्य निर्माणं भवेत् इति दृष्ट्या सः सर्वेषाम् आह्वानं कृतवान् । बहादुरशाहस्य एतेन एकमात्र-प्रयासेन गभीरपरिणामाः अपि पुरतः आगताः ।

आङ्ग्लीयेभ्यः प्राक् देशस्य महति भूभागे मुगलसाम्राज्यस्य एव शासनम् आसीत् । प्रायः लघुशासकाः देशीयराज्याधिपाः (रजवाडे) च एव मुगलसम्राजः नाम्ना एव स्वक्षेत्राणां शासनं कुर्वन्ति स्म । ब्रिटिश-शासनस्य विस्तारेण भयभीताः एतादृशाः अनेके शासकाः अनुभवन्ति स्म यत् यदि मुगलसम्राट् (मुगलबादशाह) पुनः शासकत्वेन भवति तर्हि ते पुनः स्वक्षेत्रीय-शासनं मुगलाधिपत्ये चिन्ता-राहित्येन कर्तुं शक्ष्यन्ति इति ।

आङ्ग्लीयाः न आशासते स्म यत् एतादृश्यः घटनाः भविष्यन्ति । ते ऊहन्ते स्म यत् भुशुण्डु-प्रकरणात् उत्पन्ना अव्यवस्था किंचित् कालानन्तरं शान्ता भविष्यति । परन्तु यदा बहादुर-शाहजफरः विद्रोहे अस्मिन् सम्मिलितः तदा स्थितिः एकस्यां निशि एव परिवर्तिता । प्रायः इत्थं भवति यत् यदा जनाः कम् अपि मार्गं पश्यन्ति अर्थात् आशाकिरणं पश्यन्ति तदा अथवा समाधानं तेषां समस्याः शीघ्रम् एव निश्चयेन च भवति इति भावेन यदा ते आश्वस्ताः भवन्ति तदा उत्साहः कर्मणि जायते अर्थात् वर्धते एव । अनेन ते अग्रेसर्तुम् उत्साहम् आत्मविश्वासं च प्राप्नुवन्ति ।

विद्रोहः प्रसर्तुम् आरभत

यदा देहलीतः आङ्ग्लीयाः उत्पाटिताः, तदा प्रायः सप्ताहं यावत् न कुत्रापि कोऽपि विद्रोहः अभवत् । स्पष्टम् अस्ति यत् सूचनायाः प्रसरणे अपि समयः अपेक्षितः आसीत् इति । परन्तु तत्र तु विद्रोहक्रमः एव आरब्धः।

क्रमशः, प्रत्येकं सैन्य-दलाभ्यन्तरे सैनिकैः (रेजिमेण्ट इति) विद्रोहः कृतः, तथा च ते सैनिकाः देहली-कर्णपुर-लखनवु-सदृशेषु मुख्यस्थानेषु अन्यसैन्यदलानां साहाय्यर्थं प्रस्थितवन्तः । तेषाम् अनुकरणं ग्राम्याः नगरीयाः चापि अकुर्वन् ते अपि विद्रोहमार्गम् आश्रयन् । ते स्थानीय-नेतृणां भूमिस्वामिनां प्रमुखाणां च निर्देशानुसारं सङ्घटिताः जाताः । एते जनाः स्वसत्तां स्थापयितुम् आङ्ग्लीयैः सह च योद्धुं सज्जाः आसन्। स्वर्गीयस्य पेशवा-बाजीरावस्य दत्तकपुत्रः नानासाहेबः कर्णपुरस्य समीपे निवसति स्म । सः सेनायाः सङ्घटनम् एकत्रीकरणं च अकरोत् तथा च ब्रिटिश-सैनिकान् नगरतः बहिष्कृतवान् । सः अघोषयत् यत् सः बहादुर-शाह-जफरस्य नेतृत्वे प्रान्ताध्यक्षः अस्ति । लखनवु-राज-सिंहासनतः अपसारितस्य नबाब-बाजिद-अली-शाहस्य पुत्रः बिरजिसकद्रः तत्रत्यः नूतनः "शासकः" इति घोषितः ।

चित्रम्-५- यथा क्रमशः विद्रोहः प्रासरत् तथा आङ्ग्ल-सैन्यावासेषु आङ्ग्लाधिकारिणां हननम् आरब्धम् ।



➢ गतिविधिः

१. मुगलसम्राट् विद्रिहिणां समर्थनाय किमर्थं सज्जः अभवत् ?

२. सैनिकानां प्रस्तावस्य स्वीकरणात् प्राक् तेन स्थितेः यद् आकलनं कृतं स्यात् तस्मिन् विषये अनुच्छेदं लिखन्तु।

बिरसिस-कद्रः अपि बहादुर-शाहजफरं स्वसम्राट्त्वेन अङ्गीकृतवान् । तस्य माता बेगम-हजरत-महोदया प्रासादे आङ्ग्लीयान् विरुध्य विद्रोहं वर्धयितुं सोत्साहं भागम् अवहत् । झांसी-राज्ये रानी-लक्ष्मी-बायी अपि विद्रोहि-सैनिकैः सह अमिलत् । सा नाना-साहेबस्य सेनापतिना तान्त्या-टोपे-वर्येण सह मिलित्वा आङ्ग्लीयान् महता प्रमाणेन आहूतवती । मध्यप्रदेशस्य मांडलाक्षेत्रे, राजगढस्य राज्ञी अवन्ति-बायी-लोधी अपि ४,००० सैनिकानां सैन्यदलं सज्जीकृत्य आङ्ग्लीयान् विरुध्य सङ्ग्रामे दलस्य नेतृत्वम् अकरोत् यतो हि ब्रिटिशशासनेन तस्याः राज्यस्य उपरि स्वनियन्त्रणं स्थापितम् आसीत् ।

विद्रोहि-सैन्य-दलानां पुरतः आङ्ग्लीयानां संख्या अत्यल्पा आसीत् । अयनेषु च अनेकेषु आङ्ग्लीयानां महान् पराजयः अभवत् । एतं पराजयं दृष्ट्वा जनाः विश्रब्धवन्तः यत् आङ्ग्लीयानां शासनम् अधुना समाप्तप्रायम् अस्ति इति । अधुना जनाः विद्रोहार्थम् आधिक्येन आत्मविश्वासिनः अभवन् । विशेषतया अवधस्य क्षेत्रे सर्वत्र विद्रोहस्य स्थितिः आसीत् । अगस्ट्मासस्य ६दिनाङ्के १८५७ तमवर्षे च लेफ्टिनेण्ट-कर्नल-टाइटलरः अपि च स्वकीयं प्रधानसेनापतिनं (कमाण्डर-इन-चीफ इति) दूरसन्देशं प्रैषत् यत्र तेन आङ्ग्लीयानां भयम् अभिव्यक्तम्- "अस्माकं जनाः विरोधिनां सख्यया निरन्तर-युद्धवशात् च श्रान्ताः सन्ति । प्रत्येकम् अपि ग्रामः अस्माकं विरोधे अस्ति । भूस्वामिनः (जमींदार) अपि अस्माकं विरोधं कुर्वन्ति ।

तस्मिन् काले अनेके महत्त्वपूर्णाः नेतारः दृष्टिपथम् आगतवन्तः । उदाहरणार्थं फैजाबादस्य मुस्लिम-धर्मगुरुः (मौलवी) अहमदुल्लाशाहः भविष्यवाणीम् अकरोत् यत् आङ्ग्लशासनं शीघ्रम् एव समाप्तिं यास्यति इति । सः मुस्लिम-धर्मगुरुः (मौलवी) अवगतवान् आसीत् यत् जनता किम् इच्छति । तया दृष्ट्या एव तेन स्वसमर्थकानां कस्यचित् विशाल-संख्या-युक्तस्य दलस्य (गणस्य) प्रबन्धः कृतः । स्वसमर्थकैः सह अपि आङ्ग्लीयैः सह योद्धुं लक्ष्मणपुरं प्राप्नोत् । देहल्याम् आङ्ग्लीयान् नाशयितुम् अनेके "गाजि"जनाः अर्थात् मुस्लिम-धर्म-योद्धारः सङ्घीभूताः । बरेलीनगस्य सैनिकः बख्तखानः योद्धृणां विशालदलेन सह देहलीं प्रति प्रस्थानम् अकरोत् । एतस्मिन् विद्रोहे सः विशिष्टं नेतृत्वभारम् उढवान् । बिहारस्य कश्चित् पुरातन-भूस्वामी कुंवरसिंहः अपि विद्रोहिसैनिकानां साहाय्यम् अकरोत् तथा च सः चिरकालं यावत् आङ्ग्लीयैः योद्धवान् । समग्रेषु क्षेत्रेषु नेतारः योद्धारः च भागं स्वीकुर्वन्ति स्म ।



चित्रम् -६- ब्रिटिश-सैन्य-समूहाः विद्रोहिणाम् उपरि आक्रमणं कुर्वन्ति, तैः देहल्याः रक्तदुर्गे (दक्षिणतः) तथा च सलीम-गढ-दुर्गे (वामतः) अधिग्रहणं कृतम् आसीत् ।

चित्रम्-७- विद्रोहिसैनिकाः मेरठतः देहलीं प्रति गच्छन्ति।

संस्थायाः प्रतिकारः

एतस्य घटनाक्रमात् परमपि आङ्ग्लीयैः पराजयः न स्वीकृतः। संस्था निरणयत् यत् स्वसम्पूर्णां शक्तिं योजयित्वा सा विद्रोहं पराभविष्यति। संस्थया इङ्ग्लैण्डदेशतः इतोऽपि सैनिकाः आहूताः, विद्रोहिणः शीघ्रं दण्डनीयाः इति धिया तैः नूतनाः अधिनियमाः अपि प्रकल्पिताः, विद्रोहस्य च मुख्यकेन्द्रेषु आक्रमणं कृतम्। सितम्बरमासे १८५७ तमवर्षे च आङ्ग्लीयैः देहली पुनः अधिकृता। अन्तिमस्य मुगलसम्राजः बहादुरशाहजफरस्य उपरि पुनः अभियोगः चालितः। सः आजीवनकारावासीयेन दण्डेन दण्डितः। तस्य पुत्राः तस्य पुरतः एव गुलिकाप्रहारेण हताः। बहादुरशाहः तस्य भार्या बेगमजीनतमहलः च अक्तूबरमासे १८५८तमवर्षे रङ्गूनकारागारं प्रति प्रेषितौ। एतस्मिन् एव कारागारे नवम्बरमासे १८६२तमवर्षे च बहादुरशाहजफरः स्वप्राणान् अत्यजत्।

देहल्याः उपरि आङ्ग्लीयैः पुनः अधिग्रहणं कृतम् एतस्य अयम् अभिप्रायः न आसीत् यत् विद्रोहः अधुना समाप्तः एव जातः इति। ततः परम् अपि जनाः आङ्ग्लीयैः सह अयुद्धयन्तः। व्यापकस्य विशालशक्तिसम्पन्नस्य च विद्रोहस्य अभिभवनाय आङ्ग्लीयैः वर्षद्वयं यावत् युद्धं करणीयम् अभवत्।

मार्चमासे १८५८ तमवर्षे लखनवुनगरस्य अधिग्रहणं कृतम्। जूनमासे १८५५ तमे वर्षे रानीलक्ष्मीबायी आङ्ग्लीयैः सह अयुद्धयत सा युद्धे आङ्ग्लीयैः हता। दौर्भाग्येन तथैव राज्ञ्या अवन्तिबायीलोध्या सह अपि एवमेव अभवत्। खेडीयुद्धे आरम्भिकस्य विजयस्य पश्चात् सा यदा आत्मानम् आङ्ग्लीयैः परिवृत्ताम् अपश्यत् तदा सा वीरगतिं प्राप्तवती।

तान्त्याटोपेवर्यः मध्यभारतस्य वनेषु निवसन् आदिवासिनां कृषकाणां च साहाय्येन छापामारयुद्धम् (प्रच्छन्नयुद्धम्) अकरोत्।

यथा भारतीयविद्रोहिणः पूर्वम् आङ्ग्लीयान् विरुध्य युद्धे स्वसफलताभिः उत्साहं प्राप्तवन्तः, तथा अधुना विद्रोहिणां पराजयेन जनाः हतोत्साहिनः जाताः। अनेके जनाः विद्रोहिणां सान्निध्यम् अत्यजन्। आङ्गलीयाः अपि जनतायाः विश्वासपात्रं आरम्भे, आङ्ग्लसेनाः देहल्याः दुर्गभेदनं न कर्तुम् अशक्नोत्। सितम्बरमासस्य ३ दिनाङ्के १८५७ तमवर्षे च आङ्ग्लसेनायै आधिक्येन आयुधानि विस्फोटकादीनि च प्रापितानि। एषा विस्फोटक-सामग्री वाहनेषु स्थापिता आसीत् अपि च तां हस्तिनः वहन्ति स्म एतेषां पङ्क्तिः सप्त-योजन-परिमित-दैर्घ्ययुक्ता आसीत्।

➢ गतिविधिः

तेषां स्थानानां सूचीं कुर्वन्तु यत्र १८५७ तमवर्षस्य मयीजूनजुलैमासेषु विद्रोहाः अभवन्।

चित्रम् -८- आङ्ग्लसैनिकाः देहलीं प्रवेष्टुं कश्मीरीगेट इत्येतं विस्फोटकेन भूमिसात्कुवन्ति।

चित्रम् -९- आङ्ग्लसैन्यसमूहैः कर्णपुरस्य पार्श्वे विद्रोहिणः निगृह्णन्ति।

सावधानं पश्यन्तु कथं चित्रकारेण आङ्ग्लसैनिकाः सोत्साहं विद्रोहिणाम् उपरि आक्रमणं कुर्वन्तः दर्शिताः सन्ति।

भवितुं यथासम्भवं प्रयत्नम् अकुर्वन्। तैः स्वामिभक्त-भूस्वामिभ्यः पुरस्काराणां घोषणा कृता । तैः आङ्ग्लीयैः भूस्वामिनः आश्वास्ताः यत् तेषां भूमौ तेषां परम्परागताधिकाराः यथावत् अर्थात् पूर्ववदेव स्थास्यन्ति इति । यैः विद्रोहः कृतः आसीत् ते आङ्ग्लीयैः उक्ताः यत् यदि ते आङ्ग्लीयानां पुरतः समर्पणं कुर्वन्ति अपि च यदि तैः कस्यापि आङ्ग्लीयस्य हत्या न कृता अस्ति तर्हि ते सुरक्षिताः स्थास्यन्ति भूमौ च तेषाम् अधिकारः स्वामित्वं च पूर्ववदेव स्थास्यति। एतदतिरिच्य शताधिकसैनिकानां विद्रोहिणां नवाबानां नृपाणां च उपरि अभियोगाः चालिताः ते च मृत्युदण्डेन अपि दण्डिताः।

विद्रोहस्य परिवर्तिनि वर्षाणि

आङ्ग्लीयैः १८५९ तमवर्षस्य अन्तिमावधिं यावत् देशस्य उपरि पुनः नियन्त्रणं प्राप्तम् आसीत् परन्तु अधुना ते प्राक्तनीनां नीतीनां माध्यमेन शासितुं न शक्नुवन्ति स्म।

आङ्ग्लीयैः यानि महत्त्वपूर्णानि परिवर्तनानि कृतानि तानि निम्नलिखितानि सन्ति-

१. ब्रिटिशसंसदा १८५८ तमवर्षे कश्चित् नूतनः अधिनियमः पारितः तथा च ईस्टेण्डियासंस्थायाः सर्वे अधिकाराः ब्रिटिशसाम्राज्यस्य स्वाधिपत्ये अर्पिताः तेन च भारतीयप्रकरणानि समीचीनतया सम्भालयितुं शक्नुयुः । ब्रिटिशमन्त्रिमण्डलस्य कश्चित् सदस्यः भारतमन्त्रिरूपेण नियुक्तः। सः भारतस्य शासनसम्बद्धविषये प्रबन्धनं करिष्यति इति दायित्वं तस्मै अर्पितम् आसीत् । तस्य परामर्शदानाय काचित्

परिषद् घटिता या इण्डिया-काउंसिल इति नाम्ना उच्यते स्म । भारतस्य गर्वनरजनरल इति पदवाच्याधिकारिणे वायसराय इति पदं दत्तम् । इत्थं सः इङ्ग्लैण्डस्य नृपस्य राज्ञ्याः च प्रतिनिधिः अस्ति इति रूपेण सः घोषितः । परिणामतः, आङ्ग्लसर्वकारेण भारत-शासनस्य दायित्वं साक्षात् स्वाधिकृतम् ।

२. देशस्य सर्वे शासकाः आश्वस्ताः यत् भविष्यति काले कदाचिदपि तेषां भूक्षेत्रे आङ्ग्लीयानाम् अधिग्रहणं न भविष्यति इति । ते स्वकीयं राज्यं स्ववंशजेभ्यः दत्तकपुत्रेभ्यः चापि अर्पयितुं शक्नुन्ति एतदर्थं च ते मुक्ताः सन्ति । आङ्ग्लीयैः अत्रत्याः शासकाः प्रेरिताः यत् ते ब्रिटेनस्य राज्ञ्यै स्वाधिपतित्वेन स्वीकुर्युः इति । इत्थं भारतीयशासकाः ब्रिटिशसाम्राज्यस्य अधीनाः भूत्वा शासनं चालयितुं स्वतन्त्राः इति घोषितम् ।

३. सेनायां भारतीयसैनिकानां संख्यां न्यूनीकरणाय यूरोपीयसैनिकानां च संख्यां वर्धयितुं निर्णयः स्वीकृतः । इदमपि निर्णीतं यत् अवध-बिहार-मध्यभारत-दक्षिणभारतप्रान्तेभ्यः सैनिकानां नियुक्तिस्थाने अधुना गोरखा-सिख-पठानादिषु अधिकसैनिकानां सेनायां नियुक्तिः करिष्यते ।

४. यवनानां सम्पत्तिः भूमिः च व्यापकरूपेण अधिगृहीता । सन्देहदृष्ट्या शत्रुताभावेन च तैः सह व्यवहारः कृतः । आङ्ग्लीयाः अनुभवन्ति स्म यत् एषः विद्रोहः तैः एव कृतः आसीत् इति ।



उत्तरभारते विद्रोहस्य कानिचन प्रमुखानि केन्द्राणि

अन्यत्र –

परमशान्तेः एकस्मै स्वर्गिकसाम्राज्याय

यदा १८५७ तमे वर्षे भारते विद्रोहः प्रासरत् तदा चीनस्य दक्षिणभागेषु अपि कश्चित् विशालः जनविद्रोहः जायते स्म। अयं विद्रोहः १८५०तमवर्षे आरब्धः तथा च १८६० तमे वर्षे समाप्तः । हाङ्गजिकुआङ्गस्य नेतृत्वे सहस्राधिकैः पुरुषार्थाभिः निर्धनैः परमशान्तेः स्वर्गिकसाम्राज्यस्य स्थापनायै युद्धं कृतम्। एषः विद्रोहः ताइपिङ्गविद्रोहनाम्ना ख्यायते।

हांगजिकु-आङ्गः धर्मान्तरेण "ईसाई"धर्मः गृहीतः, सः कन्फ्यूशियसवादस्य बौद्धादिकस्य च परंपरागतस्य चीनिधर्मस्य च विरोधम् अकरोत्। ताइपिङ्गस्य विद्रोहिणः एतादृशस्य साम्राज्यस्य स्थापनां कर्तुम् इच्छति स्म यत्र "ईसाई"धर्मस्य मंस्यते, यत्र कस्यापि पार्श्वे निजसम्पत्तिः न भविष्यति,यत्र सामाजिकवर्गाणां स्त्रीपुरुषयोर्मध्ये च कश्चिदपि भेदः न भविष्यति। यत्र अफीम-तम्बाकू-मदिरासेवने द्युतक्रीडायां वेश्यावृत्तौ क्रीतदासप्रथायां च प्रतिबन्धः भविष्यति।

चीने नियुक्ताः आङ्ग्लसेना फ्रांसीसीसेना च ताइपिङ्गविद्रोहम् अभिभवितुं किंगसाम्राज्यस्य शासकस्य पर्याप्तं साहाय्यम् अकुरुताम्।

कल्पनां करोतु

यत् भवान् विद्रोहकाले अवधे नियुक्तः ब्रिटिशाधिकारी अस्ति । विद्रोहिभिः युद्धार्थं निर्मिताः योजनाः गोपयितुं भवन्तः किं करिष्यन्ति ?

५. आङ्ग्लीयाः निर्णयं कृतवन्तः यत् ते भारतीयजनानां धर्मस्य सामाजिकरीतीनां च सम्माननं करिष्यन्ति।

६. भूस्वामिनां भूमिवतां च रक्षायै अपि च भूमेः उपरि तेषाम् अधिकाराणां स्थायित्वाय नीतयः निर्मिताः।

अनेन प्रकारेण १८५७तमवर्षात् पश्चात् इतिहासस्य नूतनः चरणः आरब्धः।

पुनः स्मरन्तु –

१. झांस्याः राज्ञाः लक्ष्मीबायीवर्यायाः एतादृशी का अभ्यर्थना आसीत् याम् आङ्ग्लीयाः अस्वीकृतवन्तः।

२. ईसाईधर्मावलम्बिनां हितरक्षणार्थम् आङ्ग्लीयैः किं कृतम् ?

३. सैनिकाः आग्नेयचूर्णनाडीकाविषये (कारतूस) किमर्थं रोषः आसीत् ?

४. अन्तिमेन मुगलबादशाहः स्वीयजीवनस्य अन्तिमवर्षाणि कथं यापितवान्।

आगच्छन्तु विचारयामः –

५. मेमासात् १८५७ तमवर्षात् प्राक् भारते स्वस्थितिम आधृत्य आङ्ग्लशासकानाम् आत्मविश्वासस्य कानि कारणानि आसन् ?

६. बहादुरशाहजफरद्वारा विद्रोहिभ्यः समर्थनदानेन जनतायाः राजकुटुम्बानां च उपरि कीदृशः प्रभावः जातः ?

७. अवधस्य विद्रोहिभूस्वामिभिः समर्पणं कारयितुम् आङ्ग्लीयैः किं कृतम् ?

८. १८५७ तमवर्षस्य विद्रोहस्य फलस्वरूपम् आङ्ग्लीयाः स्वनीतीः कथं परिवर्तितवन्तः ?

आगच्छन्तु कृत्वा पश्यामः –

९. अवजानन्तु यत् १८५७तमवर्षस्य युद्धस्य विषये भवतां क्षेत्रे अथवा कुटुम्बस्य जनाः कीदृशाः कथाः कीदृशानि च गीतानि च स्मरन्ति ?

१०. झांस्याः राज्ञ्याः लक्ष्मीबायीवर्यायाः विषये इतोऽपि अवजानन्तु । भवन्तः तां तात्कालिकीं विलक्षणमहिलां किमर्थं मन्यन्ते ?

चित्रम् -१२ – लखनवु-आङ्ग्लावासस्य ध्वंसावशेषाः ।

१८५७ तमवर्षे विद्रोहिसैन्यदलानि आङ्ग्लावासस्य उपरि अधिग्रहणम् अकुर्वन् । अनेकाभिः महिलाभिः पुरुषैः बालैः च आङ्ग्लावासे शरणं प्राप्तम् आसीत्। विद्रोहिभिः एषः सम्पूर्णः परिसरः आवृत्तः अपि च विस्फोटगोलकैः तस्य उपरि आक्रमणं कृतम् । एतादृशेन एव एकेन विस्फोटकगोलकेन अवधस्य मुख्यायुक्तस्य हेलरीलारेन्सस्य मृत्युः अभवत् । हेनरीलारेंसः यस्मिन् प्रकोष्ठः मृत्युं प्राप्तवान् सः एतस्मिन् चित्रे दृश्यते । सावधानं पश्यन्तु यत् भवनेषु अतीतस्य चिह्नानि कथम् अवशिष्टानि सन्ति ।

६ उपनिवेशवादः नगराणि च
(कस्याश्चित् राजसी-राजधान्याः कथाः)

औपनिवेशक-शासने नगराणां किम् अभवत् ?

भवन्तः दृष्टवन्तः यत् ब्रिटिशसत्तायाः स्थापनायाः पश्चात् ग्राम्यजीवनं कथं परिवर्तितम् । तस्मिन् समये नगरेषु किं भवति स्म ? एतस्य प्रश्नस्य उत्तरम् एतस्मिन् तथ्ये आश्रितम् अस्ति यत् वयं कीदृशानां नगराणाम् उपनगराणां च विषये चर्चयामः इति । मदुरैसदृशानां मन्दिर-नगराणाम् इतिहासः ढाका-सदृशेभ्यः उत्पादक-नगरेभ्यः सूरतसदृश-पोतस्थानकेभ्यः अथवा युगपत् विविधकार्याणि कुर्वद्भ्यः उपनगरेभ्यः सर्वथा पृथक् अस्ति इति वयं प्राप्स्यामः ।

पश्चिमदेशानाम् अधिकेषु भागेषु आधुनिकनगराणि औद्योगीकरणेन सह एव दृष्टिपथम् आगतानि आसन् । ब्रिटेने लीड्स-मैनचेस्टरसदृशानि नगराणि एकोनविंशति-विंशतिशताब्दयोः तीव्रतया विकसितानि, यतो हि तत्र अनेके जनाः वृत्तिं भवनम् अन्यसौविध्यानि च प्राप्स्यामः इति आशया नगराणि प्रति आगच्छन्ति स्म । परन्तु एकोनविंशतिशताब्दे भारतीयनगराणां पश्चिमयूरोपीयनगराणाम् इव तीव्रतया विकासः न अभवत् । एतादृशं कस्मात् कारणात् अभवत् ?

चित्रम्-१ मछलीपट्नम् इत्यस्य स्थानस्य किञ्चित् दृश्यम्, १६७२ ।

मछलीपट्नम् इति सप्तदशशताब्दे महत्त्वपूर्ण-पोतस्थानक-रूपेन विकसितम् । अष्टादशशताब्दस्य अन्ते यदा वाणिज्यं बम्बयी-मद्रास-कलकत्तानगराणां नूतनब्रिटिश-पोतस्थानकेषु केन्द्रितम् अभवत् तदा तस्य मछलीपट्नमस्य महत्त्वं शनैः शनैः न्यूनभवत् ।

अष्टादश शताब्दस्य अन्ते कलकत्ता-नगरस्य बम्बयी-महानगरस्य मद्रासस्य च महत्त्वं प्रेजिडेंसी इति नगराणां रूपेण तीव्रतया वर्धते स्म । एतानि नगराणि भारते ब्रिटिशसत्तायाः केन्द्रभूतानि आसन् । तस्मिन् काले अन्यानि नगराणि दुर्बलानि जायमानानि आसन्। विशिष्टवस्तूनाम् उत्पादकाणि बहूनि नगराणि एतस्मात् कारणात् अविकसितानि जातानि यतोहि तत्र येषां वस्तूनां निर्माणं भवति स्म तेषाम् अभ्यर्थना न्यूना जाता आसीत् । यदा वाणिज्यं नूतनक्षेत्रेषु केन्द्रितम् अभवत् तदा पुरातनानि वाणिज्यिक-केन्द्राणि पोतस्थानकानि च पुरातनावस्थायां न अतिष्ठन्। अनेन एव प्रकारेण आङ्ग्लीयैः स्थानीयाः राजानः पराजिताः तथा च शासनस्य नूतनकेन्द्राणि स्थापितानि। तस्मिन् काले क्षेत्रीयसत्तायाः पुरातनकेन्द्राणि अपि ध्वसितानि । एषा प्रक्रिया प्रायः विनगरीकरणम् (विशहरीकरण) इति उच्यते । मछलीपट्नम-सुरत-श्रीरंगपट्सदृशानां नगराणाम् एकोनविंशतिशताब्दे आधिक्येन विनगरीकरणम् अभवत्। विंशतिशताब्दस्य आरम्भे केवलम् एकादशप्रतिशतं जनाः एव नगरेषु निवसन्ति स्म ।

प्रेजिडेंसी- (आङ्ग्लशासन-मुख्यालयाः) शासनस्य सौविध्यस्य दृष्ट्या औपनिवेशिकभारतं त्रिषु प्रेजिडेंसी (बम्बई-मद्रास-बङ्गालेषु) इत्येतेषु विभक्तम् आसीत्। एतानि त्रीणि प्रेजिडेंसी इत्येतानि सूरत-मद्रास-कलकत्तानगरेषु स्थितेषु ईस्ट-इण्डियासंस्थायाः "उद्योगगाराणि (वाणिज्यिक-चतुष्पीठानि) च मनसि निधाय निर्मितानि आसन्।



चित्रम् -२- अष्टादश-शताब्दे बम्बयि-महानगरस्य पोतस्थानकम्।

ऐतिहासिक-राजस-नगरं देहली एकोनविंशतिशताब्दे कश्चित् धूलिबहुलम् उपनगरम् आसीत्। परन्तु द्वादशाधिकैकोन-विंशति-तमे वर्षे (1992) ब्रिटिशभारतस्य राजधानी यदा एतत् देहलीनगरं जातं, ततः परं पुनः एतत् विकासपथम् आरूढवत्। आगच्छन्तु, देहलीविषयकां कथां दृष्ट्वा अवगच्छन्तु यत् औपनिवेशिक-शासनकाले अत्र किं चलति स्म ?

यदा ईस्ट-इण्डियासंस्था पश्चिमभारतस्य बम्बयीमहानगरस्य मुख्यपत्तनरूपेण प्रयोगम् आरभत तदा बम्बयीनगरस्य विस्तारः आरब्धः।

नवदेहल्याः प्राक् अन्याः कियत्यः देहल्यः आसन् ?

भवन्तः देहलीम् आधुनिकभारतस्य राजधानीरूपेण पश्यन्ति । किं भवन्तः जानान्ति यत् एतत् नगरं सहस्राधिकवर्षाणि यावत् राजधानीरूपेण आसीत्। एतस्मिन् अवधौ अत्र न्यूनाधिकानि परिवर्तनानि अपि जातानि सन्ति। यमुनानद्याः वामतटे प्रायः षष्ठी-वर्ग-मील-परिमिते लघुक्षेत्रफले न्यूनातिन्यूनं चतुर्दश-राजधान्यः पृथक् पृथक् काले स्थापितानि। आधुनिक-देहली-राज्ये भ्रमणावसरे एतासां सर्वासां राजधानीनाम्

नगरीयकरणम् (शहरीकरण) – एतादृशी प्रक्रिया यत्र आधिक्येन जनाः नगराणि उपनगराणि च गत्वा वसन्ति।



चित्रम्-३- एकोनविंशतिशताब्दस्य मध्यकाले शाहजहांनाबादस्य एकं चित्रम्, दि-इलेस्ट्रेटेड-लन्दन-न्यूज, १६जनवरी१८५८। भवन्तः वामपक्षे रक्तदुर्गं द्रष्टुं शक्नुवन्ति। नगरं परिवेष्टयन्तीः भित्तीः सावधानं पश्यन्तु। मध्ये चादनीचौकस्य मुख्यमार्गः दृश्यते। पश्यन्तु यमुना नदी रक्तदुर्गम् अनुप्रवहति। अधुना एतस्याः यमुनानद्याः मार्गः किञ्चित् परिवर्तितम् अस्ति। यत्र नौका तटं प्रति वर्धते अधुना एतत् स्थानं दरियागंज इति उच्यते।(दरिया इत्यस्य अर्थः नदी, गंज इत्यस्य च अर्थः विपणिः इति भवति)।

यवन-सतां मन्दिरम् (दरगाह इति) - यवन-सन्त-समाधि-स्थलम्

भिक्षुविहारः - (खानकाहः इति) – यात्रिभ्यः विश्रामगृहं तथा च एतादृशं स्थानं यत्र जनाः आध्यात्मिक-विषयेषु चर्चयन्ति, महात्मानः यत्र आर्शीवचोभिः जनान् अनुगृह्णन्ति अथवा नृत्यसङ्गीतादि-कार्य-क्रमैः आनन्दम् अनुभवन्ति।

यवनमन्दिरम् (ईदगाह इति) – मुस्लिम-जनानां प्रकट-प्रार्थना-स्थलम्, यत्र सर्वजनिक-रूपेण प्रार्थनाः उत्सवाः च भवन्ति।

कुल-दे-सेक इति - एतादृशः मार्गः यः एकस्मिन् स्थाने गत्वा पिहितः भवति अथवा निश्चितस्थानं प्राप्य विरम्यमाणः मार्गः

अवशेषान् द्रष्टुं शक्नुमः। एतासु द्वादशत्रयोदश-शताब्द्योः मध्यकाले स्थापितानि राजधानी-नगराणि सर्वेषु महत्त्वपूर्णानि आसन्।

एतासु सर्वासु राजधानीषु सुन्दरतमा राजधानी शाहजहांनृपस्य आसीत्। शाहजहांना-बादस्य स्थापना नवत्रिंशदधिक-षोडश-शततमे वर्षे (१६३९) अभवत्। एतस्याः राजधान्याः अन्तः एकः दुर्गः नातिदूरे च एकं नगरं च आसीत्। लोहित-पाषाण-निर्मीते रक्तदुर्गे प्रासादपरिसरः निर्मितः आसीत्। एतस्य प्रासादस्य पश्चिमभागे चतुर्दशद्वारयुक्तम् एकं पुरातनगरम् आसीत्। चान्दनी-चौकस्थले फैजमहाहट्टस्य च मुख्यमार्गाः एतावन्तः प्रथिताः आसन् यत् ततः राजयात्राः सरलतया निर्गन्तुं शक्नुवन्ति स्म। चान्दनीचौक इति मध्ये कुल्यः आसीत्।

सघननिवासैः द्वादशाधिकमहाहट्टैः च परिवृत्तः जामायवनमन्दिरं भारतस्य विशालतमेषु भव्ययवनमन्दिरेषु च कश्चित् आसीत्। तस्मिन् काले सम्पूर्णे नगरे एतस्य यवनमन्दिरात् उन्नतस्थानं नासीत्।

शाहजहांवर्यस्य काले देहली सूफी-संस्कृतेः अपि प्रमुख-केन्द्रभूता आसीत्। अत्र यवनसतां मन्दिरम् (दरगाह) यवन-भिक्षु-विहारः (खानकाह)-यवनमन्दिरम् (इदगाह) इत्यादीनि आसन्। महान्ति चतुष्पीठानि, तिर्यक्-विथयः, शान्तस्य कुल-दे-सेक इत्यस्य (एतादृशः मार्गः यः एकस्मिन् स्थाने गत्वा पिहितः भवति।) तथा च जलधाराणाम् उपरि देहलीस्थजनाः गर्वम् अनुभवन्ति स्म। प्रायः एतस्मात् कारणात् एव मीर-तकी-मीरः अवदत् आसीत् "देहल्याः राजमार्गाः केवलं सामान्यमार्गाः एव न सन्ति ते तु कस्यचित् चित्रकारस्य चित्रावल्याः पृष्ठानि इव सन्ति।"

परन्तु इदम् अपि आदर्शनगरं नासीत्। अत्रत्याः सुखसौविध्यानि विलासिता चापि केषाञ्चित् जनानां भाग्ये एव आसन्। सम्पन्नस्य विपन्नस्य च मध्ये महत् पार्थक्यम् आसीत्। प्रासादानां समीपे एव निर्धनानाम् असंख्यकानि मृण्मयानि गृहाणि भवन्ति स्म । कवितापाठः नृत्यसङ्गीतादीनि च केवलं पुरुषाणां मनोरञ्जनाय साधनभूतानि भवन्ति स्म । उत्सवेषु यात्रादिषु जनसम्मर्देषु च यदा कदा विरोध-प्रदर्शनादिकम् अपि भवति स्म।





चित्रम्-५- देहल्यां निजामुद्दीन-औलियायाः समाधि-स्थलम् (दरगाह इति)।

नवदेहल्याः निर्माणम्

१८०३ तमवर्षे आङ्ग्लीयाः मराठाजनान् पराजित्य देहल्याः उपरि नियन्त्रणं स्थापितवन्तः । यतो हि ब्रिटिशभारतस्य राजधानी कलकत्तानगरम् आसीत् अतः मुगलशासकः रक्तदुर्गस्थे प्रासादे उषितुं मुक्तः आसीत्। अद्य अस्माकं पुरतः यत् आधुनिक-नगरम् अस्ति एतस्य देहलीनगरस्य निर्माणम् एकादशाधिकैकोन-विंशति-शत-तमे वर्षे(१९११) तदा आरब्धं यदा देहली ब्रिटिशभारतस्य राजधानी जाता।

एकस्य अतीतस्य ध्वंसनम्

१८५७तमवर्षात् पूर्वं देहल्याः स्थितिः अन्येषाम् औपनिवेशिकनगराणाम् अपेक्षया अतीव पृथक् आसीत् । मद्रास-बम्बयी-कलकत्तामहानगरेषु भारतीयानाम् आङ्ग्लीयानां च वसतयः पृथक् पृथक् आसन्। भारतीयाः "कृष्णक्षेत्रेषु आङ्ग्लीयाः च शोभमानेषु श्वेतक्षेत्रेषु निवसन्ति स्म। देहल्याम् उपर्युक्तव्यवस्था नासीत्। विशेषतया

स्रोतः -१

"देहली किञ्चित् नगरम् आसीत् (आलम में इंतखाब)....."

नवत्रिंशदधिकाधिक-सप्त-दशशते तमे वर्षे (१७३९) देहली नादिरशाहद्वारा नाशिता लुण्डिता च आसीत् । अष्टदशशताब्दस्य देहलीनगरस्य पतनस्य विषये अष्टदशशताब्दस्य उर्दुकविः मीर-तकी-मीरः सदुःखं वर्णयति –

"देहली किञ्चित् नगरम् आसीत् यत् विश्वे विशिष्टम् अग्रगण्यं भव्यं च आसीत् (आलम में इंतखाब)....."

वयं तस्य एव नष्टस्य नगरस्य

वास्तव्याः स्मः ,

(अहं तस्य एव नष्टस्य देहलीनगरस्य निवासी अस्मि यत् कस्मिंश्चित् काले संसारस्य भव्यतमेषु नगरेषु आसीत्)।

पुष्पोत्सवः (गुलफरोशान) – पुष्पाणाम् उत्सवः ।

पुनर्जागरणम् – एतस्य शब्दस्य शाब्दिकः अर्थः भवति कलायाः ज्ञानस्य च पुनर्जन्म इति । अयं शब्दः एतादृशस्य कालस्य कृते प्रयुज्यते यदा व्यापकतया रचनात्मकाः गतिविधयः भवन्ति ।

एकोन-विंशति-शताब्दस्य पूर्वार्द्धे देहल्याः आङ्ग्लीयाः अपि पुरातन-नगरस्य अन्तः धनाढ्यभारतीयैः सह एव निवसन्ति स्म । ते अपि उर्दूसंस्कृतेः अथवा फारसीसंस्कृतेः च कवितापाठेन आनन्दिताः भवन्ति स्म स्थानीयोत्सवेषु च अपि भागं गृह्णन्ति स्म ।

चतुर्विंशत्यधिकाष्टादशशततमे वर्षे (१८२४) देहलीमहाविद्यालयस्य स्थापना अभवत् यस्य आरम्भः अष्टादशशताब्दे यवनविद्यालयरूपेण (मदरसे) अभवत् । अनया संस्थया विज्ञानस्य मानवशास्त्रस्य च क्षेत्रे कस्यचित् नूतनयुगस्य सूत्रपातः कृतः । अत्र मुख्यतया उर्दूभाषया कार्यं भवति स्म । अनेके जनाः वदन्ति यत् त्रिंशदधिकाष्टादशशततमवर्षात् (१८३०) सप्तपञ्चाशदधिकाष्टा-दश-शत-तम-वर्षावधिः (१८५७) देहल्याः पुनर्जागरणकालावधिः आसीत् इति ।

सप्तपञ्चाशदधिकाष्टादशशत-तम-वर्षावधेः (१८५७) पश्चात् इदं सर्वं परिवर्तितम् । तस्मिन् वर्षे यः विद्रोहः अभवत् तदा विद्रोहिभिः बहादुरशाहजफरः विद्रोहस्य नेतृत्वाय साग्रहं निवेदितः । मासचतुष्टयं यावत् देहली विद्रोहिणां नियन्त्रणे आसीत् ।



चित्रम् ६ ब्रिटिशसैन्यसमूहाः प्रतिकारभावनया देहल्याः राजमार्गेषु विद्रोहिणः हन्ति ।

यदा आङ्ग्लीयैः पुनः नगरस्य उपरि नियन्त्रणं प्राप्तं तदा आङ्ग्लीयैः प्रतिकार-भावनया लुण्ठनकार्यम् आरब्धम् । प्रसिद्धः कविः(शायर) गालिब-उदासः मनसा एताः घटनाः पश्यति स्म । १८५७ तमवर्षे देहल्याः समूलनाशः तेन एतैः शब्दैः अभिव्यक्तः "यदा कुपिताः सिंहाः (आङ्ग्लीयाः) नगरं प्रविष्टवन्तः तदा ते असहायजनान् मारितवन्तः... गृहाणि ज्वलितवन्तः । न जाने तदा कियन्तः महिलाः कियत्यः महिलाः सामान्यनागरिकाः विशिष्टाः च जनाः द्वारत्रयस्य माध्यमेन देहलीतः पलायितवन्तः । ते लघुकुटुम्बरूपेण नगरात् बहिः यवनालयान् आश्रितवन्तः" । अग्रिमविद्रोहान् रोद्धुं आङ्ग्लीयाः बहादुरशाहजफरं देशात् बहिः निष्कासितवन्तः। आङ्ग्लीयैः सः बर्मादेशं (वर्तमानम्यांमारं) प्रेषितः, तस्य शासनं नाशितम्, अनेके प्रासादाः निपातिताः,उद्यानानि पिहितानि तथा च तेषां स्थाने स्वसैन्यस्थानि (बैरक इति) निर्मितानि ।

आङ्ग्लीयाः देहल्याः मुगलातीतं सर्वथा विस्मारयितुम् इच्छन्ति स्म । दुर्गं परितः सम्पूर्णक्षेत्रं स्वच्छीकृतम् । तत्रत्यानि उद्यानानि क्रीडाक्षेत्राणि यवनालयाः च

स्रोतः -२

"कदाचित् एतस्य नाम्नः अपि नगरम् अभवत्"

देहल्याः जायमानैः परिवर्तनैः गालिबः गभीररूपेण दुःखी आसीत् । सः देहल्याः अतीतस्य विषये अलिखत् –

किं लिखानि ? देहल्याः जीवनं तु दुर्गेण चान्दनी-चौकेन यमुनासेतौ क्रीडकाणां समूहैः(चौकडियां) वार्षिकेण पुष्पोत्सवेन (गुलफरोशान) च शोभते । यदि उपयुक्तानि एतानि सर्वाणि वस्तूनि अत्र देहल्यां न सन्ति तर्हि देहली कथं स्थिरा भवितुं शक्नोति ? आम्, हिन्दुस्ताने कदाचित् एतत् नामधेयं नगरम् अवश्यम् एव आसीत् ।

नष्टीकृताः (तैः मन्दिराणि न भिन्नानि) । आङ्ग्लीयाः पार्श्वस्थं क्षेत्रं सुरक्षयितुम् इच्छन्ति स्म । विशेषतः यवनालयाः (मस्जिद इति) नाशिताः अथवा तेषां प्रयोगः पृथक्कार्याय कर्तुम् आरब्धवन्तः । उदाहरणार्थं जीनत-अल-मसजिद इति पर्युषरोटिकोद्योगगाररूपेण (ब्रैड कारखाना) परिवर्तितम् । जामा-यवनालये (जामा मस्जिद) पञ्चवर्षाणि यावत् कोऽपि प्रार्थनां(नमाज) न कर्तुं शक्नोति स्म । नगरस्य तृतीयांशः ध्वंसितः । कूल्यानां भेदनं कृत्वा ताः समतलाकाराः कृताः ।

रेलवे इत्यस्य स्थानपनायै नगरस्य परिवेष्टनभित्तीनां (चारदीवारी) च विस्ताराय सप्तसप्तत्यधिकाष्टादशशततमे (१८७७) दशके शाहजहांनाबादस्य पश्चिमभित्तयः त्रोटिताः । अधुना आङ्ग्लीयाः उत्तरपक्षे विकसिते विशाले सिविल-लाइन्सक्षेत्रे वसितुम् आरब्धवन्तः । अधुना ते पुरातननगरेषु भारतीयैः सह न तिष्ठन्ति स्म । देहल्याः महाविद्यालयः(कालेज इति) विद्यालयरूपेण (स्कूल) परिवर्तितः सप्त-सप्तत्यधिकाष्टा-दश-शत-तमे वर्षे (१८७७) च तस्य पिधानं कृतम् ।

चित्रम् -७ जामामस्जिदतः दृष्टे सति। फेलिसबिएतोद्वारा आकृष्टं चित्रम्, १८५८-५९.

यवनालयं (मस्जिद इति) परितः निर्मितानि भवनानि पश्यन्तु । १८५७ तमवर्षीयात् विद्रोहात् परम् एतानि भवनानि स्वच्छीकृतानि



चित्रम्-८ -पार्श्वस्थानां भवनानां पातनात् पश्चात् जामा-यवनालयस्य (जामा मस्जिद) दृश्यम् ।

➢ गतिविधिः

सप्तमचित्रस्य अष्टमचित्रस्य च मध्ये पस्परं तुलनां कुर्वन्तु । एतयोः चित्रयोः मध्ये यत् पार्थक्यं दृश्यते तस्मात् अत्रत्यजनानाम् उपरि के प्रभावाः जाताः स्युः ?

एकस्याः नूतनराजधान्याः योजना

आङ्ग्लीयाः देहल्याः साङ्केतिकस्य महत्त्वस्य विषये समीचीनतया जानन्ति स्म । परिमाणतः,सप्तपञ्चाशदधिकाष्टादशशततम-वर्षस्य (१८५७) विद्रोहात् परं ते बहूनि विशिष्टानि आयोजनानि अकुर्वन् । सप्तसप्तत्यधिकाष्टा-दश-शत-तमे वर्षे (१८७७) वायसरायलिटनः राज्ञी-विस्टोरियां भारतस्य सम्राज्ञीरूपेण घोषयितुं कस्याश्चित् राजसभायाः आयोजनं कृतम् । वस्तुतः तदानींकालं यावत् ब्रिटिशभारतस्य राजधानी अधुना अपि कलकत्तायाम् एव आसीत् परन्तु एतस्य विशालायाः राज-सभायाः आयोजनं देहल्यां कृतम् । एतस्य किं कारणं स्यात् ? विद्रोहकाले आङ्ग्लीयैः अवगतम् आसीत् यत् जनानां दृष्टौ अधुना अपि मुगलसम्राजः महत्त्वं वर्तते ते च तमेव स्वप्रमुखं मन्यन्ते । परिणामतः, ब्रिटिशजनैः मुगलसम्राजः सप्तपञ्चाशदधिकाष्टादश-शत-तम-वर्षस्य (१८५७) च विद्रोहिणां मुख्यकेन्द्रेषु सम्पूर्णेन चाकचक्येन प्रदर्शनं कृतम् ।



जार्जपञ्चमस्य राज्याभिषेक-राजसभा (कारोनेशन इति), १२ दिसम्बरमासः, १९११ तमवर्षम्,

एतस्यां राजसभायां लक्षाधिकभारतीयाः राजानः महाराजानः आङ्ग्लाधिकारिणः सैनिकाः च सङ्घीभूताः जाताः ।

एकादशाधिकैकोनविंशति-शत-तम-वर्षे (१९११) जार्जपञ्चमः इङ्ग्लैण्डस्य नृपः घोषितः, तस्मिन् अवसरे देहल्याम् एकस्याः राजसभायाः पुनः आयोजनं कृतम् । भारतस्य राजधानी कलकत्ता इति न भवेत् अपितु देहली भवेत् इति विषये निर्णयः घोषणा च अपि अभवत् यत् अधुना देहली भारतस्य राजधानी भविष्यति इति ।

तात्कालीन-नगरस्य दक्षिणभागे रायसीनोपत्यकायां दशवर्गमील-परिमिते स्थाने नवदेहल्याः निर्माणं कृतम् । एडवर्डलटयंसः हर्बर्टबेकरः च द्वौ वास्तुकारौ नवदेहल्याः तस्याः भवनानां च प्रारूप-निर्माण-कार्ये नियोजितौ । नवदेहली-स्थित-सर्वकारि-परिसरे मील-द्वय-परिमित-प्रथितः मार्गः, वायसरायस्य प्रासादं गन्तुं (वर्तमान-राष्ट्रपति

रायसीना पर्वतोपत्यकानां स्थितः वायस-रीगल-पैलेस इति (राष्ट्रपतिभवनम्) ।



भवनम् इति) मार्गः (वर्तमान-राजपथः), राजपथम् उभयतः सचिवालयस्य भवनानि निर्मितानि सन्ति । एतेषां सर्वकारिभवनानां संरचनायां भारतस्य राजेतिहासस्य(शाही इतिहास) पृथक् पृथक् कालस्य दिग्दर्शनं भवति स्म । पुनरपि एतस्य स्थूलरूपेण प्रारूपं क्लासिकी-यूनास्य (ख्रिस्ताब्दात् पूर्वं पञ्चमशताब्द्याः वास्तुशिल्पं तत्र दृश्यते । उदाहरणार्थं, वायस-राय-भवनस्य केन्द्रिय-गोलाकारछदिः (गुंबद) साच्यां निर्मितस्य बौद्धस्तूपस्य एव आसीत् । तत्र रक्त-बभ्रू-पाषाणस्य चित्रित-जालानां च प्रेरणा मुग्लवास्तुशिल्पात् स्वीकृता आसीत् । परन्तु नूतनभवनेषु ब्रिटिशप्रभुत्वस्य किञ्चिद्दर्शनम् अपि आवश्यकम् आसीत् । अतः वासुकारैः अयं विषयः अपि मनसि धृतः यत् वायसरायस्य प्रासादः शाहजहांवर्यस्य जामा-यवनालयात् (जामा मस्जिद इति) अपि उच्चतरः स्यात्!

इदं कार्यं कथं कर्तुं शक्यते स्म ?

नवदेहल्याः निर्माणे प्रायः विंशतिवर्षाणि अलगन् । शाहजहांना-बाद-सदृशं नगरं न स्यात् अपितु तस्मात् भिन्नं नगरं भवेत् इति संकल्पना आसीत् । तस्मिन् नगरे जनसम्मर्दयुक्तवस्तयः(भीड भरे मोहल्ले) संकीर्णविथयः च न भवेयुः इति प्रयासः आसीत् । नवदेहल्यां प्रथितानां सरलराजमार्गाणां विशाल-परिसराणां च मध्ये उन्नतानि भवनानि भवेयुः इति एतादृशी संकल्पना कृता आसीत् । पुरातन-देहल्याम् अव्यवस्था दृश्यते स्म । नूतननगरं स्वच्छं स्वस्थं च दृश्यते स्म । जनसम्मर्दयुक्तानि अस्वच्छानि च क्षेत्राणि स्वास्थ्याय समीचीनानि न सन्ति हानिकारक-रोगजनकानि च तानि भवन्ति इति आङ्ग्लीयाः चिन्तयन्ति स्म । अतः नवदेहल्यां समीचीन-जलापूर्त्तेः अवकरस्य च निकासाय नालिकानां सम्पूर्णां व्यवस्थां आङ्ग्लीयाः सज्जीकृतवन्तः । देहलीं च ते आधिक्येन हरितिमा-पूर्णाम् अकुर्वन् । तत्र वृक्षयुक्तानि दीर्घाणि उद्यानानि चापि निर्मितानि तस्मात् च निरन्तरं शुद्धवायोः ओषजनस्य (आक्सीजन) च प्राप्तिः भवेत् ।

स्रोतः-३-

नवदेहल्याः संकल्पना

किमर्थं वायसराय-हार्डिंगः देहलीं भारतस्य राजधानीरूपेण अचिनोत् ? इति तत्र कारणं तेन उक्तम्-

इदं परिवर्तनं भारतीयजनानां कल्पनानुरूपं भविष्यति.....तथा च सर्वे जनाः भारते ब्रिटिशशासनं भवेत् इति दिशि अदम्यस्य संकल्पस्य रूपेण एतस्य कार्यस्य प्रशंसां करिष्यन्ति ।

वास्तुकारस्य हर्बटबेकरस्य दृष्टौ ....

नवराजधानी सुशासनस्य ऐक्यस्य च प्रतीकभूता भवेत् इति ब्रिटिशशासनस्य अन्तर्गतं भारतस्य इतिहासे काचित् नूतना घटना अस्ति । भारते ब्रिटिशशासनं केवलं शासनस्य संस्कृत्तेः च कस्यचित् तलस्य इव नास्ति । इयं काचित् विकाशशीला सभ्यता अस्ति, एतस्यां पूर्वस्य पश्चिमस्य च श्रेष्ठतत्त्वानां मिश्रणम् अस्ति--- । देहल्याः वास्तुशिल्पे एतस्य महतः तथ्यस्य दर्शनं स्यात् । (२अक्टूबरमासः,१९१२तमवर्षम्)

➢ गतिविधिः

कल्पयन्तु,भवन्तः राष्ट्रपतिभवनं पश्यन्तः रायसीना-पर्वतोपत्यकां प्रति गच्छन्ति । किं बेकरमहोदयः इव भवन्तः अपि इत्थम् अनुभवन्ति यत् एतस्मिन् भवने दृष्टे सति एतस्य भव्यतायाः ब्रिटिशसत्तायाः शक्तेः च बोधः भवति ।

➢ गतिविधिः

किं भवन्तः एतस्मिन् अध्याये द्वे उदाहरणे अन्वेष्टुं शक्नुवन्ति याभ्याम् अवगम्यते यत् राजधान्याः छविविषये किञ्चित् पृथक् चिन्तनम् अपि विद्यमानम् आसीत् ।

विभाजनकालिकं जीवनम्

सप्तचत्वारिंशदधिकैकोन-विंशति-तमे वर्षे (१९४७) भारतस्य विभाजनेन नूतनसीमां परितः जनसंख्या व्यापकसंख्यायां विस्थापिता। परिणामतः देहल्याः जनसंख्या वर्धिता। आजीविकायाः साधनानि परिवर्तितानि। नगरस्य च संस्कृत्तिः सर्वथा पृथक् जाता।

स्वतन्त्रतायाः विभाजनस्य च केभ्यश्चित् एव दिनेभ्यः पश्चात् उपद्रवाः प्रारब्धाः। देहल्यां सहस्राधिकाः जनाः हताः तेषां जनानां च गृहाणि विलुण्ठ्य भस्मसात्कृतानि। देहलीतः ये मुस्लिमजनाः पाकिस्तानम् अगच्छन् तेषां मुस्लिमजनानां स्थानं पाकिस्तानतः आगतैः सिक्खजनैः हिन्दुशरणार्थिभिः च अधिकृतम्। शाहजहांनाबादे स्वामिरहितानां भवनानां अधिग्रहणाय शरणार्थिनां समूहाः परिभ्रमितुम् अन्वेष्टुं च आरब्धवन्तः। विविधप्रकारेण मुस्लिमजनान् तेषां सम्पत्तीः विक्रेणाय पलायितुं चापि तान् बाध्यान् अकुर्वन्। देहल्याः द्वित्रांश-मुस्लिमजनाः पलायितवन्तः तस्मात् तत्र चतुश्चत्वारिंशत्सहस्रं गृहाणि रिक्तानि जातानि। अनेके मुस्लिमजनाः पाकिस्तानं गन्तुं यानप्रतीक्षायाम् अस्थिरशिविरेषु निवसितुम् आरब्धवन्तः।

तस्मिन् काले देहली शरणार्थिनगररूपा अजायत। देहल्याः जनसंख्यायां प्रायः पञ्च लक्षं जनानां वर्धनम् अभवत्। (अपरञ्च १९५१ तमवर्षे अत्रत्या जनसंख्या अष्टौ लक्षतः किञ्चिदधिका आसीत्।) प्रायः अधिकाः जनाः पञ्चनदप्रान्ततः आगतवन्तः आसन्। ते शिविरेषु विद्यालयेषु सैन्यस्थलेषु उद्यानेषु च आगत्य वसितुम् आरब्धवन्तः। तेषु केचन जनाः रिक्तगृहाणि अधिग्रहीतुम् (कब्जा) अवसरं प्राप्तवन्तः। अनेके जनाः शरणार्थिवस्तिषु उषितवन्तः। लाजपतनगर-तिलकनगर-सदृशवस्तयः तस्मिन् काले एव स्वरूपं प्राप्तवत्यः। देहलीम् आगन्तुकानां सौविध्याय नित्योपयोगि-वस्तूनाम् आपूर्तये च अत्र हट्टाः महाहट्टाः च उद्घाटिताः। अनेके नूतनाः विद्यालयाः महाविद्यालयाः चापि उद्घाटिताः।

ये जनाः इतः अगच्छन् तेषां स्थाने आगतानां शरणार्थिनां निपुणता उद्योगाः कार्याणि च सर्वथा पृथक् आसन् इति। ये मुस्लिमजनाः इतः पाकिस्तानम् अगच्छन् तेषु बहवः शिल्पिनः लघुव्यापारिणः श्रमिकाः च आसन्। देहलीं ये आगताः नूतनाः जनाः ग्रामीणभूस्वामिनः, अधिवक्तारः, शिक्षकाः वणिजः आपणिकाः च आसन्। विभाजनस्य कारणात् तेषां जीवनं उद्योगाः चापि परिवर्तिताः। जङ्गमापणिकाः काष्ठकाराणां लौहकाराणां च रूपेण अत्र आजीविकाम् आरब्धवन्तः। बहवः जनाः एतेषु उद्योगेषु साफल्यम् अपि प्राप्तवन्तः।

चित्रम्-११ विभाजनात् पश्चात् सहस्राधिकाः जनाः देहल्यां निर्मितेषु शरणार्थिशिविरेषु अवसन्।

पञ्चनदप्रान्ततः आगतैः विशाल-जन-सङ्घैः देहल्याः सामाजिकपरिवेशः सर्वथाः परिवर्तितः। भोजनस्य कलायाः वेशभूषायाः अथवा परिधानस्य च क्षेत्रे परिवर्तनानि जातानि, मुख्यतया तत्र उर्दू-आधारिता नगरीया संस्कृत्तिः नूतनरुचीनां संवेदन-शीलतानां च कारणात् अभिभवं प्राप्तवती।

पुरातननगराणाम् अन्तः

एतस्मिन् कालाभ्यन्तरे पुरातनस्य नगरस्य अर्थात् शाहजहां-नाबादस्य किम् अभवत्? अतीते मुगलकालस्य प्रसिद्धकूल्याभ्यः

गृहेषुपानीयंजलम्एवनआगच्छतिस्मअपरञ्चअन्याभ्यःगृह्यावश्यकताभ्यःअपि जलं लभ्यते स्म। एकोनविंशतिशताब्द्यां जलापूर्त्तेः निष्कासस्य च समीचीनतमा व्यवस्था आसीत् परन्तु तस्याः अवहेलनं प्रारब्धम्। कूपानां वापीनां च अव्यवस्था जाता। गृह्यावकरस्य निष्कासाय याः धाराः कुल्याः च आसन् ताः अपि क्षतिग्रस्ताः अभवन्। एषा स्थितिः तदानीन्तनस्य कालस्य अस्ति यदा नगरस्य जनसंख्या निरन्तरं वर्धते स्म।

जीर्णाःभग्नाःचकुल्याःतीव्रतयावर्धमानायाःजनसंख्यायाःआवश्यकताःन पूरयितुं शक्नुवन्ति स्म। एकोनविंशतिशताब्द्याः अन्ते शाहजहांद्वारा निर्मापिताः नालिकाः पिहिताः तथा च मुक्तनालिकानां नूतनव्यवस्था विकासम् आनीता। शीघ्रमेव एषा प्रणाली अपि अतिभारेण अव्यवस्थां गता। अनेके धनाढ्याः जनाः राजमार्गस्य प्रान्तभागेषु प्रवहन्तिभिः नालिकाभिः मुक्ताभिः मलमूत्रपूरित-नालिभिः बाधां च अनुभवन्ति स्म। देहली-नगर-निगम-परिषद् सुनिष्कास-व्यवस्थायाः उपरि धनं व्ययीकर्तुं सज्जा न आसीत्। तथापि, तस्मिन् काले नूतनदेहल्याः क्षेत्रेषु निष्कास-व्यवस्थायाः उपरि लक्षाधिकरूप्यकाणि व्ययीकृतानि।



चित्रम्-१२ देहल्यां निजामुद्दीन-औलियावर्यस्य स्मारकस्थलस्य समीपे निर्मिता काचित् प्रसिद्धा वापी।

राजप्रासादानां पतनम्

सप्तदशाष्टादशशताब्दयोः मुगल-कुलीन-वर्गीयाः जनाः रम्येषु राजप्रासादेषु निवसन्ति स्म। एकोनविंशति-शताब्दस्य मध्यकालस्य चित्रे दृष्टे सति एतादृशाः न्यूनातिन्यूनाः शतं राजप्रसादाः दृश्यन्ते। अलिन्दयुक्तानि(दालान) जल-प्रपात-युक्तानि च भव्यभवनानि आसन्।

चित्रम् -१३ एकोनविंशतिशताब्दस्य उत्तरार्द्धे देहल्याः चान्दनीचौक इति।



➢ गतिविधिः

द्वयोः बालयोः कल्पनां कुर्वन्तु। तयोः एकः प्रासादे (हवेली) निवसति अपरः च औपनिवेशिके भवने। स्वकुटुम्बेन सह तयोः सम्बन्धेषु का भिन्नता भविष्यति ? भवन्तः कस्य बालकस्य इव जीवितुम् एषिष्यन्ति ? स्वसहपाठिभिः सह निजपरामर्शस्य विषये चर्चयन्तु अपि च तान् सूचयन्तु यत् भवता कथं एतस्य चयनं कृतम् ? इति।

एकस्मिन् प्रासादे (हवेली इति) अनेके कटुम्बाः निवसन्ति स्म। सुन्दरेण मुख्यद्वारेण प्रविष्टे सति प्रासादाभ्यन्तरे (हवेली इति) भवन्तः एकस्मिन् मुक्ते प्राङ्गणे (अहाते में) प्राप्नुवन्ति स्म। प्राङ्गणं परितः अतिथीनां वणिजां च कृते सार्वजनिकप्रकोष्ठाः भवन्ति स्म येषां प्रयोगं केवलं पुरुषाः एव कुर्वन्ति स्म। आन्तरिकाः आलिन्दाः प्रकोष्ठाः च कुटुम्बस्य महिलानां प्रयोगाय भवन्ति स्म। प्रासादस्थानां प्रकोष्ठानां प्रयोगः विविधेभ्यः कार्येभ्यः भवति स्म। तेषु प्रकोष्ठेषु पीठोपकरणानि अथवा उपस्कराणि (फर्नीचर इति) न्यूनानि भवन्ति स्म।

एकोनविंशति-शताब्दस्य मध्यकालं यावत् अपि कमर-अल-दीन-खानस्य प्रासादे (हवेली) अनेकानि भवनानि आसन्। तेषु वाहनचालकानां वस्त्र-मण्डप-कर्मकराणाम्(डेरवाल) उल्काधारिणां लेखाधिकारिणां लिपिकापानां सेवकानां च कृते वासव्यवस्था आसीत्।

अनेके मुगलजनाः सम्पन्न-ब्रिटि-शासनस्य काले एतानि विशालानि भवनानि संरक्षयितुं समर्थाः न आसन्। परिणामतः, प्रासादानां(हवेलियां) वण्टनम् आरब्धम्। तेषां प्रासादानां पृथक् पृथक् भागाः विक्रेतुम् आरब्धाः। प्रासादानां यानि द्वाराणि राजमार्गस्य समक्षे आसन् तत्र आपणाः भाण्डागाराणि (गोदाम) जातानि। अनेके प्रसादाः नूतनस्य वणिग्वर्गस्य नियन्त्रणे जाताः। अनेके प्रसादाः अनूपयोगत्वात् नष्टाः जाताः।

औपनिवेशिकानि ब्रिटिशभवनानि प्रासादेभ्यः सर्वथा पृथक् आसन्। एतानि ब्रिटिशभवनानि एकलकुटुम्बाय निर्मितानि आसन्। अतः तादृशानि भवनानि एकतलयुक्तानि नम्री-भूतानि छदियुक्तानि च भवनानि भवन्ति स्म। एतानि ब्रिटिश-भवनानि सामान्यतया एक-एकड-परिमिते अथवा एकड-द्वयपरिमिते मुक्ते स्थाने भवन्ति स्म। एतेषु भवनेषु भोजनाय शयनाय वासाय च पृथक् पृथक् प्रकोष्ठाः आसन्। अग्रिमे भागे लम्बमानाः आलिन्दः भवन्ति स्म। अनेकेषु भवनेषु त्रिषु स्थानेषु अलिन्दाः निर्मीयन्ते स्म। पाकशाला, अश्वशाला, सेवकानाम् आवासाः च मुख्यभवनतः पृथक् निर्मीयन्ते स्म। गृहस्य सुरक्षार्थं द्वादशाधिकाः सेवकाः भवन्ति स्म। कुटुम्बस्य महिलाः प्रायः सौचिकानाम् अन्येषां च शिल्पिनां निरीक्षणाय आलिन्दे उपविशन्ति स्म।

सम्पन्नः (अमीर) - कुलीनवर्गीयः जनः

नगरपालिका योजनां निर्माति –

एकत्रिंशदधिकैकोनविंशति-शत-तम-वर्षस्य (१९३१) जनगणनाद्वारा ज्ञायते यत् पुरातन-नगरीये क्षेत्रे भयानकः जनसम्मर्दः अस्ति। अत्र प्रत्येकं परिमितस्थानं नवतिः जनाः निवसन्ति स्म अपरञ्च नवदेहल्यां प्रत्येकडभूमिं केवलं त्रयः जनाः निवसन्ति स्म।

चित्रम्-१४ नवदेहल्याः एकम् औपनिवेशिक-भवनम्।

पुरातननगरे अव्यवस्था जाता पुनरपि तत्र तस्य विस्तारः निरन्तम् अभवत् । पुरातननगरस्य निवासिभ्यः राबर्टक्लार्कः १८८८ तमवर्षे लाहौरगेट-संशोधन-योजनायाः अन्तर्गतं कामपि विस्तारयोजनाम् आरब्धवान् । तस्य चिन्तनम् इदम् आसीत् यत् अत्रत्य-वास्तव्याः पुरातननगरतः पृथक् भूत्वा नूतनप्रकारस्य चौराहा-विपण्यां प्रति गच्छेयुः । एतं चतुष्पथं (चौराहे इति) परितः आपणाः भवेयुः इति कल्पना तस्य आसीत् । एतस्मिन् पुनर्विकासक्रमे राजमार्गेभ्यः जालयुक्तसंरचना सुनिश्चिता । अधुना राजमार्गाणां प्रथिमा आकारः स्वरूपः च सदृशः स्यात् इत्येतत् कार्यं करणीयम् आसीत्। वस्तीनां निर्माणाय भूमिः समानखण्डेषु विभक्ताः । एतस्य नूतनस्थानस्य नाम क्लार्कगञ्ज इति स्थापितम् । इदं कार्यं न कदापि पूर्तिम् अगात् । तेन च पुरातननगरस्य जनसम्मर्दः अपि न कथमपि न्यूनीकृतम् । १९१२ तमवर्षे अपि एतेषु नूतनस्थानेषु जलापूर्तेः निष्कासस्य च व्यवस्था अतिदयनीया आसीत्।



चित्रम् -१५ पुरातन-देहल्याः कश्चित् राजमार्गः ।

देहली-संशोधन-न्यासस्य (ट्रस्ट इति) घटनं १९३६ तमवर्षे अभवत् । एतस्याः योजनायाः अन्तर्गतं सम्पन्नजनेभ्यः दरियागञ्ज-दक्षिण-सदृशानि क्षेत्राणि निर्मितानि । अत्र उद्यानानि परितः वस्तयः जाताः । भवनानाम् अन्तः निजतायाः नूतनचिन्तनस्य च दृष्ट्या स्थानं विभक्तम् आसीत्। अधुना अनेके कुटुम्बाः अथवा समूहाः सामूहिक-स्थाने न निवसन्ति स्म अपितु भवनस्य अन्तः एकस्य एव कुटुम्बस्य विभिन्नेभ्यः सदस्येभ्यः पृथक् पृथक् स्थानानि भवन्ति स्म ।

अन्यत्र –

दक्षिण-अफ्रीकायां हर्बर्टबेकरः

यदि भवन्तः षोड्शं सप्तदशं च चित्रं पश्यन्ति तर्हि तेन अवगमिष्यन्ति यत् एतयोः द्वयोः भवनयोः महती समानता अस्ति। परन्तु एते द्वे भवने सर्वथा पृथक् पृथक् महाद्वीपानां स्तः। अस्मात् तथ्यात् भवन्तः किम् अवगच्छन्ति ?

चित्रम्-१६

चित्रम्-१७

नवत्यधिकैकोन-विंशत्यधिकाष्टा-दश-शत-तमस्य (१८९०) दशकस्य आरम्भे एव हर्बर्टबेकरनाम्नः कश्चित् युवाङ्ग्लीय-वास्तुकारः कार्यम् अन्वेषयन् दक्षिणाफ्रीकां प्राप्तवान्। अत्र बेकरस्य मेलनं केपटाउनस्य राज्यपालेन (गवर्नरेण इति) सेसिलरोड्स-वर्येन सह अभवत् तस्मात् तेन बेकरस्य आभ्यन्तरे ब्रिटिशसाम्राज्यं प्रति स्नेहः प्राचीनरोमनवास्तुशिल्पं च प्रति प्रशंसायाः भावः उत्पादितः।

१७ चित्रे दक्षिणाफ्रीकास्थितस्य प्रिटोरियानगरस्य अर्थात् संघीयभवनं (यूनियनबिल्डिंग इति) दृश्यते। यस्य प्रारूपं बेकरः एव सज्जीकृतवान् आसीत्। एतस्मिन् प्राचीनस्य प्रतिष्ठितस्य च वास्तुशिल्पस्य तत्त्वानां प्रयोगः कृतः आसीत्, येषां प्रयोगः बेकरेण अपि नवदेहलीस्थितस्य सचिवालयभवनस्य योजनायाम् अपि कृतः अस्ति। यूनियनबिल्डिंगः इति अपि नवदेहलीस्थितस्य सचिवालयभवनस्य इव पर्वते स्थितम् आसीत्। किं भवद्भिः ध्यातं यत् सत्तासीनाः जनाः अधस्तात् दर्शनस्य स्थाने उपरिष्ठात् अधोभागं प्रति द्रष्टुम् इच्छन्ति स्म ? यूनियनभवनं सचिवालयभवनं च द्वे अपि राजकार्यालयाणां कृते निर्मिते आस्ताम्।

आगच्छन्तु कल्पयन्तु

मन्यन्तां, भवन्तः १७००तमवर्षे समया शाहजहांनाबादे निवसन्ति। एतस्मिन् अध्याये प्रदत्तानां सूचनानाम् आधारेण तात्कालिकस्य जीवनस्य कस्यचित् एकस्य दिनस्य स्वानुभवं लिखन्तु।

पुनः स्मरन्तु –

१. उचितम् अनुचितं च ज्ञापयन्तु –

(क) पश्चिमविश्वे आधुनिकनगराणि औद्योगिकीकरणेन सह विकसितानि।

(ख) सूरतस्य मछलीपट्नमस्य एकोनविंशतितमे शताब्दे विकासः अभवत्।

(ग) विंशतिशताब्दे भारतस्य अधिकांशजनसंख्या नगरेषु निवसति स्म।

(घ) १८५७ तमवर्षात् पश्चात् जामायवनालये (जामा-मस्जिदे) इति पञ्च वर्षाणि यावत् यवनप्रार्थना (नमाज इति) न अभवत्।

(ङ) नवदेहल्याः अपेक्षया पुरातनदेहल्याः स्वच्छताविषये अधिकधनस्य व्ययः कृतः।

२. रिक्तस्थानानि पूरयन्तु –

क) सफलतापूर्वकस्य गुम्बदस्य प्रयोगः यत्र अभवत् तत् प्रथमभवनं------आसीत्।

ख) नवदेहल्याः शाहजहांनाबादस्य च रूपरेखां सुनिश्चेतुं द्वौ वास्तुकारौ---- च –---- आस्ताम्।

ग) आङ्ग्लीयाः जनसम्मर्दयुक्तानि स्थानानि परित्यज्य---मन्यन्ते स्म।

घ) .....इत्यस्य नाम्नः १८८८ तमवर्षे काचित् विस्तारयोजना सज्जीकृता।

३. नवदेहल्याः शाहजहांनाबादस्य च नगरयोजनायां तिस्रः भिन्नताः अन्वेषयन्तु।

४. मद्राससदृशनगराणां "गोरे" अर्थात् श्वेत-क्षेत्रेषु के जनाः निवसन्ति स्म ?

आगच्छन्तु विचारयामः-

५. विनगरीकरणस्य (विशहरीकरणस्य) कः अभिप्रायः अस्ति ?

६. आङ्ग्लीयैः देहल्याम् एव विशालराजसभा किमर्थम् आयोजिता यद्यपि देहली राजधानी नासीत्।

७. पुरातन-देहली-नगरं ब्रिटिशशासनस्य अन्तर्गतं कथं क्रमशः परिवर्तितम् ?

८. विभाजनेन देहल्याः जनजीवने कः प्रभावः निपतितः ?

आगच्छन्तु कृत्वा पश्यामः

९. स्वनगरस्य अथवा स्वपार्श्वस्थ- नगरस्य इतिहास-विषये अवजानन्तु । पश्यन्तु तत् कदा कथं च विस्तारं प्राप्तवत् अपि च कालक्रमेण तत्र कानि कानि परिवर्तनानि अभवन् । भवन्तः विपणीनां भवनानां सांस्कृतिक-संस्थानानां वस्तीनां च इतिहासविषयकीं सूचनां दातुं शक्नुवन्ति।

१०. स्वनगरस्य उपनगरस्य ग्रामस्य न्यूनातिन्यूनं दशोद्यागानां (व्यवसाय) सूचीं निर्मान्तु । अवजानन्तु यत् एते उद्योगाः कदारभ्य तत्र क्रियन्ते । अनया सूच्या एतस्मिन् क्षेत्रे जातपरिवर्तनानां विषये किम् अवगम्यते ?

इति षष्ठोऽध्यायः

0857

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 978-81-7450-834-8